शब्दशक्तिप्रकाशिका।



महामहोपाध्याय
श्रीजगदीश तर्कालङ्कार भट्टाचार्य्येण
विरचिता।



बि, ए उपाधिधारिणा, पण्डितकुलपतिना
श्रीजीवानन्दविद्यासागर भट्टाचार्य्येण
संस्कृता प्रकाशिता च।

द्वितीयसंस्करणम्।



कलिकातानगर्य्यां
१० नं० शम्भु चन्द्र चाटुर्य्येर ष्ट्रीटस्थ नित्यधार्म्मिशन यन्त्रे,
इउ, रचितेन मुद्रितम्।




ई १९०४



Jibananda vidyasagara B.A.

श्रीजीवानन्द विद्यासागर

শ্রীজীবানন্দ বিদ্যাসাগর



शब्दशक्तिप्रकाशिका।

तर्कं तन्त्रञ्च विदुषां विदुषां तोषकारिका।
क्रियते जगदीशेन शब्दशक्तिप्रकाशिका॥

ग्रन्थारम्भे विघ्नविधाय समुचितां शब्दमयीं देवतां ग्रन्थकृत् स्मरति स्म।

अनुभवहेतुः सकलैः सद्यः समुपासिता मनुजैः।
साकाङ्क्षासन्ना च स्वार्थे योग्या सरस्वती देवी॥

इतरा तावद्देवता सम्यगुपासिताप्युपासके न साकाङ्क्षा साकाङ्क्षापि वा नासन्ना आसन्नापि या न स्वस्योपासितुरभिलषितार्थे योग्या योग्यापि वा न समस्तोपासकेऽनुभवस्य जनिका जनिकापि वा न सद्यः किन्तु कालक्रमेणैव सरस्वती तु देवी सकलमनुजैरेव साकाङ्क्षा आसन्ना योग्या चोपासिता सती सद्य एवानुभवं तनुते अतो देवतान्तरमपेक्ष्योत्कर्षवतीयमवश्यमुपास्येत्यत्र तात्पर्य्यम्।

अथ शब्दो यदि स्वार्थस्यानुभवे भवेद्धेतुः प्रात्यक्षिक एवौपनयिके तत्र नाकाङ्क्षाद्युपयोगस्तद्भिन्ने चेदानुमानिक एव न च तत्र सद्यः साकाङ्क्षत्वादिधीमात्रेण व्याप्तिबुद्ध्यादेरप्यधिकस्यापेक्षणादित्याशङ्कामपनेतुमन्वयबोधनामकमनुभवान्तरं दर्शयति।

साकाङ्क्षशब्दैर्यो बोधस्तदर्थान्वयगोचरः।
सोऽयं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा॥

अस्ति तावद्गौरस्ति गामानयेत्यादिसाकाङ्क्षशब्देभ्यः स्वस्ववृत्त्या पदार्थानामुपस्थित्युत्तरं गवादावस्तित्वादेरन्वयावगाही विलक्षणो बोधो यत्रान्वयव्यतिरेकाभ्यामाकाङ्क्षादिमत्तया शब्दस्यावगमो हेतुर्न तु पदार्थानामुपस्थितिमात्रं विशिष्टमतेरानुभविकत्वादन्यथानुमितेरप्यपलापापत्तेः। न चासौ स्मृतिः समानाकारसंस्काराप्रभवत्वात् नापि साक्षात्कारः साकाङ्क्षपदेनेव प्रकारान्तरेणाप्युपस्थितार्थस्योपनयमर्य्यादयावगाहितापत्तेः न चेष्टापत्तिरनुभवविरोधात् तदुत्तरं तथाविधानुव्यवसायापत्तेश्च। तत्तदर्थविषयकत्वेन शाब्दमतेरनुव्यवसायं प्रति तत्तदर्थसाकाङ्क्षपदजन्यतद्गोचरशाब्दत्वेन विषयविधया हेतुत्वकल्पनायामतिगौरवात् इतरबाधलब्धस्या छिद्रेतरत्वादेरपदार्थस्यापि अवगाहित्वेन शाब्दमतेरनुव्यवसीयमानत्वात् गवादावस्तित्वादेरिवास्तित्वादावपि गवादेर्भानप्रसङ्गस्य तावताप्यनुद्धाराच्च। अतएवासौ नानुमितिरपि पूर्वपरामृष्टस्य वस्तुमात्रस्यैवासति बाधके शाब्दधीविषयतापत्तेः। न च तत्तदर्थगोचरशाब्दधियं प्रति साकाङ्क्षपदजन्याया स्तत्तदर्थगोचरस्मृतेः कारणत्वकल्पनान्नैष दोषः तावतापि पदार्थानामन्वयधीदशायामपदार्थानामपि स्वसामग्रीवलेन प्रत्यक्षानुमित्योरन्यतरप्रसङ्गस्य दुर्वारतापत्तेः शाब्दधियः प्रत्यक्षत्वाभ्युपगमे प्रत्यक्षादिसामान्यं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वासम्भवात् शाब्दान्यप्रत्यक्षत्वाद्यवच्छिन्नं प्रति तस्यास्तथात्वमपेक्ष्य शाब्दधियः प्रत्यक्षादिभिन्नत्वकल्पनायामेव लाघवाच्च।

अथ लिङ्गजन्यत्वेनान्वयबुद्धेरनुमितित्वसिद्धावनायत्या शाब्दान्यानुमित्यां तत्सामग्र्याः प्रतिबन्धकत्वं वाच्यमतो लिङ्गजत्वमेव शाब्दधियः खण्डयति।

योग्यतार्थगताकाङ्क्षा शब्दनिष्ठानुभाविका ।
प्रत्येकं वा मिलित्वा वा नैते लिङ्गमसिद्धितः ॥

गवादावस्तित्वादेरनुभवार्थं न तावदस्तित्वादेर्बाधविरहित्वरूपं योग्यतामात्रं लिङ्गं बाधनिश्चयाभावेनान्यथासिद्धस्य योग्यतानिश्चयस्यानावश्यकत्वात् योग्यतामात्रलिङ्गकसंसर्गानुमानस्यान्वयबुद्धित्वे घटः कर्मत्वमित्यादिस्थलीयस्यापि तस्य तथात्वापातात् योग्यतायाः संशयस्थलेऽप्यन्वयबुद्धेरानुभविकत्वाच्च । गवादावस्तित्वादेरन्वयबोधानुकूलानुपूर्व्यपर्यवसिता त्वाकाङ्क्षा स्वयमसिद्धा कथमस्तित्वादेरन्वयबोधं साधयेत् अतएव अस्तित्वादेर्योग्यताविशिष्टमप्याकाङ्क्षावत्त्वं न तदन्वयस्यानुमापकमप्रसिद्धेः । अथ गौरस्ति तावान् स्वधर्मिकास्तित्वान्वयबोधानुकूलाकाङ्क्षाश्रयपदस्मारितत्वात् घटवत् अस्तिपदसमभिव्याहृतगोः पदस्मारितत्वाद्वा चक्षुर्वदित्याद्यनुमानत एवास्त्वन्वयधियोऽन्यथासिद्धिः पदानामेकवाक्यतापन्नत्वरूपसमभिव्याहृतत्वनिश्चयं विना न्यायनयेऽप्यन्वयबोधस्यानुत्पत्त्या पूर्वं तस्यावश्यकत्वात् । न च विनष्टे भाविनि वा घटे चक्षुरादौ व्यभिचारः स्वार्थानुमाने स्वरूपतस्तस्याकिञ्चित्करत्वात् एकविधव्यभिचारज्ञानसत्त्वेऽप्यन्यविधव्याप्तिनिश्चयस्य सम्भवाच्च समानाकारस्यैव व्यभिचारग्रहस्य व्याप्तिधीविरोधित्वात् इति नव्यवैशेषिकाः । तन्न । गवादेः पदस्मारितत्वाद्यभावग्रहदशायामुत्पन्नस्य गौरस्तीत्याद्यन्वयबोधस्योक्तहेतुनाप्यनिष्पत्तेः पदजन्या हि पदार्थस्मृतिः स्वरूपसत्येवान्वयबुद्धावुपयुज्यते न तु ज्ञाता प्रमाणाभावात् पदे रस्मारितस्यापि तत्स्मारितत्वग्रहदशायामन्वयधीप्रसङ्गाच्च । एतेन गौःपदमस्तित्ववद्गोगोचरज्ञानपूर्व्वकम् अस्तिपदसाकाङ्क्षगौःपदत्वात् यन्नैवं तन्नैवं यथाकाशमित्येवं पदपक्षकमप्यनुमानं कणभक्ष-

पक्षानुसारिणाम् अपास्तं गवादिपदानां ज्ञानपूर्व्वकत्वाद्यभाव-निश्चयदशोत्पन्नस्य गवादिमुख्यधर्म्मिकास्तित्वाद्यन्वयबोधस्य सार्व-जनीनस्योक्तलिङ्गादप्यनिष्पत्तेः वाक्यार्थस्यापूर्व्वत्वेन तद्धर्म-साध्यस्य प्रायशः प्रागनुपस्थितत्वानुमानायोगाच्च। वस्तुतो वाक्यार्थबोधस्यानुमितित्वे सत्येव साकाङ्क्षपदत्वादिलिङ्गकत्वं कल्प्यं तदेव त्वसिद्धं प्रमाणाभावादस्तित्वेन गामनुमिनो-मीत्यादेरनुव्यवसायस्य तत्रासत्त्वात् प्रत्युत गौरस्तीतिवाक्या-दस्तित्वेन गौः श्रुतो नत्वनुमित इत्यनुभवाच्च। श्रोतव्यो मन्तव्य इत्यादिप्रयोगदृष्ट्या शाब्दत्वस्यापि शृणोतेः शक्यतावच्छेद-कत्वात्। नचासौ भ्रान्तिर्बाधकाभावात्। न चेदेवमनु-मितिमात्रस्य पदजन्यत्वं प्रकृत्या अन्वयबोधत्वं किमिति न रोचयेः अनुमिताविवान्वयमितावपि समानविषयकप्रत्यक्ष-सामग्र्यादेश्च प्रतिबन्धकतया तदभावजन्यत्वेनैकशेषस्य दुष्कर-त्वात् पटादिपदैरर्थस्य पटादेः स्मरणे सति तदीयव्याप्तेरिव दहनाद्यर्थैस्तदर्थकवह्न्यादिपदस्य स्मरणोत्तरं तदीयाकाङ्क्षा-द्यवगमस्य सुवचत्वात् वाच्यतावद्वाचकत्वस्यापि सम्बन्धस्य स्मारकतायामविशिष्टत्वात्। नच ह्रदे धूमाभाव इत्याद्य-प्रसिद्धसाध्यकानुमितिस्थले पूर्व्वं साध्यस्यानुपस्थित्या तेन साध्यवाचकपदस्य स्मरणासम्भव इति वाच्यं तत्र साध्यज्ञान-विरहेऽपि उद्बोधकान्तरात् साध्यवाचकपदस्मरणसम्भवात् किञ्च घटाद्यन्य इत्यादिवाक्याद्घटप्रतियोगिताकान्यत्वादिप्रकारेण निरवच्छिन्नविशेष्यताको घटान्यस्य बोधः सर्व्वजनसिद्धः स चास्माकं तादृशानुपूर्व्वीकपदज्ञानत्वेन तथाविधान्वयबोधं प्रति हेतुत्वादुपपद्यते परेषान्तु भेदो घटप्रतियोगिताकस्तत्सा-काङ्क्षान्यादिपदस्मारितत्वादित्यादिरीत्या अनुमित्या न तन्नि-र्व्वाहः पञ्चविधयान्यत्वस्य भानेऽप्यन्यत्वप्रकारेणान्यस्य तत्राभा-

नात्। न च तत्रान्यपदमेव घटान्यत्वप्रकारेण घटान्यस्य लक्षकं घटादित्यस्य व्यर्थतापत्तेः अन्यथा घटोऽस्तीत्यादावपि घटादिपदस्यैवास्तित्वादिविशिष्टघटादिलक्षकत्वसम्भवात् तत्राप्यस्तित्वघटयोरन्वयबोधापलापापत्तेरित्यास्तां विस्तरः।

साकाङ्क्षत्वादिधीरिव वाक्यार्थगोचरयथार्थज्ञानवदुक्तत्वरूपस्याप्तोक्तत्वस्यापि निश्चयः शाब्दधीहेतुरतो नैकपदार्थधर्मिकोऽपरपदार्थस्यान्वयबोधोऽनुमितिः सिद्धिसत्त्वे विनानुमित्सां तदसम्भवात् परन्त्वनुमितेरन्य एव किन्त्वसौ गृहीतग्राहित्वान्न प्रमा यज्जातीयविशिष्टज्ञानत्वावच्छेदेन समानाकारनिश्चयोत्तरत्वं तज्जातीयान्ययथार्थज्ञानस्यैवागृहीतग्राहित्वेन प्रमात्वात् अतएव धारावाहिकप्रत्यक्षव्यक्तीनां समानाकारग्रहोत्तरवर्त्तित्वेऽपि न तासां प्रमात्वहानिः हानिस्तु समानाकारानुभवसमुत्थानां स्मृतीनामिति जरन्मीमांसकानां समाधानं निरस्यति।

नाप्तोक्तता तु वाक्यार्थगर्भा शाब्देपयुज्यते।
वाक्यार्थानामपूर्व्वत्वात्संशयेऽप्यन्वयोदयात्॥

यस्यैकपदार्थवदपरपदार्थपर्य्यवसन्नस्य वाक्यार्थस्य ज्ञानवदुक्तत्वरूपाया आप्तोक्ततायाः निश्चयः शाब्दमतेः कारणं स्यात् स्यादपि तेनैव रूपेण साध्यनिश्चयेन प्रतिबन्धादेकपदार्थपक्षिकाया अपरपदार्थानुमितेरनुत्पादो न चैवं शाब्दधियः पूर्वं वाक्यार्थस्योपस्थित्यनियमेन तद्गर्भस्याप्तोक्तत्वस्यापि मतेरनावश्यकत्वात् अन्यथा वेदस्याप्यनुवादकतापत्तेः न हि लौकिकेन तत्वेन ज्ञातवाक्येन जनित एवान्वयबोधे तस्य हेतुत्वं गौरवात् एकपदार्थेऽपरपदार्थस्य शब्दे वाक्यार्थज्ञानवदुक्तत्वस्य संशयेऽपि अनुमितेरुत्पादाच्च। अतएवाप्तोक्तत्वस्य संशये व्यतिरेकनिश्चये वान्वयबुद्धेरनुत्पादादवश्यं तन्निश्चयस्तत्र हेतु-

रित्यपि प्रत्युक्तम् असिद्धेः। ननु माभूदासीत्वस्य निश्चयानुरोधेन सिद्धसाधनं तात्पर्य्यस्य तु स्यात् तन्निश्चयस्यान्वयधीहेतुत्वात् अन्यथा घटकर्मत्वादिपरत्वाभावस्य घटकर्मत्वाद्यन्यमात्रपरत्वस्य वा निश्चयेऽपि घटमित्यादिवाक्यात् कर्मत्वं घटीयमित्याद्यन्वयबोधापत्तेरिति चेन्न कर्मताधर्मिकघटाद्यन्वयधीपरत्वाभावनिश्चयदशायां प्रमेयत्वादिप्रकारेण घटकर्मत्वादिपरत्वस्य निश्चयेऽपि घटीयं कर्मत्वमित्यन्वयमतेरनुत्पत्त्या कर्मताधर्मिकघटान्वयबोधपरत्वप्रकारकनिश्चयत्वेनैव तात्पर्य्यधियस्तस्यां कारणत्वेन वाक्यार्थस्य तत्रानिवेशात्। वस्तुतः समानानुपूर्वीकस्यैव वाक्यान्तरस्य तस्यैव वा कालान्तरमन्तर्भाव्य घटीयकर्मत्वादिपरत्वनिश्चयसत्त्वेऽपि श्रूयमाणवाक्यव्यक्ताव्यदानीमन्तर्भावेण तत्परत्वस्यानिश्चयेऽभावनिश्चये वा घटीयं कर्मत्वमित्याद्यन्वयमतेरनुत्पादाद्विशिष्यैव तत्तद्वाक्यव्यक्तिधर्मिकस्य घटकर्मत्वादिपरत्वनिश्चयस्य तत्तदन्वयबोधहेतुत्वमुपेयं तथाच तत्तद्धेतुभूतानां प्रकरणज्ञानाभिधानामेव विज्ञानव्यक्तीनां तथात्वमुचितम् अवश्यं क्लृप्तपूर्ववर्त्तिताकत्वात्। अतएव सैन्धवमानय इत्यादावपि लवणपरत्वधीर्न लवणाद्यन्वयबुद्धौ हेतुः किन्तु तदर्जकत्वेनाभिमतं भोजनादिप्रकरणस्य प्रतिसन्धानमिति न्यायसिद्धान्तः। एवञ्च वाक्यार्थप्रतीतिजनकतयाभिप्रेतत्वलक्षणस्य तात्पर्य्यस्य ज्ञानमवश्यं शाब्दसामान्ये हेतुस्तस्य संशये व्यतिरेकनिश्चये च तदनुत्पादात् तन्निश्चयस्यैव युगपदनेकार्थोपस्थितावेकार्थमात्रान्वये विनिगमकत्वात् लक्षणाकल्पकत्वात् मुख्यार्थबाधस्य सर्वत्र लक्षणाया असम्भवात् तथा च तात्पर्य्यावच्छेदकतयैव सर्वत्र वाक्यार्थसिद्धेः प्रत्यक्षानुमितिभ्यां भिन्नमनुभवं भावयन्नपि शब्दो गृहीतग्राहित्वेनानुवादक इति प्रभाकरमतमप्यनादेयं कवि-

वाक्यानामन्यार्थमात्रपरत्वस्य शुकवाक्यानाञ्च स्वार्थपरत्वाभावस्य निश्चयेऽपि ततः सामाजिकादेरन्वयानुभावोत्पत्त्या व्यभिचारादित्यास्तां विस्तरः ।

ननु स्वार्थान्वयगोचरो बोधः साकाङ्क्षैरपि सार्थकैरेव शब्दैः सम्पादनीयो न तु निरर्थकैस्तत्र कोऽसौ सार्थकः कतिविधश्च इत्याकाङ्क्षायामाह ।

शब्दान्तरमपेक्ष्यैव सार्थकः स्वार्थबोधकृत् ।
प्रकृतिः प्रत्ययश्चैव निपातश्चेति स त्रिधा ॥

यादृशः शब्दः शब्दान्तरं सहकृत्यैव स्वस्य स्वघटकस्य वा वृत्त्युपस्थाप्ययावदर्थावगाहिबोधं प्रत्यनुकूलः स तथाविधार्थे सार्थकः पटपाचकाद्याः प्रकृतयः सुप्तिङाद्याः प्रत्ययाः चादयो निपाताश्च स्वोपस्थाप्यार्थस्य बोधं नियमतः शब्दान्तरं सहकृत्य जनयन्ति वाक्यानि पुनरसहकृत्यापि । शशविषाणादिकः शब्दोऽपि शशीयत्वादिना विषाणादेरन्वयबोधमादधानस्तादृशविषयताकबोधने सार्थक एव परन्त्वयोग्यः । सचायं त्रिविध एव प्रकृतिः प्रत्ययो निपातश्चेति शप्श्यनादिविकरणो नुमाद्यागमश्चान्वयबोधने प्रकृत्यादीनां सहायोऽपि न स्वार्थोपस्थितिद्वारा येन तमादाय चतुरादिविधः सार्थकः स्यात् । पुत्रो वः इत्यादावपि युष्मदादिसम्बन्धो न वसाद्यादेशस्यार्थः किन्तु तदादेशिनो युष्माकमित्यादिवाक्यस्य अतः पूर्वपदमपेक्ष्यैव तादृशसम्बन्धबोधानुकूले तत्र न प्रसङ्गः । सदृशाद्यर्थेषु प्रकृत्यादिभ्यो भिन्नेषु निभनीकाशादिशब्देषु अतिप्रसङ्गस्तु समासान्तर्गतत्वनियतस्वार्थबोधकताकान्यत्वेन विशेषणाद्वारणीयः ।

तत्र प्रथमोद्दिष्टां प्रकृतिं लक्षयति ।

स्वेतरार्थानवच्छिन्नयत्स्वार्थस्यावबोधने ।
यच्छब्दनिश्चयो हेतुः प्रकृतिः सा तदर्थिका ॥

स्वेतरशब्दार्थविशेषितस्य यादृशस्वार्थस्यान्वयबोधं प्रति स्वाव्यवहितोत्तरत्वसंसर्गेण यादृशशब्दवत्ताया निश्चय एव हेतुस्तादृशस्तथाविधार्थे प्रकृतिः। पटभूप्रभृतयोहि शब्दाः स्वोत्तरविभक्त्याद्यंशे निश्चिता एव स्वोपस्थाप्यस्य वसनजननादेरन्वयं प्रत्ययार्थे कर्मत्वकर्त्तृत्वादौ बोधयन्ति न त्वन्यथा प्रत्ययास्तु पदान्तरार्थानवच्छिन्नस्य सङ्ख्याकालेष्टसाधनत्वादिस्वार्थस्यान्वयबोधं प्रत्यनिश्चिता अप्युपयुज्यन्ते। चैत्रः पचति यजेतेत्यादौ शब्दान्तरधर्मिकसुबादिनिश्चयस्यासत्त्वेऽपि तदर्थस्यैकत्ववर्त्तमानत्वादेः चैत्रपाकादावन्वयात् स्वाव्यवहितोत्तरत्वसंसर्गेण तादृशशब्दवत्ताया निश्चय एव तदुपस्थाप्य यादृशार्थान्वयबोधं प्रति हेतुस्तादृशस्यैव शब्दस्य प्रकृतेः तथाविधः स्वार्थः स च पाकेत्यादेः शक्त्यादिविरहेऽपि पचनादिरूपः सुवर्णएव पचनादेः कर्मत्वादावन्वयबोधं प्रत्ययादिधर्मिकतादृशशब्दवत्ताया निश्चयस्यैव हेतुत्वात्। बहुगुडो द्राक्षेत्यादावीषदसमाप्तत्वादिरूपस्य स्वार्थस्य द्राक्षादावन्वयबोधं प्रति गुडादिपदधर्मिकः स्वोत्तरत्वसम्बन्धेन बहुजादिप्रत्ययस्य निश्चय एव हेतुरपितु न पदान्तरार्थानवच्छिन्नस्य तादृशस्वार्थस्य द्राक्षादावन्वयबोधकः प्रत्ययानां प्रकृत्यर्थावच्छिन्नस्यैव संख्यादिभिन्नस्वार्थस्य धर्म्यन्तरेऽन्वयबोधकत्वव्युत्पत्तेः। अतो नाम्नः प्राग्विहिते बहुचि न प्रसङ्गः न वा चन्द्रनिभोऽयं कुम्भकारोऽयमित्यादौ सदृशकर्त्राद्यर्थके निभकारादौ पूर्वपदार्थावच्छिन्नस्यैव सदृशाद्यर्थस्य बोधकतायास्तत्र व्युत्पन्नत्वात्। न चैवमिवकारादेरन्ययोगाद्यर्थे प्रकृतित्वं न स्यात् पार्थ एव धनुर्धर इत्यादौ पार्थादिपदार्थविशेषितस्यैव तादृशस्वार्थस्यान्वयबोधं प्रति हेतुत्वादिति वाच्यम् इष्टत्वात् प्रकृतेः स्वोत्तरविभक्तिसाकाङ्क्षसजातीयत्व-

नियमात् एवकारादेश्च सविभक्तिकत्व एव प्रमाणाभावात्। ये तु मन्यन्ते पार्थान्ययोगत्वावच्छिन्नव्यवच्छेदस्यैव तत्रैवकारार्थत्वं तादृशार्थबोधने तात्पर्य्यग्राहकत्वेन शवादिवदाकाङ्क्षासम्पादकत्वेनैव वा पार्थादिशब्दस्योपयोगादेवकारादिनिपातः प्रकृतिरेव तस्य च लुप्तविभक्तिकत्वेन तादृशविभक्त्यंश एव तन्निश्चयस्य पार्थान्ययोगत्वाद्यवच्छिन्नव्यवच्छेदरूपस्वार्थान्वयबोधं प्रति हेतुत्वमिति तेषां पार्थएवेत्यत्र पार्थैवकारार्थयोर्भेदेनानुभविकस्यान्वयबोधस्यापलापप्रसङ्गः प्रसङ्गश्च तयोरभेदेनान्वयस्य तथा व्यवच्छेद एवेत्यादावपि प्रातिपदिकार्थयोरभेदान्वये तन्त्रस्य नाम्नोः समानविभक्तिकत्वस्यानपायादिति। यत्तु उपसर्गाणामिवैवकारादिनिपातानामपि न प्रकृतित्वं निरर्थकत्वात् परन्तु समभिव्याहृतपार्थादिपदानां तदन्ययोगव्यवच्छिन्नादिलक्षणायां निरूढत्वसम्पादकत्वमात्रमिति मतं तच्चिन्त्यम्।

लाघवादन्यथा निर्वक्ति।

स्वोपस्थाप्ययदर्थस्य बोधने तस्य निश्चयः।
तत्त्वेन हेतुरथवा प्रकृतिः सा तदर्थिका॥

तत्त्वेन यन्निश्चयत्वेन स्वोपस्थाप्ययादृशार्थस्यान्वयबोधं प्रति स्वाव्यवहितोत्तरत्वसंसर्गेण यादृशशब्दवत्तानिश्चयत्वेन हेतुत्वं तादृश एव शब्दस्तथाविधार्थे प्रकृतिरिति तु फलितार्थः। बहुगुडो द्राक्षेत्यादौ बहुजाद्यर्थस्यान्वयबोधं प्रति न गुडादिपदधर्मिकबहुजादिनिश्चयत्वेन हेतुत्वमपितु सुबादिधर्मिकबहुगुडादिपदनिश्चयत्वेन अन्यथा केवलादपि बहुगुडादिशब्दात् द्राक्षादौ बहुजाद्यर्थस्यान्वयबोधापत्तेरिति न तत्र प्रसङ्गः।

प्रत्ययं लक्षयति विभजते च।

याहृशार्थे प्रकृत्यन्यो निपातान्यश्च वृत्तिमान्।
स ताहृशार्थे शब्दः स्यात् प्रत्ययोऽसौ चतुर्विधः॥

याहृशार्थं इति वृत्तावप्यन्वेति तेन याहृशार्थकप्रकृतिनिपाताभ्यां भिन्नो याहृशार्थे शक्तिनिरूढ़लक्षणान्यतरात्मकप्रशस्तवृत्तिमान् याहृशः शब्दः स ताहृशार्थकप्रत्ययः प्रशंसायां मतुपो विधानात् शक्त्या निरूढ़लक्षणया च गुणगुणिनोः स्थितिप्रस्थानयोश्च बोधका अपि शुक्लस्थाप्रभृतयः प्रकृतिभ्यो न भिन्नाः तथा शक्त्या समुच्चयादिप्रतिपादका अपि चादयो न निपातेभ्यः सुवादयस्तु स्वपरतायामेव प्रकृतयो नत्वेकत्वाद्यर्थे। तृतीयादौ कर्मत्वादेः सत्यपि लक्षणा न निरूढ़ा प्राचुर्यः प्रयोगविरहात्। अतएव यत्रास्ति प्रयोगस्तत्र तृतीयादिनोऽपि कर्मत्वादेरवगमः यथा पशुना रुद्रं यजेत इत्यादौ। अतएव चान्वर्थबलादेवैकवचनादेरेकत्वादिबोधकत्वप्राप्तौ द्व्येकयोर्द्विवचनैकवचने बहुषु बहुवचनमिति यत् पाणिनिः प्राह तदिदं द्वित्वैकत्वादावेव द्विवचनैकवचनादिनियमार्थमिति फणिभाष्यकृतः तेन द्वित्वादावपि नैकवचनादिः प्रमाणम्। तद्धिताख्यातकृतोऽप्येतेन व्याख्याताः तत्रापि शक्तिर्वा निरूढ़लक्षणाया एव प्रत्ययत्वसम्पादकत्वात् नहि भक्ष्को दाक्षिः पचतीत्यादौ भक्षणादेर्लक्षणया देशाद्यवगमः कृतादितः कस्यापि स्वार्थिकप्रत्ययमात्रस्य च स्वरूपमर्थस्तेन जुगुप्सते देवमित्यादौ सन् तलादौ नाव्याप्तिः भावविहितानामपि घञादीनामुक्तैव गतिः तत्रापि भावपदस्य धात्वर्थस्वरूपपरत्वात्। अन्यथा पाकं पश्येत्यादौ धात्वर्थस्य पचनादेः कर्मत्वादावन्वयापत्तेः सुवर्थे धात्वर्थस्यान्वयस्याव्युत्पन्नत्वात्. इत्थमेव च

स्तोकः पाक इत्यादिप्रयोगस्य परिशिष्टाद्युक्तस्य प्रामाण्यम् अन्यथा स्तोकादीनां धात्वर्थे विशेषणत्वे नियमतो द्वितीयापत्तेः अतएव सञ्चारो रतिमन्दिरावधि सखीकर्णावधि व्याहृतमित्यादिकं काव्यम् आगमोनिष्फलस्तत्र भुक्तिः स्तोकापि यत्र नो इत्यादिस्मृतिश्च सङ्गच्छत इति नव्याः। स्वोत्तरप्रत्ययार्थसाकाङ्क्षस्यैव धातो रर्थे विशेषणतापन्नस्य बोधने तदर्थकनाम्नो द्वितीयाद्यपेक्षा न तु धातुमात्रस्य तथाच स्तोकः पाक इत्यादिरेव प्रमाणं न तु स्तोकं पाक इत्यादिः अपृथग्रूपक्रियाया विशेषणं कर्मेत्याद्यनुशिष्टेरपि तत्रैव तात्पर्य्यात्। अतएव स्तोकं स्तोयते साधु गतं चकितं द्रष्टव्यमित्यादौ धात्वर्थस्य तिङाद्यर्थकालादिसाकाङ्क्षत्वान्न तद्विशेषणस्य द्वितीयाद्यनुपपत्तिरिति तु शाब्दिकसम्प्रदायः। यत्तु वाक्यपदीये भर्तृहरिणोक्तं यः स्वेतरस्य यस्यार्थे स्वार्थस्यान्वयबोधने। यदपेक्षस्तयोः पूर्वा प्रकृतिः प्रत्ययः परः॥ इति तद्बहुजादावव्याप्तिप्रसङ्गादुपेक्षितम्। यदपि स्वेतरार्थानवच्छिन्नस्वार्थस्यान्वयबोधने। योऽसमर्थः सैष शब्दः प्रत्ययोऽयं चतुर्विधः॥ इत्युमापत्युक्तं तदप्ययुक्तं सुप्तिङोः पदार्थान्तरावच्छिन्नस्वार्थसंख्यादिप्रकारकबोधसमर्थत्वेन तयोस्तव्यादौ चाव्याप्तेः सैष इत्यत्र सस्य पादपूरणे पुनः सन्धिः।

लाघवादन्यथा निर्वक्ति।

इतरार्थानवच्छिन्ने स्वार्थे यो बोधनाक्षमः।
तिङर्थस्य निभादन्यः स वा प्रत्यय उच्यते॥

यः शब्दः शब्दान्तरार्थाविशेषिते यादृशस्वार्थे धर्मिणि तिङर्थस्यान्वयबोधने स्वरूपायोग्यः स वा निभादिशब्देभ्यो भिन्नस्तादृशार्थे प्रत्यय इत्यर्थः। चैत्रोऽस्तीत्यादावर्थाक्षम-

नवच्छिन्ने स्वार्थे नाम्नां तिङर्थान्वयबोधकत्वम्। एवं यजेत स्वोपीतेत्यादौ यजादिधातूनाम् पचतीत्यादौ तिङां पाचकोऽस्तीत्यादौ कृतां काश्यपिरित्यादौ च तद्धितानाम् प्रत्ययार्थावच्छिन्न एव स्वार्थे कृत्यादौ तिङर्थस्य वर्त्तमानत्वादेर्बोधकत्वं न तु तदवच्छिन्न इति न तेषु प्रसङ्गः। निभनिपातादिकस्तु शब्दान्तरार्थानवच्छिन्ने सदृशसमुच्चयादिस्वार्थे तिङर्थस्यान्वयं प्रति स्वरूपायोग्योऽपि निभादिरेवेति न तत्र प्रसङ्गः।

निपातं लक्षयति।

स्वार्थे शब्दान्तरार्थस्य तादात्म्ये नान्वयाक्षमः।
सुबाद्यन्यो निपातोऽसौ विविधश्चादिभेदतः॥

यः शब्दः केवले यादृशस्वार्थे शब्दान्तरार्थस्य तादात्म्येनान्वयबोधं प्रत्यसमर्थः सुबादिप्रत्ययेभ्यः प्रत्येकं भिन्नः स तादृशार्थे निपातः चादयो निपाताः स्वार्थे समुच्चयादौ नामार्थस्याभेदेनान्वयबोधं प्रत्ययोग्याः नहि स्मृतमनुभूतञ्चेत्यादितः कस्यापि स्मृतः समुच्चय इत्यादि रनुभवः किन्तु स्मृतानुभूतयोः समुच्चय इत्यादिरेव। स्तोकं पचतीत्यादौ धातुरपि स्वार्थे नामार्थस्य तादात्म्यं बोधयंस्तत्समर्थ एव प्रत्ययस्तु सुबादिरेव च शब्द इत्यादौ नामार्थस्याभेदसाकाङ्क्षचकारादिः अपरतायान्न निपातः किन्तु नामैव पुरन्दरप्रभृतौ तु नाम्नि निपातव्यपदेशः सूत्रानिष्पाद्यत्वप्रयुक्तो भाक्तः कार्त्तिक्यादौ यत्र दानं तदत्यन्तविनिन्दितमित्यादौ न केवले नञर्थे यदर्थस्य तादात्म्येनान्वयः किन्तु दानाद्यवच्छिन्ने। स्वर्दिवा नक्तमाद्यव्ययमपि नामैव न तु निपातः शोभनं स्वरित्यादौ तदर्थे नामार्थस्य तादात्म्येनान्वयात्। प्रादयस्तूपसर्गा न सार्थकाः सार्थकत्वेन निपाता अपि जातौ सत्ता नास्तीत्यत्र सत्तायां जातिवृत्ति-

त्वस्य समवेतत्वनिरूपितस्वरूपसम्बन्धेनात्यन्ताभावो नञा प्रत्याय्यते न तु सत्त्वस्याभावः प्रथमान्तपदानुपस्थाप्यत्वेन नञर्थे तत्रास्तित्वादिक्रियान्वयस्यायोगात् जातौ जातौ न सत् इत्यत्र जातिद्वयत्वावच्छिन्नाभावस्यैकत्वेन तत्र तिङर्थद्वित्वस्य पर्य्याप्तिवाधेनान्वयासम्भवाच्च। सत्ता समवायेन जातौ नास्तीत्यादौ तु समवेतत्वीयस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकत्वे समवायशब्दस्य लक्षणा परेषामपि सत्ताभावस्य समवायावच्छिन्नत्वासम्भवेन समवायावच्छिन्नप्रतियोगिताकत्वे तल्लक्षणाया आवश्यकत्वात् प्रथमार्थप्रतियोगित्वे समवायावच्छिन्नत्वस्य तत्रान्वय इति तु साहसं प्रथमायाः प्रतियोगितार्थकत्वस्य क्वचिदप्यकल्पनात् विशिष्टसत्ता गुणे नास्तीत्यादिकस्तु प्रयोगो यदि प्रमाणं तदाधेयत्वस्याव्याप्यवृत्तित्वेन द्रव्यवृत्तित्वावच्छेदेन तस्यां गुणवृत्तित्वाभावसत्त्वात् विशिष्टस्यातिरिक्तत्वादित्यपि कश्चित्। न क्रोधोन च मात्सर्य्यं न लोभो नाशुभाः मतिः। भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तम इत्यादावनेकनञामानर्थक्यप्रसङ्गस्तु न तं विरिञ्चिर्न भवो न श्रीर्नापि धनाधिपः। दातुमर्हन्ति विभवं विष्णोराराधनेन य इत्यादाविव प्रकारान्तरवादिनामपि समानः समानसमाधानश्च। पदात् परस्य युष्मदादेस्ते प्रभृत्यादेशविधौ च पदशब्दः साकाङ्क्षनिपातस्याप्युपलक्षकस्तेन न ते धनं धर्म्यमित्यादौ न तस्यानुपपत्तिः सदृशाद्यर्थे निभादेर्निपातत्वव्युदासस्तु प्रागुक्तदिशावसेयः। स चायं निपातश्च तु नञ पुनरिवैवमाङादिभेदाद्बहुविधः।

ननु यदि प्रकृतिः प्रत्ययो निपातो वा स्वार्थोपस्थितिद्वारान्वयबोधं कुर्य्यात् प्रत्येकमात्रं निराकाङ्क्षशब्दसहकृतं वा किन्न कुर्य्यात् मिलितानामेव तेषां तथात्वन्तु सर्वत्रासम्भव इत्यत आह।

आकाङ्क्षभावसत्वात्तस्य सार्थकस्यावबोधतः।
सम्पद्यते शाब्दबोधो न तन्मात्रस्य बोधतः॥

सार्थकस्य प्रकृत्यादेर्वाक्यतामापन्नस्यैव स्वार्थोपस्थितिद्वारा-न्वयबोधकत्वं न तु प्रत्येकस्य निराकाङ्क्षसहितस्य वा।

वाक्यं यदि शब्दसमूहस्तदा मिथोनिराकाङ्क्षस्यापि तस्या-न्वयबोधकत्वापत्तिरतो वाक्यं लक्षयति।

मिथः साकाङ्क्षशब्दस्य व्यूहो वाक्यं चतुर्विधम्।
सुप्तिङन्तचयो नैवमतिव्याप्त्यादिदोषतः॥

यादृशशब्दानां यादृशार्थविषयिताकबोधं प्रत्यनुकूला परस्पराकाङ्क्षा तादृशशब्दस्तोम एव तथाविधार्थं वाक्यम्। तच्च चतुर्विधं चतस्रश्च विधा वक्ष्यन्ते। वह्निना सेक इत्या-द्यपि वाक्यमेव परन्तु बाधितार्थकत्वादयोग्यम्। शाब्दमते-राहार्यत्वोपगमे निर्वह्निर्वह्निमान् पचन्न पचतीत्यादिकमपि वाक्यमेव नो चेदपार्थकमेव यादृशबोधत्वावच्छेदेनाहार्यत्वं तादृशबुद्ध्यर्थं प्रयुक्तपदानामिव तथाविधार्थबोधं प्रत्यपार्थक-त्वात् यत्तु सुप्तिङन्तचयवाक्यमित्यमरसिंहेनोक्तं तन्न युक्तं सुबन्तादेः प्रत्येकसमुदायविकल्पे नातिव्याप्त्यतिव्याप्त्योः प्रस-ङ्गात् न हि घटं पटमित्याकारः पचति गच्छतीत्यानुपूर्वीको वा शब्दसमूहो वाक्यं न वा घटं पचतीत्येतयोः प्रत्येकं न वाक्यं क्रियारहितञ्च वाक्यमस्तीत्यादिकस्तु प्राचां प्रवादो निर्युक्ति-कत्वादश्रद्धेयः।

प्रकृतिं विभजते।

निरुक्ता प्रकृतिर्द्वेधा नामधातुप्रभेदतः।
यत् प्रादिपदिकं प्रोक्तं तन्नाम्नो नातिरिच्यते॥

निरुक्ता न तु सांख्यानामिव जगदुपानभूता यच्च पाणिनि-प्रभृतिभिः प्रातिपादिकं प्रकृतिरित्युक्तं तदपि नाम्नो नातिरि-च्यते नातो विभागन्यूनता।

तत्र प्रथमोद्दिष्टं नाम लक्षयति।

येन स्वीययदर्थस्य मुख्यतः प्रतिपादने।
स्वोत्तरप्रथमापेक्षा तन्नाम स्यात्तदर्थकम्॥

यादृशशब्देन स्वोपस्थाप्ययदर्थमुख्यविशेष्यकान्वयबोधार्थं स्वोत्तरप्रथमाविभक्तिरपेक्ष्यते तादृशः शब्दः एव तदर्थकं नाम। घटादयो हि शब्दाः प्रथमान्तत्वेन निश्चिता एव स्वार्थमुख्यविशेष्यकं बोधमुत्पादयन्ति नत्वन्यथा न हि घट इत्यादित इव घटादित्यादितोऽपि घटादिमुख्यविशेष्यकः सुबर्थसंख्यादेरवगमः। पीतपटेत्यादिकः समासोऽपि स्वोत्तरं प्रथमाप्रतिसन्धानदशायामेव पटादिमुख्यधर्मिताकस्य पीताद्यन्वयबोधस्य जनकः अतएव नापदं प्रयुञ्जीतेति वृद्धाः। पदं विभक्त्यन्तं पीतपटरूपमित्यादावपि नामान्तरवाक्यार्थबोधपूर्वको महावाक्यार्थबोधः पटादिनाम्नः प्रथमान्तत्वाभावेन तदर्थे पीताद्यन्वयधियः पूर्वमसम्भवात् विशिष्टवैशिष्ट्यावगाहितायाः प्रमाणान्तरेण पटधर्मिकपीतनिश्चयादपि तत्र सम्भवात्। नचान्योन्यस्यपरस्परादिनामसव्याप्तिरेभ्यः प्रथमा नाभिधीयते इति वृद्धस्मरणादिति वाच्यं मल्लाभ्यामन्योन्यं हन्यत इत्यादौ मल्लयोः परस्परकर्तृकहननकर्मत्वान्वयानुरोधेन तेषामपि प्रथमान्तत्वादन्यथा सकर्मकस्य हन्तेर्भावाख्यातसाकाङ्क्षत्वानुपपत्तेरकर्मकस्यैव धातोस्तथात्वात्।

निरुक्तं नाम विभजते।

रूढञ्च लक्षकञ्चैव योगरूढञ्च यौगिकम्।
तच्चतुर्धा परैरूढयौगिकं मन्यतेऽधिकम्॥

तन्नाम च त्रयमवधारणार्थं तेन किञ्चिन्नाम क्वचिदर्थे रूढमेव यथा गोप्रभृतौ गवादि गमेर्डो टाभाभ्यां गुर्वेटच्चेत्यादेरौणादिकप्रत्ययस्य शक्तिविरहेण यौगिकत्वविरहात्

किञ्चिल्लक्षकमेव यथा तीरादौ गङ्गादि शाखव्युत्पत्त्या पूर्ववत्तीरे शक्तिग्रहस्याविशिष्टत्वेऽप्याजानिकप्रयोगापत्त्या तदप्रामाण्यकल्पनात् शक्तेः पूर्वपूर्वप्रयोगैर्नियतत्वात् किञ्चिद्योगरूढमेव यथा पङ्कजातपद्मादौ पङ्कजादि किञ्चित् यौगिकमेव यथा पाककर्त्रादौ पाचकादि। रूढयौगिकमप्यधिकं नाम यथा मण्डप मञ्जारजतादि तद्धि कदाचिदवयवशक्त्या योगार्थमेव कदाचिच्च समुदायशक्त्या रूढ्यर्थमेवाभिधत्ते इत्यपरेषाम् मतम्। गौर्वाहीकइत्यादौ तु शक्यार्थसदृशत्वावच्छिन्नबोधकतया गौणं गवादिपदं गोसदृशादौ लक्षकमेव न तु ततो भिद्यते।

रूढं नाम लक्षयति विभजते च।

रूढं सङ्केतवन्नाम सैव संज्ञेति कीर्त्यते।
नैमित्तिकी पारिभाषिक्यौपाधिक्यपि तद्विदा॥

यन्नाम याद्दृशार्थे सङ्केतितमेव न तु यौगिकमपि तद्रूढं योगरूढन्तु पङ्कजादिकं न तथा रूढनामेव च संज्ञापदेनाभिलप्यते न तु रूढादिवत् संज्ञापि नाम्नोऽवान्तरभेदः येन विभागव्याघातः स्यात्। संज्ञायाश्च त्रयो भेदाः नैमित्तिकी पारिभाषिकी औपाधिकी चेति पाचकपाठकादयस्तु न संज्ञाः सङ्केतशून्यत्वादिति वक्ष्यते।

ये तु रूढस्य नाम्नश्चतुर्विधत्वमाहुस्तन्मतमुपन्यस्यति।

जातिद्रव्यगुणस्पन्दैर्धर्मैः सङ्केतवत्तया।
जातिशब्दादिभेदेन चातुर्विध्यं परे जगुः॥

गोगवयादीनां गोत्वादिजात्या पश्वाश्वादीनां शाङ्गलधनादिद्रव्येण धव्यविशुनादीनां पुण्यदुग्धादिगुणेन चलचपलादीनाञ्च शब्दानां कर्मणावच्छिन्नशक्तिमत्त्वाच्चातुर्विध्यमेव रूढानामिति। यदुक्तं दण्डाचार्य्यैः शब्दैरेव प्रतीयन्ते जाति-

द्रव्यगुणक्रियाः। चातुर्विध्यादसौ शब्द उक्तश्चतुर्विध इति मतेतज्जडमूकमूर्खादीनामन्यशून्यादीनाञ्च शब्दानामपरिग्रहापत्त्या परित्यक्तमस्माभिः।

नैमित्तिकसंज्ञां लक्षयति।

जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मता।
जातिमात्रे हि सङ्केताद्व्यक्तेर्भानं सुदुष्करम्॥

यन्नाम जात्यवच्छिन्नसङ्केतवत् सा नैमित्तिकी संज्ञा यथा गो चैत्रादिः सा हि गोत्वचैत्रत्वादिजात्यवच्छिन्नमेव गवादिकमभिधत्ते न तु गोत्वादिजातिमात्रं गोपदं गोत्वे सङ्केतितमित्याकारकग्रहाद्गामानयेत्यादौ गोत्वादिना गवादेरन्वयानुपपत्तेः एकशक्तत्वग्रहस्यान्यानुभावकत्वेऽतिप्रसङ्गात्। ननु गामानयेत्यादौ गोत्वादिकर्मताकत्वेनैवानयनादेरन्वयधीर्गोत्वादिशक्तत्वेन पदज्ञानस्य गोत्वाद्यन्वयबुद्धिं प्रत्येव हेतुत्वात् सुवर्थकर्मत्वादौ स्वाश्रयवृत्तित्वसम्बन्धेनैव प्रकृत्यर्थस्य गोत्वादेः साकाङ्क्षत्वात् गवादिकर्मताकत्वेन बोधस्तूत्तरकालमाक्षेपात् कर्मत्वं गोवृत्तिगोत्वनिष्ठकर्मतात्वादानयनं गोवृत्तिकर्मताकं गोत्ववृत्तिकर्मताकत्वादित्याद्यनुमानसाम्राज्यात्। न च वस्तुगत्या यद्गोत्वशक्तत्वं तज्ज्ञानस्य हेतुत्वे गोपदं जातिशक्तमित्येवं ग्रहादपि शुद्धगोत्वस्यान्वयबोधापत्तिः गोत्वत्वावच्छिन्नशक्तत्वप्रकारज्ञानत्वेन तथात्वे च लाघवाद्गोत्वावच्छिन्नशक्तताप्रकारकज्ञानत्वेनैव हेतुत्वं गोत्वत्वाद्यप्रवेशादितिवाच्यं गोपदं गोत्वशक्तमित्याकारज्ञानत्वेन हेतुतायां शुद्धस्यैव गोत्वस्य विषयितासम्बन्धेन शक्तांशे विशेषणत्वेन गोत्वत्वादिप्रवेशगौरवस्यायोगात्। न हि समवायान्यसम्बन्धेन जातेः प्रकारतायां धर्मावच्छिन्नत्वनियमो मानाभावात् अयं गौरित्यादिव्यवसायोत्तरमिमं गोत्वेन जानामीत्याकारे तस्य ज्ञात-

तालिङ्गकानुमानेऽनुव्यवसाये वा व्यभिचाराच्च प्रागनुपस्थित्या गोत्वत्वादेस्तत्रोपनयायोगात्। एतेन जातेर्निरवच्छिन्नप्रकारत्वस्य समवाय संसर्गावच्छिन्नत्वनियमात् केवलस्य गोत्वादेः शक्त्यंशे विषयतया सुबर्थकर्मत्वांशे च परम्परया प्रकारत्वायोग इत्यपि प्रत्युक्तम् उक्तस्थल एव व्यभिचारात्। न चैवं कालोगौः पदं गौरित्यादिप्रत्ययोऽपि प्रमा स्यात् कालिकादिसम्बन्धेन गोत्वादिमति तत्प्रकारकत्वादिति वाच्यं कालिकादिसम्बन्धेन गोत्वादेः प्रामाण्यस्य गोत्वत्वाद्यवच्छिन्नप्रकारतागर्भत्वेन तादृशमतेः प्रमात्वयोगात् अन्यथा घटत्वादिजातेः संस्थानसमवेतत्वमते संयोगो घट इत्यादिप्रतीतेः समवायेन प्रमात्वस्य दुर्वारतापत्तेः शाब्दस्येव प्रत्यक्षस्यापि कालोगौरित्यादिबोधस्य नियमतो गवाद्यभेदावगाहित्वेनैवाप्रमात्वसम्भवाच्चेति भट्टमतानुवर्त्तिनः। तन्मन्दं विनाप्याक्षेपं गामानयेत्यादितो गवादिकर्मताकत्वेनानयनादेरन्वयबोधस्यानुभविकत्वात् गौर्गच्छतीत्यादौ शुद्धगोत्वे गतिमत्त्वाद्यन्वयस्यानुभवेनासमर्थनात् गोत्वत्वाद्यनुपस्थित्या च गोत्वं गच्छतीत्याद्यनुभवस्यासम्भवात् स्वाश्रयवृत्तित्वसम्बन्धेन गतिमत्त्वादिहेतुना गवादौ साक्षात्सम्बन्धेन गतिमत्त्वाद्याक्षेपस्य व्यभिचारादिदोषेण दुःशकत्वाच्च। एतेन कर्मत्वादौ गोत्वादेः स्वाश्रयवृत्तित्वसम्बन्धेनान्वयबोधोत्तरं कर्मत्वस्य गोत्ववृत्तित्वं गोवृत्तित्वं विनानुपपन्नमित्यनुपपत्तिधीसहकृतेन गामित्यादिवाक्येनैव कर्मत्वं गवीयमित्यौपादानिकोगवादिव्यक्तिबोध इति प्रभाकरमतमप्यनादेयं मिथोविरुद्धाभ्यां शाब्दत्वार्थापत्तित्वाभ्यामवच्छिन्नबोधस्यालीकत्वेन शब्दानुपपत्तिभ्यां सम्भूय तथाविधौपादानिकबोधस्य जननायोगाच्च। यत्तु गौर्ज्ञायते गौर्नश्यति सर्वत्र गोत्वादिजातिशक्तेनैव गवादिपदेन लक्षणया गोत्वादि-

विशिष्टा व्यक्तिर्बोध्यते व्यक्तीनां बहुत्वेनानन्त्यत्वेन च तत्र शक्तिकल्पनात् तात्पर्य्यानुपपत्तेरपि लक्षणाया बीजत्वात् यदाहुर्मण्डनाचार्य्याः जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति। नित्यत्वाल्लक्षणीयाया व्यक्तेस्ते हि विशेषणे इति तदपि तुच्छं व्यक्तिविनाशतायां गोत्वादिजातौ गवादिपदस्य मुख्यप्रयोगाभावेन तच्छक्तस्याशक्यत्वे तद्वति गवादौ लक्षणाया वक्तुमशक्यत्वात् शक्यसम्बन्धस्यैव लक्षणात्वात्। न च गोरन्यो महिष इत्यादौ पञ्चम्यर्थेऽवधित्वे प्रतियोगित्वे वा स्वावच्छेद्यत्वसम्बन्धेन मुख्यस्य गोत्वादेरन्वयात्तथाविधस्थल एव जातौ मुख्यप्रयोगः तत्र पञ्चम्याः स्वार्थेऽवधित्वादौ स्वनिष्ठगोत्वावच्छेद्यत्वसंसर्गेण प्रकृत्यर्थस्य गवादेरन्वयबोधकत्वात् अन्यथा गोगोत्वयोर्भिन्नशक्तिभ्यां गोपदेन बोधने वृत्तिद्वययोगपद्यापत्तेः वस्तुतः मुख्यस्य गोत्वादेः शाब्दधीप्रकारतायाः समवायावच्छिन्नत्वनियमात्तस्यावधित्वादौ स्वावच्छेद्यत्वादिसम्बन्धेनामान्वयोद्घटं एव द्रव्यं घट इत्यादिप्रतीतेः समवायेन प्रमात्वानुरोधाद्घटत्वजातेर्नानात्वोपगमादिति।

प्राभाकरास्तु गोत्वशक्तत्वेन ज्ञातं पदं तादृप्येण गोशाब्दत्वावच्छिन्नं प्रत्येव हेतुरतो गोत्वशक्तिग्रहान्न गोत्वेन गवयादेः न वा द्रव्यत्वादिना गोरन्वयधियोऽतिप्रसङ्गः। न चैवं जातेरिव व्यक्तेरपि शक्यत्वमावश्यकं न हि गवादिपदस्य शक्यत्वं जन्यत्वमपि तु जन्यशाब्दधीविषयत्वं तच्च गोत्वस्येव गोरप्यविशिष्टमिति वाच्यं गवादिपदधर्मिकशक्तताज्ञानत्वावच्छिन्नशाब्दधीजनकतायच्छेदकत्वेन गोत्वादेरेव गवादिपदशक्यत्वात् गोत्वशक्ततापेक्षया गोशक्तत्वस्य गुरुतया तज्ज्ञानत्वस्य गोशाब्दं प्रति जनकतानवच्छेदकत्वात्। अतएवान्वयबुद्धेरासत्त्यात्त्वाद्यवगाहित्वेऽपि न तेषां पदशक्यत्वम् अस्तु वा गोत्वादि-

शक्तत्वेन ज्ञातं पदं गोत्वादिशब्दत्वावच्छिन्नं प्रत्येव हेतु-विशेष्यतया तादृशशब्दं प्रति समवायेन गोत्वस्य नियाम-कत्वकल्पनाच्च नातिप्रसङ्गः गोत्वादिना गवादेरिव गवादेर्गो-त्वादिनान्वयबोधत्वावच्छिन्नं प्रत्यपि विनिगमकाभावेन गोत्वादि-शक्तिज्ञानत्वेन हेतुत्वमपेक्ष्य गोत्वशाब्दत्वावच्छिन्नं प्रत्येव गोत्वस्य तच्छक्तत्वज्ञानस्य च द्वयोः कारणतायामेव लाघवात् वस्तुतो गोत्वशाब्दं प्रति गोत्वशक्तिज्ञानमेव हेतुर्न तु गोत्वमपि जातिव्यक्त्योस्तुल्यवित्तिवेद्यत्वनियमादेव गोव्यक्तीनां तद्विषयत्व-सिद्धेः प्रमाणविरहादेव गोत्वादिना गवयादिविषयत्वस्य तत्रा-सिद्धेश्च। यद्यपि जातेर्विषयत्वं तत्समवायिव्यक्तिविषयता-निरूपितमिति न व्याप्तिर्गोत्वाद्यालोचने काले गोत्ववानि-त्यादिबोधे च व्यभिचारात् नापि जातेर्निरवच्छिन्नप्रकारताया-स्तथात्वनियमः गौरयमित्यादिज्ञानस्य प्रत्यक्षे गोत्वेनेमं जाना-मीत्याकारे तथात्वात्तथाप्यन्वयबोधस्य निरवच्छिन्नगोत्वादि-प्रकारत्वं गवादिविशेष्यतानिरूपितमेवेति व्याप्तिस्तादृश-विशेष्यताकत्वं विना शुद्धस्य गोत्वादेरन्वयबोधेनास्पर्शनात् गुरूणां गोत्वेन गवयादिबोधस्यालीकत्वात्। अतएव गवाद्यंशे गोत्वादिप्रकारको बोधः समवायेनैव सम्बन्धान्तरेणापि तत्-प्रकारकः स्याद्गोत्वशक्तिज्ञानस्य तदीयसम्बन्धभानं प्रत्युदासीन-त्वादित्यपि प्रत्युक्तं शाब्दमतेः शुद्धगोत्वप्रकारतायां गोविशेष्य-ताकत्वस्येव समवायावच्छिन्नत्वस्यापि व्याप्तिबलेन सिद्धावपि सम्बन्धान्तरावच्छिन्नत्वस्य प्रमाणविरहेणासिद्धेः। एवञ्च गोत्वादिशक्तिज्ञानत्वेन जनकतायां विषयतयावच्छेदकत्वा-द्गोत्वादिरेव गवादिपदस्यार्थः गवादौ तद्व्यवहारस्तु तादृशाव-च्छेदकधर्मवत्त्वप्रयुक्तो गौणः। नचैवं गम्यादिधातोरपि गत्यादौ शक्तिर्न स्याद्गतित्वादिशक्तिज्ञानादेव तादृप्येण

गत्यादेर्गम्यादिधातुतो बोधसम्भवादिति वाच्यं गुरूणां गतित्वादेः संस्थानाव्यङ्ग्यत्वेन जातित्वासम्भवात् उत्तरसंयोगाद्यवच्छिन्नक्रियात्वाद्युपाधिरूपे च तत्र स्वरूपतः शक्तिग्रहायोगात् सखण्डस्य निरवच्छिन्नप्रकारत्वाभावात् निरुक्तक्रियात्वत्वावच्छिन्नशक्तताज्ञानत्वेन हेतुतामपेक्ष्य लघुतया तादृशक्रियात्वावच्छिन्नशक्तिमत्त्वज्ञानत्वेनैव तथात्वौचित्यात् गुरुत्वादिप्रयोज्यस्य पतनत्वादेरखण्डत्वे पत्यादिधातूनां तत्र शक्तत्वेऽपि क्षत्यभावाच्च पश्वादिपदानामपि लोमवल्लाङ्गूलादिपर्य्यवसिते पशुत्वादिमात्रे न शक्तिस्तत्र स्तत्र व्युत्पत्तिग्रहोत्तरं तन्मात्रस्यैवानुभवेन तदाश्रयस्यालाभात् लोमादीनां स्वाश्रयतुल्यवित्तिवेद्यत्वस्य लोमवल्लाङ्गूलवान् देश इत्याद्यनुभवे व्यभिचारादिति प्राहुः। तत्र ब्रूमः शाब्दमतेर्गवादिव्यक्त्यवगाहित्वमवश्यक्लृप्तकारणप्रयोज्यं जन्यधीविषयतायास्तत्प्रयोज्यत्वनियमादन्यथा पक्षधर्मिकसाध्यावगाहितादेरपि परामर्शादिप्रयोज्यता न स्यादनुमत्यादि सामान्यं प्रत्येव ज्ञानत्वादिना हेतुत्वस्य लाघवेनौचित्यात् पक्षतादि सहकृतपरामर्शाद्युत्तरज्ञानस्य तत्प्रकाशस्यैव वा पक्षे साध्यावगाहित्वनियमादेवानुमित्यादेः प्रतिनियतपक्षाद्यवगाहित्वसिद्धेः। किञ्च गोत्वशक्तत्वं न गोत्वसमयत्वं यस्य धीरन्वयधीहेतुरप्रसिद्धत्वात् नापि तद्गोचरमभिधानामकं पदार्थान्तरं तत्र मानाभावात् न वा गोत्वानुभवजनकत्वं पटादिपदस्यापि गोत्वशक्तत्वापत्तेस्तस्यापि गवादिपदाकाङ्क्षादिसान्निध्येन गोत्वानुभवजनकत्वात् न च गोत्वानुभवसामान्यं प्रति हेतुत्वं तथा गवादिपदेऽप्यसत्त्वात् नापि गोत्वानुभवजनकत्व प्रकारकनित्यसङ्केतवत्त्वं तादृशसङ्केतवत्त्वमात्रं वा गोत्वशक्तत्वमिति साम्प्रतं गोपदं गोत्वेन गवानुभवस्य जनकतया न सङ्केतितमित्यादिभ्रमेऽपि तस्य शब्दाद्गोत्वेन

गोरन्वयबोधप्रसङ्गात् किन्तु गोत्वेन गवानुभवस्य जनकतया सङ्केतितत्व तथा तथा च पदधर्मिक तज्ज्ञानत्वेन गोत्वप्रकारकशाब्दं प्रति हेतुतायां गोत्वस्यैव तद्विशिष्टस्य गोरपि विषयविधयावच्छेदकत्वादवश्यं गोत्वादिविशिष्टा गवादिर्गवादिपदस्यार्थः ।

स्यादेतत् नियतस्यैव सङ्केतस्य कुतः प्रथमतो ग्रहः गोपमानाच्च कोषाच्च विवरणाच्च प्रसिद्धार्थशब्दसामानाधिकरण्याच्चापि वाक्यशेषादमीषां शक्तिग्रहमूलकत्वेन पूर्वं पृथुकस्य कस्यापि तदसत्वादत आह ।

सङ्केतस्य ग्रहः पूर्वं वृद्धस्य व्यवहारतः ।
पश्चादेवोपमानाद्यैः शक्तिधीपूर्वकैरसौ ॥

प्रथमं पदेषु सङ्केतग्रहो वृद्धस्य व्युत्पन्नस्य शब्दाधीनव्यवहारादेव बालानां तथा हि गामानयेति केनचिन्निपुणेन नियुक्तः कश्चन व्युत्पन्नस्तद्वाक्यतोऽर्थं प्रतीत्य गवानयनं करोति तच्चोपलभमानो बालः इदं गवानयनं स्वगोचरप्रवृत्तिजन्यं चेष्टात्वात्मदीयस्तनपानादिवदित्यनुमाय सा गवानयनप्रवृत्तिः स्वविषयधर्मिककार्य्यताज्ञानजन्या प्रवृत्तित्वं निजप्रवृत्तिवदिति प्रवृत्तेर्गवानयनधर्मिककार्य्यताज्ञानजन्यत्वं प्रसाध्य गवानयनगोचरतज्ज्ञानसाधारणहेतुकं कार्य्यत्वाद्घटवदित्येव मनुमिन्वानः समुपस्थितत्वाद्बाधाभावाच्च श्रुतं वृद्धवाक्यमेव तदसाधारणकारणत्वेनावधारयति तदनन्तरञ्च गवादिपदानां प्रत्येकमावापोद्वापेन गवादिबुद्धौ जनकत्वमवगत्यानतिप्रसक्तये गवादिसङ्केतस्य तदनुकूलत्वं कल्पयति । पश्चात्तु क्वचिदुपमानाच्छक्तिग्रहो यथा गवादिपदशक्तिधीसाचिव्येन गोसादृश्यातिदेशवाक्यात् गवयपदवाच्यत्वबोधोत्तरं गवयत्वजात्यवच्छिन्ने गोसादृश्यग्रहात् गवयो गवयपदवाच्य इत्याकारः क्वचिच्च व्याकरणात्

यथा कर्मणि द्वितीया कर्त्तरि परस्मैपदमित्याद्यनुशासनात् कर्मत्वादौ द्वितीयादेः क्वचित् कोषादपि यथा गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति। शीतं गुणे तद्वदर्थाः सुषीमः शिशिरो जड़ः। चूर्णे क्षोदः समुत्पिञ्जपिञ्जलौ भृशमाकुले इत्यादि कोषेभ्यः श्वैत्यादौ शुक्लादिशब्दस्य। क्वचिद्विवरणादपि यथा पचति पाकं करोतीति तत्समानार्थकवाक्यात् कृत्यादौ तिङादेः। क्वचित् प्रसिद्धार्थशब्दसामानाधिकरण्यादपि यथा नीरूपस्पर्शवान् वायुर्निःस्वश मूर्त्तिमन्मन इत्यादौ रूपशून्यस्पर्शवदादिषु वायुादिपदस्य वायुत्वादिजातेरतीन्द्रियत्वेन स्वरूपतस्तदवच्छिन्नस्यानुपस्थित्या तत्र शक्तिग्रहायोगात् यथा वा सत्कृत्यालङ्कृतां कन्यां ददानः कुकुदः स्मृत इत्यादावुक्तरीत्या कन्यादात्रादिषु कुकुदादिपदस्य। सहकारतरौ मधुरं रौति पिक इत्यादिकन्तु न युक्तमुक्तक्रमेण शक्तिग्रहस्योदाहरणं तिङर्थे धर्मिण्यभेदेन नामार्थान्वयस्याव्युत्पन्नत्वात् प्रत्यक्षमिह कोकिलत्वजात्यवच्छिन्न एव लाघवेन पिकशब्दस्य शक्त्यवच्छेदाच्च। क्वचिद्वाक्यशेषादपि यथा यवपदस्य कङ्गुप्रभृतौ म्लेच्छानां दीर्घशूके च शिष्टानां व्यवहारादेकमात्रशक्तेः परिच्छेत्तुमशक्यत्वात् नानार्थत्वस्य चान्याय्यत्वात् यवमयश्चरुर्भवतीतिश्रुतौ यवपदस्यार्थसन्देहे वसन्ते सर्वशस्यानां जायते पत्रशातनम्। मोदमानास्तु तिष्ठन्ति यवाः कणिशशालिन इति विध्यर्थाकाङ्क्षया प्रवर्त्तमानाद्वाक्यशेषाद्दीर्घशूक एव यवपदस्य शक्तिग्रहः। यथावा स्वर्गकामोऽग्निष्टोमेन यजेतेत्यादिविधिशेषीभूतेभ्यः यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदमित्यादिवाक्येभ्यः स्वरादिपदस्य।

ननु व्यवहारादनुमितेर्गवाद्यानयनधर्मिककार्य्यतान्वयमात्रे

पदानां प्रथमतः कारणत्वं साकाङ्क्षपदत्वावच्छेदेनैव गृहीतमुपस्थितत्वादतस्तदुपपत्तये शाब्दसामान्यं प्रत्यवश्यं कार्य्यतावाचिपदस्य तत्साकाङ्क्षपदस्य वा हेतुत्वमुपेतव्यं तथाच कथं केवलकोषादितः शक्तिग्रहस्तस्य विध्यनाकाङ्क्षत्वेनार्थवादतया शाब्दबोधाजनकत्वादिति प्राभाकराशङ्कां निरस्यति।

कार्य्यत्वस्यान्वयज्ञाने प्रागगृहीतापि हेतुता।
पदानामर्थवादेभ्यः पश्चाद्बोधादुपेक्ष्यते॥

साकाङ्क्षपदत्वावच्छेदेन कार्य्यताधीजनकत्वं पूर्व्वंगृहीतमप्युत्तरकालमर्थवादेभ्यः शाब्दबोधानुरोधादुपेक्ष्यते पूर्व्वंगृहीतस्य अपरिहार्य्यत्वानियमात् प्रतिबिम्बिते वस्तुनि व्यभिचारात् नवोपस्थितधर्मावच्छेदेनैव जनकत्वस्य ग्रहनियमः पटजनकं देयद्रव्यमित्यादौ तत्सामानाधिकरण्येनापि ग्रहात् अन्यथान्यथाख्यात्यापत्तेस्तत्रैव दुर्व्वारतापत्तेः। न च कार्य्यतासाकाङ्क्षपदान्तर्भावेणैव शब्दानामन्वयानुभवहेतुत्वस्य क्लृप्तत्वादर्थवादस्थले न शाब्दधीः परन्त्वसंसर्गाग्रहमात्रमाकाङ्क्षान्तरकल्पने गौरवातिदिशाच्यं कार्य्यतानिराकाङ्क्षपदान्तर्भावेणैव शाब्दधीहेतुत्वस्य कल्पनया विधिस्थले न शाब्दधीरित्यस्यापि सुवचत्वात् उभयत्राप्यन्वयमतेरानुभविकत्वेनैकशेषस्य दुष्करत्वादिति दिक्।

पारिभाषिकीमौपाधिकीञ्च संज्ञां क्रमेण लक्षयति।

उभयावृत्तिधर्मेण संज्ञा स्यात् परिभाषिकी।
औपाधिकी त्वनुगतोपाधिना या प्रवर्त्तते॥

उभयावृत्तिधर्मावच्छिन्नसङ्केतवती संज्ञा पारिभाषिकी यथाकाश डित्यादिः साहि हितयावृत्तिनैव शब्दादिना रूपेण तदाश्रयमभिधत्ते नचाकाशादिपदस्य गगनादौ निरवच्छिन्नैव शक्तिः पटादिपदस्यापि पटादौ तादृशशक्त्यापत्तेः पटे शक्तमपि

घटपदं न पटत्वावच्छिन्नशक्तिमदित्यादिशब्दोत्तरं ततः पटत्वविशिष्टस्यानुभवादवश्यं तच्छक्तिरवच्छिन्नेति चेत् शब्दवत्ति शक्तमप्याकाशपदं न शब्दवत्त्वावच्छिन्नशक्तिमदित्येवं शब्दशायामाकाशादिपदान्न शब्दवत्त्वेन गगनस्य प्रतीतिरतस्तस्यापि शब्दवत्त्वावच्छिन्नैव तत्र शक्तिरिति विभाव्यताम्। एतेन पटत्वाद्युपलक्षिते धर्मिण्येव शक्तिग्रहस्य तादृप्येण पटाद्यनुभवं प्रति हेतुत्वान्मास्तु पटादिपदस्यापि पटत्वाद्यवच्छिन्ने शक्तिः परन्तु पटत्वाद्युपलक्षितव्यक्तिष्वेवेति शिरोमण्युक्तमपि प्रत्युक्तं शब्दोपलक्षिते धर्मिणि शक्तिग्रहादेवाकाशादिपदात्तदंशे निर्विकल्पकात्मकस्मरणमन्वयानुभवश्चोत्पद्यत इति तु नानुभविकं न वा यौक्तिकम्। या चानुगतोपाध्यवच्छिन्नसङ्केतवती संज्ञा सा त्वौपाधिको यथा भूतदूतादिः सा हि सचेतनावृत्तिविशेषगुणवत्त्ववार्त्ताहारकत्वाद्यनुगतोपाधिपुरस्कारेणैव प्रवर्त्तते शब्दादिस्तु सखण्डत्वेनोपाधिरपि नानुगतो हितयावृत्तित्वादतः पारिभाषिके गगनादिपदे नातिप्रसङ्गः। घटत्वादेः संस्थानवृत्तित्वमते यदि घटादिपदं विलक्षणसंस्थानवत्त्वेन शक्तं तदौपाधिकमेव यदि च परम्परया वैलक्षण्यवत्त्वेन तदा नैमित्तिकमेव वस्तुतः सामान्यस्य शाब्दबुद्धौ स्वरूपतः प्रकारत्वं समवायेनैवेत्यभिहितं प्रागिति।

ये तु जात्यवच्छिन्नसङ्केतवतामपि चैत्रादिपदानां पारिभाषिकत्वमाहुस्तेषां मते त्रैविध्यमन्यथा निर्वक्ति।

> यन्नाधुनिकसङ्केतशालित्वात् पारिभाषिकम्।
> जात्या नैमित्तिकं शक्तमौपाधिकमुपाधिना॥

यत्रार्थे यन्नामाधुनिकसङ्केतवत्तदेव तत्र पारिभाषिकं यथा पित्रादिभिः पुत्रादौ सङ्केतितं चैत्रादि यथावा शास्त्रकृद्भिः सिद्धाभावादौ पक्षतादि। जात्यवच्छिन्नशक्तिमन्नाम नैमित्तिकं

यथा गोगवयादि। यदुपाध्यवच्छिन्नशक्तिमन्नाम तदौपाधिकं यथाकाशपश्चादि। आधुनिकस्तु सङ्केतो न शक्तिर्नित्यस्यैव तस्य तथात्वात्। तदुक्तं भर्तृहरिणा। आजानिकश्चाधुनिकः सङ्केतो द्विविधो मतः। नित्य आजानिकस्तत्र या शक्तिरिति गीयते। कादाचित्कस्त्वाधुनिकः शास्त्रकारादिभिः कृत इति। न च पित्रादिना सङ्केतिते चैत्रादिपदे नित्यसङ्केतवत्त्वे मानमस्ति द्वादशेऽहनि पिता नाम कुर्य्यादिति श्रुतेः पितृकर्त्तव्यसङ्केतविधायकमात्रत्वात्. चैत्रादिपदस्य शक्तिमत्त्वे पूर्वपूर्वप्रयुक्तत्वापाताच्च तस्य तन्नियतत्वादित्युक्तत्वात् चैत्रादिपदानामिव पारसीकादिशब्दानां सङ्केतवत्त्वाविशेषेऽपि न तेषां धर्मकर्मण्युपयोगः साधुर्भाषितव्यं नापभ्रंशित वै न म्लेच्छितवै इति श्रुत्वा तत्र तन्निषेधात् म्लेच्छितवै म्लेच्छमात्रसङ्केतितैः। खरादिशब्दास्तु रासभादौ म्लेच्छैरिवार्य्यैरपि सङ्केतिताः। ननु गवादिपदं गोत्वादिनेव संस्थानप्रभेदेनापि विशिष्ट एव गवादौ शक्तमिति तत्रापि तदौपाधिकं स्यात् न स्याच्छक्यत्वाविशेषेऽपि गोत्वाद्यपेक्षया गुरुत्वेन संस्थानस्य गवादिपदशक्यतानवच्छेदकत्वात्। न च संस्थानमशक्यमेव गवादिपदस्येति देशनीयं गवादिपदाद्गोत्वादिजात्या इव सास्नादिलक्षणविलक्षणाकृत्यापि नियमतो गवादेरनुभवेन तस्यापि तच्छक्यत्वात्। तथाच न्यायसूत्रं जात्याकृतिव्यक्तयस्तु पदार्थ इति पदार्थो गवादिपदस्यार्थः त्रिष्वेकशक्तेर्लाभार्थमेकवचनम् अन्यथा विभिन्नशक्तौ विशकलितानामिव तासामनुभवस्य गौर्नित्या गुणो वेत्यादौ लक्षणाद्यभावस्य च प्रसङ्गादिति साम्प्रदायिकाः। नव्यास्तु जातिव्यक्त्योरेवैकशक्तिप्राप्त्यर्थं सौत्रमेकवचनं आकृतिरूपन्तु संस्थानं पृथगेव शक्यं शक्यस्यैकपदोपस्थाप्ययोरप्याकृतिव्यक्त्योर्भेदान्वयबोधनं गवादिशब्देन व्युत्प-

त्तिवैचित्र्यात् अतएव संस्थानानुपस्थितौ केवलगोत्वप्रकारेण व्यक्तेरवगमः शक्त्यैव सम्पद्यते। यद्येवं संस्थानव्यक्त्योरैकैक-शक्तिर्गोत्वादिजातावेव शक्त्यन्तरं तद्वैशिष्ट्यन्तु पदार्थविधया युष्माकमिवास्माकं वाक्यार्थ इत्येव किं न स्यात् न स्यात् समवायेन गोत्वादिमदपेक्षया परम्परया संस्थानवतः परमगुरु-त्वेनाशक्यत्वात् शक्यतायाः किञ्चिद्धर्मावच्छिन्नत्वनियमात् शुद्धगोत्वादौ तदयोगाच्चेत्याहुः। मिथो वैशिष्ट्यविधुराभ्यां चन्द्रत्वसूर्यत्वाभ्यामवच्छिन्नैकशक्तिमतः पुष्पवन्तपदस्येव गोत्व-संस्थानप्रभेदाभ्यामवच्छिन्नैकशक्तिमतो गवादिपदस्यापि जात्य-वच्छिन्नशक्तिमत्तया नैमित्तिकसंज्ञात्वेऽपि नौपाधिकसंज्ञात्वं सखण्डोपाधिमात्रावच्छिन्नशक्तिमत एव नाम्नस्तथात्वादिति वस्तुगतिः। सौत्रमाकृतिपदं न संस्थानपरं परन्तु करण-व्युत्पत्त्याकारनिरूपकार्थकं जातिव्यक्त्योः संसर्गपरमेव अन्यथा समवायादेरपि सम्बन्धविधया गवादिपदशक्यत्वेन तदनुक्त्या मुनेर्न्यूनतापत्तेः। क्वाचित्कस्तु जातिसंस्थानाभ्यां गवादेरवगमो गवादिपदस्य जात्याकृतिविशिष्टे शक्ति-भ्रमेण लक्षणया वा सम्पाद्य इति पुनर्न्यायरहस्ये अस्मद्गुरु-चरणाः।

लक्षकं नाम लक्षयति।

> यादृशार्थस्य सम्बन्धवति शक्तान्तु यद्भवेत्।
> तत्र तल्लक्षकं नाम तच्छक्तिविधुरं यदि॥

यादृशार्थसम्बन्धवति यन्नाम सङ्केतितं तदेव तादृशार्थे लक्षकं यदि तादृशार्थे शक्तिशून्यं भवेत् सैन्धवादयस्तु शब्दास्तु-रगादिसम्बन्धिनि लवणादाविव तुरगादावपि शक्ता एव गङ्गादयस्तु तीरादावसङ्केतिताः तत्सम्बन्धिनीरादिशक्तत्वेन गृहीता एव तीराद्यन्वयं बोधयन्तीति तत्र लक्षका एव शक्तत्वे

पूर्वंपूर्वंप्रयुक्तत्वापत्तेः तस्य तद्व्याप्यत्वात् कथञ्चित्तीरादिसम्बन्धित्वेन गृहीतादपि गङ्गादिपदात्तीरादेरन्वयाबोधेन तीराद्यशक्तत्वे सति तत्सम्बन्धितामात्रन्तु न लक्षणा गङ्गागङ्गायां घोष इत्यादावपि गङ्गागङ्गेतिभागस्य निरूढलक्षणायाः सत्त्वेन वैयर्थ्याभावप्रसङ्गाच्च । एतेन तीराद्यशक्तत्वे सति तीरादिपरत्वं तीरादिसम्बन्ध्यनुभावकत्वं वा तल्लक्षकत्वमित्यपि प्रत्युक्तम् अपभ्रंशस्यापि लक्षकत्वापाताच्च नचेष्टापत्तिः शक्तिलक्षणान्यतरवृत्तिमत्त्वे तस्य साधुतापत्तेः पदसाधुतायां वृत्तिमत्त्वस्यैव तन्त्रत्वात् । किञ्चानुभावकत्वं यद्यनुभवस्योपधायकत्वं तदा घोषादिपदसाकाङ्क्षस्य गङ्गादिपदस्य तीरलक्षकता न स्यात् तेन तीरसम्बन्धिनो नीरस्यानुभवानर्जनात् स्वरूपयोग्यत्वन्तु गङ्गायामिति वाक्यस्य दुर्वारं तस्याप्याधेयताधर्मिकनीरानुभवं प्रति नीरार्थकनामोत्तरसप्तमीत्वेन तथात्वात् नीराधेयत्वस्य च तीरसम्बन्धित्वानपायात् । ननु वाक्यमपि लक्षकं भवत्येव कथमन्यथा चित्रगुसमुदायस्य लक्षणया चित्रगोस्वामिनां बोधः कथं वा गभीरायां नद्यां घोष इत्यादौ गभीरनदीतीरस्य न हि तत्र नदीपदं तीरलक्षकं गभीरायामित्यस्यान्वयापत्तेः नहि तीरं गभीरं नापि गभीरापदं तथा नद्यामित्यस्यायोग्यतापत्तेः न हि तीरं नदी तस्माद्वाक्यमेव तत्र गभीरनदीतीरलक्षकमिति मीमांसकाः तन्न गभीरायां नद्यामिति विभक्त्यन्तभागस्य तादृक्तीरलक्षकत्वे घोषादावाधेयत्वेन तदन्वयानुपपत्तेः समासादन्यत्र नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वात् । एतेन तादृशतीरवृत्तितायामेव तद्भागस्य लक्षणयापि न निस्तारः तादृशतीरवृत्तेश्च लक्ष्यत्वे घोषादावभेदेन तदन्वयायोगः समासभिन्नस्थले नामार्थयोरभेदान्वये नाम्नोः समानविभक्तिकत्वस्य तन्त्रत्वात् । न च गभीरायां नदीतिभागस्यैव

तादृशतीरलक्षकत्वं तदर्थे विभक्त्यर्थस्यानन्वयापत्तेर्नहि स भागः प्रकृतिर्येन तदर्थे विभक्त्यर्थस्यान्वयः स्यात् गभीरायां नद्यां व्रजेत्यादितोऽपि गभीरनदीतीरकर्मकत्वादिबोधापत्तेस्तद्भागस्य वाक्यादन्यत्वाच्च तस्माद्गभीरापदं नदीपदं वा तत्र गभीरनदीतीरलक्षकं पदान्तरन्तु तत्र तात्पर्य्यग्राहकमिति सिद्धान्तविदः। चट्पटाद्यनुकरणस्य हुम्फड़ादिस्तोभस्य च स्वानुभावकत्वमपभ्रंशानामिव शक्तिभ्रमादेव गौर्वाहीक इत्यादौ तु शक्यार्थसदृशत्वावच्छिन्नबोधकतया गौणं गवादिपदं गोसदृशादौ लक्षकमेव न ततो भिद्यते।

स्यादेतत् मुखं विकसितस्मितमित्यत्र विकसितपदेन विस्तृतार्थलक्षणया मुखस्य प्रकटितस्मितवत्तामनुभाव्योत्तरकालं कुसुमतुल्यसौरभादिमत्त्वं तस्य लक्षणामूलकव्यञ्जनया वृत्त्या बोध्यत इति रूढ़ादिवद्व्यञ्जकमपि शब्दान्तरमास्थेयं न हि तत्र विकसितादिपदं कुसुमसदृशादौ रूढ़मसङ्केतितत्वात् नापि यौगिकं स्वावयववृत्त्या तदप्रापकत्वात् नवा लक्षकं उपस्थितार्थान्वयानुपपत्तिधीरूपस्य लक्षणावीजस्य तत्राभावादित्यालङ्कारिकाः तत्र वदन्ति अन्वयानुपपत्तेर्लक्षणावीजत्वं न तज्जनकत्वं शक्यसम्बन्धात्मिकाया लक्षणायास्तदजन्यत्वात् नापि तज्ज्ञापकत्वं मुख्यार्थान्वयानुपपत्तिज्ञानमन्तरेणापि प्रमाणान्तरेण तद्ग्रहसम्भवात् अतएव न लक्ष्यार्थतात्पर्य्यग्राहकत्वमपि प्रकरणादितोऽपि लक्ष्यार्थपरत्वग्रहात् न च लक्षणाजन्यान्वयबोधं प्रति तस्याः कारणत्वमेव लक्षणावीजत्वमिति साम्प्रतं यष्टीः प्रवेशयेत्यादौ व्यभिचारात् तादृशहेतुतायां प्रमाणाभावाच्च। अथास्ति नानार्थशब्दैः प्रकरणादिसाचिव्यादेकविधानामर्थानामन्वयबुद्धेरनन्तरमप्यन्यविधानामन्वयानुभवः सहृदयस्य यथायं गौरविलो महान् इत्यादौ यथा वा वयस्या

नागरासङ्गादङ्गानां हन्ति वेदनामित्यादौ। सचाय मनुभवो न शक्तिधीप्रभवः शक्यार्थबुद्धौ तत्परत्वग्रहस्य तद्ग्राहकप्रकरणाद्यवगमस्य वा हेतुत्वेन तदसत्त्वात् नापि लक्षणाप्रयुक्तः शक्यार्थे तदयोगात् परन्त्वभिधामूलव्यञ्जनयैव सम्पाद्यः तदुक्तम् अनेकार्थस्य शब्दस्य प्रस्तावाद्यैर्नियन्त्रिते। एकत्रार्थेऽभिधामूलव्यञ्जनान्यस्य बोधिका। इति चेन्न तात्पर्य्यधियो हेतुत्वस्य पूर्वं परास्तत्वात् अतएव प्रकरणादीनामननुगतानां क्वचिदसत्त्वेऽपि क्षत्यभावात् वस्तुतः शक्त्याद्युपस्थितानामेकविधानां पदार्थानामन्वयमतेरनन्तरं यद्यन्यविधाना मन्वयबोधः स्यात् स्यादपि तदनुरोधेन व्यञ्जनास्वीकारः नचैवं तत्तदर्थकशाब्दसामान्यं प्रत्येव तत्तदर्थनिस्तात्पर्य्यकत्वधियः प्रतिबन्धकत्वात् तत्तदर्थानां यथा कथञ्चिदुपनयवशेन मनसैव विशिष्टधीसम्भवात् मानोरथिकसुखप्रभेदपर्य्यवसितं चमत्कारं प्रत्यपि शाब्दस्येव मानसस्यापि बोधविशेषस्य हेतुतायाः सुवचत्वात् व्यञ्जनाख्यपदार्थान्तरस्य स्वरूपसत्तया अन्वयबुद्धौ तद्धेतुत्वस्य च प्रमाणविरहेणासत्त्वाच्चेति संक्षेपः।

लक्षकं नाम विभजते।

जहत्स्वार्थाजहत्स्वार्थनिरूढाधुनिकादिकाः।
लक्षणा विविधास्ताभिर्लक्षकं स्यादनेकधा॥

काचिल्लक्षणा शक्यावृत्तिरूपेण बोधकतया जहत्स्वार्थेत्युच्यते यथा तीरत्वादिना गङ्गादिपदस्य। काचिच्छक्यलक्ष्योभयवृत्तिना शक्यवृत्तिनैव वा रूपेणानुभावकत्वादजहत्स्वार्था यथा द्रव्यत्वादिना नीलघटत्वादिना च घटपदस्य। काचिल्लक्ष्यतावच्छेदकीभूततत्तद्रूपेण पूर्वपूर्वं प्रत्यायकत्वात् निरूढा यथा आरुण्यादिप्रकारेण तदाश्रयद्रव्यानुभावकत्वादरुणादिपदस्य। काचिच्च पूर्वपूर्वं ताद्रूप्येणाप्रत्यायकत्वादाधुनिकी

यथा घटत्वादिना पटादिपदस्य। आदिना शक्यमहत्त्व-प्रकारेण बोधकतया गौण्युपगृहीते यथा अग्निर्माणवक इत्यादावग्निमहत्त्वादिना अग्न्यादिपदस्य। तदेवं विविध-लक्षणावत्त्वाल्लक्षकं नामापि जहत्स्वार्थादिभेदादनेकविध-मित्यर्थः। स्यादेतत् यदि तीरादिलक्षकतया गङ्गादिपदस्य ज्ञानं तीराद्यनुभवे भवेद्धेतुर्भवेदप्युक्तक्रमेण लक्षकाणां विभागः नत्वेतदस्ति तीराद्यन्वयबोधं प्रति तीरादिशक्तत्वेनैव पदज्ञानस्य लाघवेन हेतुतया लक्षकाणामननुभावकत्वात् गुरूणामग्नौ शैत्यं स्पृशेदित्यादौ शक्त्येन दहनादिनेव गङ्गायां घोष इत्यादौ लक्षितेन तीरादिना मार्द्दमग्रहोतासंसर्गकस्यैव समस्यर्था-धेयत्वादेरन्वयबोधप्रविष्टत्वादिति चेन्न प्रकृत्यर्थावच्छिन्नस्यैव प्रत्ययार्थस्य धर्म्यन्तरेऽन्वयबुद्धेर्व्युत्पन्नतया तीराद्यविशेषितस्य सुबर्थाधेयत्वादेर्घोषादावन्वयबोधायोगात्। न च शक्तस्यैव पदस्य स्वसमाकाङ्क्षपदान्तरोपस्थाप्यार्थान्वितस्वार्थधर्मिकान्वय-बोधं प्रति हेतुत्वादन्वयबुद्धौ लक्ष्यार्थस्य प्रवेशः कुन्ताः प्रवि-शन्तीत्यादौ लक्ष्यस्य कुन्तधरादेरन्वयविशेष्यत्वानुपपत्तेः कुमतिः पशुरित्यादौ लक्ष्यार्थयोर्मिथोऽन्वयबोधस्याप्यानुभविकत्वाच्च तस्माच्छक्तेरिव भक्तेरपि ज्ञानमनुभावकं भवत्येव कार्य्यताव-च्छेदकस्य सङ्कोचाच्च न व्यभिचारः।

योगरूढं नाम लक्षयति।

> स्वान्तर्निविष्टशब्दार्थस्वार्थयोर्बोधकृन्मिथः।
> योगरूढं न यत्र कं विनान्यस्यास्ति शाब्दधीः॥

यन्नाम स्वावयववृत्तिलभ्यार्थेन समं स्वार्थस्यान्वयबोधकृत् तन्नाम योगरूढं यथा पङ्कजकृष्णसर्पाधर्मादि तद्धि स्वान्त-र्निविष्टानां पङ्कादिशब्दानां वृत्तिलभ्येन पङ्कजनिकर्त्रादिना समं स्वशक्यस्य पद्मादेरन्वयानुभावकं पङ्कजमित्यादितः पङ्कज-

निकटं पद्ममित्यनुभवस्तु सर्वसिद्धत्वात्। इयांस्तु विशेषो यद्रूढ़मपि मण्डपरथकारादिपदं योगार्थविनाकृतस्य रूढ़ार्थस्येव रूढ्यर्थविनाकृतस्यापि योगार्थस्य बोधकं मण्डपे शेते इत्यादौ योगार्थस्य मण्डपानकर्त्रादेरिव मण्डपं भोजयेदित्यादौ समुदितार्थस्य गृहादेरयोग्यत्वेनान्वयाबोधात्। योगरूढ़न्तु पङ्कजादिपदमवयवशक्त्या रूढ्यर्थमेव समुदायशक्त्या चावयवलभ्यार्थमेवानुभावयति नत्वन्यं व्युत्पत्तिवैचित्र्यात्तथैव साकाङ्क्षत्वात्। अतएव पङ्कजं कुमुद मित्यत्र पङ्कजनिकर्तृत्वेन भूमौ पङ्कजमुत्पन्न मित्यादौ च पद्मत्वेन पङ्कजपदस्य लक्षणयैव कुमुदस्थलपद्मयोर्बोध इति वार्त्तिकम्। ननु पुष्पं पङ्कजेत्यादौ पङ्कजादेरन्वयस्याबोधात् बोधाच्च पङ्कजपुष्पमित्यादौ निर्विभक्तिकेन पङ्कजादिपदेनोपस्थाप्यार्थस्यान्वयधीसामान्यं प्रत्येव तादृशपङ्कजादिपदोत्तरशब्दोपस्थाप्यत्वं तन्त्रम् एवं पुष्पं पङ्कजमित्यादौ अन्वयशाब्दबोधदर्शनात्तदनुरोधेन सविभक्तिकपङ्कजादिपदोपस्थाप्यार्थान्वयबोधं प्रति स्वसमानविभक्तिकपदोपस्थाप्यत्वञ्च अतस्तदुपस्थापितस्य पङ्कजातादेः कथं पदान्तरानुपस्थापिते पद्मादावन्वय इति चेदपङ्कजवृत्तिः सत्तेत्यादौ खलदन्तरसंशोभि तरुण्या मुखपङ्कजमित्यादौ च व्यभिचारादुक्तव्युत्पत्तेः सङ्कोचेनेति गृहाण। न च धेनुपदस्य धानकर्तृत्वविशिष्टायां गवीव पङ्कजादिपदस्यापि पङ्कजातत्वादिविशिष्टपद्मादौ रूढ़िरेवास्तु न तु योगरूढ़िरिति साम्प्रतं अन्यत्र क्लृप्तशक्तिभ्यः पङ्कजन्यादिपदेभ्य एवाकाङ्क्षादिसाचिव्येन पङ्कजनिकर्तृत्वादेर्लाभसम्भवे तद्विशिष्टस्य पद्मस्य गुरोः समुदायाशक्यत्वादनन्यलभ्यस्यैव शब्दार्थत्वात्। यद्यपि कर्तृवाचकडप्रत्यये एव पद्मत्वविशिष्टस्य लक्षणया लाभसम्भवान्न पङ्कजभागस्य तत्र शक्तिरुचिता प्रकारान्तरालभ्यस्यैव शब्दशक्यत्व-

मित्यन्तत्वात् अतिवर्त्तमानत्वयोरिवैकपदार्थयोरपि कर्टपञ्च-योर्मिथोऽन्वयस्य सम्भवित्वात् तथाप्यवयवानां शक्तेरग्रहे ग्रहेऽपि वा पद्मादौ तदर्थस्यान्वयधीविरोधिधीदशायां पङ्कजमस्तीत्यादितः पद्ममस्तीत्याद्यनुभवार्थमवश्यं पद्मत्वादिविशिष्टे पङ्कजादिभागस्य रूढ़िरपेया इतरथा प्रकृत्यर्थावच्छिन्नस्यैव प्रत्ययार्थस्य पदार्थान्तरेणान्वयस्य व्युत्पन्नतया डप्रत्ययोपस्थापितस्यापि पद्मस्यास्तित्वादिना सहान्वयानुपपत्तेः अतएव पङ्कजादिपदाग्रहीतशक्तिकस्य पुंसः पङ्कजमस्तीत्यादितो जात्वपि कर्त्तास्तीत्याकारको नान्वयबोधः प्रत्ययमात्रोपस्थाप्यस्य कर्त्तुरन्यत्रान्वये निराकाङ्क्षत्वादिति वक्ष्यते। किञ्चैवमेकाचरकोषाव-धृतशक्तिकानां कखादिप्रत्येकवर्णानामिव निरूढ़लक्षणया तत्तदर्थानुभावकत्वसम्भवादकनखादिसमुदायस्यापि तत्तदर्थे शक्तिर्विलोयेत खादिप्रत्येकवर्णस्य शक्तिग्रहं विनापि वकादिशब्दाद्वकादेरनुभवार्थं तत्र समुदाये शक्तिरिति तु प्रकृतेऽपि समानं डादिप्रत्ययमात्रस्य पद्मादौ वृत्तिमत्त्वाग्रहेऽपि पङ्कजादिसमुदायात् पद्मादेरनुभवस्य सर्वसिद्धत्वात्। नचैवं चित्रगुरित्यादावपि चित्रगोस्वाम्यादौ समुदायस्य शक्तिप्रसङ्गः समासत्वस्याविशिष्टत्वादिति वाच्यम् अगृहीतावयववृत्तिकस्य पुंसस्ततोऽर्थानधिगमेनावयवानां वृत्तेरवश्यापेक्षायां तेषामेव तथाविधार्थबोधकत्वौचित्यस्य वक्ष्यमाणत्वादिति।

पङ्कजादिपदेभ्यः केवलस्यैव योगार्थस्य रूढ्यर्थस्य वा बोधव्युदासार्थं तादृशार्थयोर्मिथः साकाङ्क्षत्वनियमो न कल्प्यते परन्तु रूढ्यर्थभिन्ने योगार्थस्य बोधं प्रति रूढ़िधियः प्रतिबन्धकत्वं तेन रूढ़ेरप्रतिसन्धानदशायामवयवशक्त्यैव पङ्कजं कुमुदमित्यादौ पङ्कजनिकर्टत्वादिना कैरवादेरवगमस्तथावयवशक्तेरनुपस्थितौ समुदायशक्त्यैव भूमौ पङ्कजमुत्पन्नमित्यादौ

पङ्कत्वप्रकारेण स्थलपद्मादेरत एव च तैलपदं योगेन तिलप्रभवं रूढ्या च तिलसदृशद्रवद्रव्यपर्य्यवसितं सदेहं बोधयेद्योगरूढमपि तैलं पत्रमित्यादौ सर्षपस्य तैलमित्यादौ च शक्त्यैव प्रत्येकस्य बोधकमिति मीमांसकानां मतमुपन्यस्यति ।

रूढ्यर्थभिन्ने योगार्थबुद्धौ रूढेर्विरोधिताम् ।
वदन्ति केचिदेकैकवृत्तिस्तैः क्वचिदिष्यते ॥

क्वचित्समुदायावयवयोरेकमात्रस्य शक्तिप्रतिसन्धानस्थले यद्यपि पद्मान्यधर्मिकपङ्कजातत्वान्वयधीसामान्यं प्रति पङ्कजपदं पद्मशक्तमित्येवं रूढिज्ञानत्वेन न विरोधित्वं तादृशधीसत्त्वेऽपि कर्दमजादिशब्देभ्यस्तादृप्येण कैरवादेरवगमात् नापि पङ्कजपद-जन्यतादृशबोधं प्रत्येव तथा विरोधित्वं रूढिज्ञानदशायामपि समुदायस्य लक्षणया शक्तिभ्रमेण वा पङ्कजपदात् पङ्कजातत्वेन कुमुदबोधस्य सर्वैरुपगमात् तथाप्यवयवशक्त्या पङ्कजपदजन्य-पद्मान्यधर्मिकपङ्कजातत्वान्वयबोधं प्रत्येव रूढिज्ञानत्वेन प्रति-बन्धकत्वम् । न च कुमुद एव पद्मत्वेन रूढिभ्रमदशाय तादृप्येण कुमुदस्य बोधो न स्याद्विरोधिन्या रूढिधियः सत्त्वा-दिति वाच्यं पद्मान्यधर्मिकेत्यनेन पद्मत्वानवच्छिन्नविशेष्यता-कत्वस्योक्तत्वात् । पद्मस्येव कुमुदस्यापि समुदायशक्यत्वधी-दशायामवयवशक्त्या पङ्कजातं कुमुदमित्याकारकधीस्वीकारे तु कुमुदादिशक्तत्वज्ञानाजन्यत्वेनापि प्रतिबध्यं विशेषणीयम् । न च यत्र तात्पर्य्यादिधीविलम्बादयोग्यताभ्रमादिना प्रति-बन्धाद्वा रूढ्योपस्थिते पद्मे योगार्थस्य पङ्कजनिकर्त्तुरनन्वयस्तत्रा-वयवशक्त्या पङ्कजातत्वेन कुमुदादिबोधो न स्यात् विरोधिनो रूढिज्ञानस्य सत्त्वादिति वाच्यं मीमांसकानामिष्टत्वात् ते हि मण्डपं भोजयेत्यादावपि गृहादौ रूढिधीसत्त्वे मण्डपादि-पदानामवयवशक्त्या मण्डपानकर्त्रादेर्न मन्यन्ते बोधं भ्रमत्व-

ज्ञानानास्कन्दितस्यैव रूढ्यर्थगोचरतत्तद्योग्यताज्ञानाद्यभाव-
विशिष्टस्यैव रूढिज्ञानस्य विरोधितायाः सुवचत्वाच्च। यदि
च समुदाय एव पद्मत्वेन पङ्कजनिकर्तृत्वेन च शक्तः प्रमाभ्र-
माभ्यां पङ्कजातं पद्ममित्याकारको बोधः प्रामाणिकस्तदानीं
च पङ्कजनिकर्तृत्वेन कुमुदस्य नान्वयधीः तदावयवशक्तेरत्य-
पहाय पङ्कजपदघटकशब्दशक्तेति प्रतिबध्यकुक्षौ निक्षेपणीयं
तद्घटकत्वञ्चेह तद्विषयिताव्यापकविषयिताकत्वमात्रं तदवयव
इव तत्राप्यविशिष्टम्। यत्तु स्वावयवशक्त्या पङ्कजपदजन्यं
पङ्कजकर्तृत्वेनान्वयबोधं प्रति पद्मत्वं हेतुस्तत्र कार्य्यस्य
विशेष्यत्वं तदवच्छेदकत्वं वा कारणस्य तु समवायस्तादात्म्यं
वा प्रत्यासत्तिरित्येतावतैव योगार्थमर्य्यादया कुमुदादेर्बोध-
व्युदाससम्भवात् उक्तक्रमेण प्रतिबन्धकतायां मानाभावः पद्मत्वं
पङ्कजप्रयोगोपाधिरिति प्राचीनप्रवादस्याप्युक्तार्थ एव पर्य्यव-
सानादिति तत्तुच्छं पद्मागृहीतशक्तिकस्यापि पुंसः पङ्कजनि-
कर्तृत्वेनावयवशक्त्या कुमुदस्य बोधानुदयप्रसङ्गात् न चेष्टा-
पत्तिरनुभवविरोधात् न च रूढिज्ञानकालीनमेव योगार्थस्य
बोधं प्रत्युक्तरीत्या पद्मत्वस्य हेतुत्वं तथा सति रूढिधी-
दशायामपि तदसमानकालीनस्य पङ्कजातत्वेन कुमुदबोधस्य
सामान्यसामग्रीमहिम्ना दुर्वारतापत्तेः रूढिज्ञानासमानकालीन-
तादृशबोधं प्रति विशेषतो हेत्वन्तरस्याक्लृप्तत्वात् तत्कल्पने
चातिगौरवात्। यदपि पङ्कजननकर्तृषु पद्मादिपदानां
शक्तिसत्त्वेऽपि पङ्कजपदान्न तादृप्येण बोधः परन्तु पद्मत्वमात्रेण
योगार्थमर्य्यादया पङ्कजातत्वप्रकारकबोधसामान्यं प्रत्येव
पद्मत्वविशिष्टे रूढिज्ञानस्य लाघवेन विरोधित्वात् पद्मान्य-
धर्मिकत्वादेर्गौरवेण प्रतिबध्यकोट्यप्रविष्टत्वादतो योगरूढं
नामैव नास्ति युधिष्ठिरादिशब्दादपि रणस्थिरत्वादिकं योगार्थं

परित्यज्यैव वैशम्पायनादिप्रकारेण कुन्तीपुत्राद्यवगमात् । यदुक्तमभियुक्तैः या वृत्तिरजहत्स्वार्था सेयमत्रोपपादिता । जहत्स्वार्था तु तत्रैव यत्र रूढ़िविरोधिनी ॥ पङ्कजं मनसादेवी पद्मनाभो युधिष्ठिर इति । तदेतद्वैयाकरणमतं पङ्कमस्तीत्यादितः पङ्कजातं पद्ममस्तीत्याद्यनुभवस्य न्यायमीमांसादिसकलतन्त्रसिद्धत्वेन गौरवस्य प्रामाणिकत्वादनादेयमन्यथा अवयवशक्तेरपि प्रतिबध्यतायामप्रवेशापत्तेर्लाघवेन पङ्कजातत्वप्रकारकशाब्दसामान्यं प्रत्येव रूढ़िधियः प्रतिबन्धकत्वस्य सुवचत्वात् । नन्वेवं द्रव्ये सरसिजमस्तीत्यादितो द्रव्यनिष्ठं सरोजमिव द्रव्याभिन्ने सरसिजातं पद्ममपि प्रतीयेत नामार्थयोरभेदान्वये तन्त्रस्य नाम्नोः समानविभक्तिकत्वस्यानपायादिति चेत् सत्यं सविभक्तिकनामार्थस्य नामान्तरान्वये वृत्तिशब्दैकदेशान्येनैव समानविभक्तिकनामान्तरेण स्मारितत्वस्य तन्त्रतायाः स्वीकार्य्यत्वादिति ।

यद्यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते । तेन तेनान्वितः स्वार्थः पदैः समधिगम्यत इति रूढ्यर्थयोगार्थयोर्युगपदुपस्थितौ तयोराकाङ्क्षादिसाचिव्यादाहत्यान्वयबुद्धिस्थल एव योगार्थस्य रूढ्यर्थस्य वा नान्यत्रान्वयो न तु तयोरेव मिथः साकाङ्क्षत्वं अन्यत्र योगार्थस्य बोधने रूढिधियः प्रतिबन्धकत्वं वा प्रमाणाभावात् एवञ्च यत्र योगरूढिलभ्यार्थयोस्तात्पर्य्याग्रहाद्विरोधिसमवधानाद्वा न प्रथममन्वयधीस्तत्र योगार्थमर्य्यादया पङ्कजातत्वेन कुमुदादेः समुदायशक्त्या च पद्मत्वेन स्थलकमलस्य बोधो भवत्येवेति मणिकृन्मतं दर्शयति ।

रूढ्यर्थेऽन्यत्र वा यत्र यदाकाङ्क्षादिनिश्चयः ।
तदेव तत्र योगार्थस्यान्वयो मणिकृन्मतः ॥

समुदायशक्त्युपस्थापिते पदान्तरवृत्त्युपस्थापिते वा यत्र

धर्मिणि शक्यान्तरवृत्तिलभ्यार्थस्य यदाकाङ्क्षानिश्चयादिस्तदैव तत्र तस्यान्वयबोध उत्पद्यते सम्भूतसामग्रीकत्वात् रूढ्यर्थभिन्न योगार्थस्यान्वयबोधव्युदासाय तु रूढेर्योगापहारिताप्रवादो रूढ्यर्थमात्रे योगार्थस्यान्वयबोधसामग्रीस्थलाभिप्रायक इति चिन्तामणिकृतां मतम्।

योगरूढं विभजते।

सामासिकं तद्धितान्तमिति तत् द्विविधं भवेत्।
योगरूढं कृदन्तस्य समासत्वव्यवस्थितेः॥

तत् योगरूढं सामासिकं समासात्मकं कृष्णसर्पादि तद्धितान्तं वासुदेवादि। कृदन्तस्य पङ्कजादियोगरूढस्य सामासिक एवान्तर्भाव इति नाधिक्यम्।

यौगिकं नाम लक्षयति विभजते च।

योगलभ्यार्थमात्रस्य बोधकं नाम यौगिकम्।
समासस्तद्धितान्तञ्च कृदन्तञ्चेति तत्त्रिधा॥

यन्नाम स्वान्तर्निविष्टशब्दानां योगलभ्यस्यैव यादृशार्थस्यान्वयबोधं प्रति हेतुस्तन्नाम तादृशार्थे यौगिकम्। योगरूढन्तु कृष्णसर्पादिपदं योगेनावच्छिन्नस्य रूढ्यर्थस्य बोधकं न तु तन्मात्रस्य। तत्र यौगिकं त्रिविधं समासतद्धितान्तं कृदन्तञ्चेति द्वन्द्वोऽपि समासः स्वघटकशब्दानामाकाङ्क्षया लभ्यस्य धवखदिराद्यर्थस्यान्वयबोधकतया यौगिक एव। सर्वञ्चेदं रूढान्यत्वेन विशेषणीयः नातः कृष्णसर्पादौ वासुदेवादौ पङ्कजादौ च योगरूढेऽतिप्रसङ्गः। ब्राह्मणी श्वश्रूः शूद्रेत्यादौ ङीबादेः स्त्रीत्ववाचित्वे तादृशं नाम यौगिकमेव अन्यथा तु स्त्रीत्वादिमति तत्तदर्थे रूढमेव नातो विभागस्य व्याघातः।

यौगिकेषु समासं लक्षयति ।

याद‍ृशस्य महावाक्यस्यात्तत्वादिर्निजार्थके ।
याद‍ृशार्थस्य धीहेतुः स समासस्तदर्थकः ॥

याद‍ृशमहावाक्योत्तरस्त्वतलादिः स्वार्थस्य याद‍ृशार्थावच्छिन्न-विषयताशालिबोधे हेतुस्ताद‍ृशं तद्वाक्यं तथाविधार्थे समासः । पाचकादिकन्तु पाककर्त्राद्यर्थकं वाक्यमपि स्वघटकानेकनाम-लभ्यताद‍ृशार्थकत्वविरहान्न महावाक्यं प्रकृत्यर्थमात्रावच्छिन्न-प्रत्ययार्थस्यान्वयबोधं प्रत्ययोग्यत्वं वा प्रकृते वाक्यस्य महत्त्वं वाच्यं तेन उपकुम्भादौ नाव्याप्तिर्नवा नीलघटत्वमित्यादौ नीलघटत्वादिभागेऽतिप्रसङ्गः । चारपायीत्यादिकस्तु प्रकृत्य-र्थावच्छिन्नकृदर्थस्यान्वयबोधे समर्थोऽपि न प्रकृत्यर्थमात्राव-च्छिन्नस्य ततः पानगोलसामान्यस्याप्रत्ययात् राज्ञः पुरुषत्व-मित्यादितो राजन्येव पुरुषभावः प्रतीयते न तु राजपुरुषस्य भावः तद्धितानां प्रकृत्यर्थमात्रान्वितस्वार्थबोधकत्वाटतो राज्ञः पुरुषेत्यादिभागे न प्रसङ्गः । पायं पायमित्यादिणमन्तभागस्तु स्वार्थावच्छिन्नस्य धात्वन्तरार्थस्यैवान्वयबोधको न तु त्वादि-प्रत्ययार्थस्य प्रस्थायेत्यादौ समासव्यपदेशो ल्यबादिशब्दसंस्कार-प्रयोजनको गौणः ।

विभजते ।

स चायं षड्विधः कर्मधारयादिप्रभेदतः ।
यश्चोपपदसंज्ञोऽन्यस्तेनासौ सप्तधा मतः ॥

स चायं निरूक्तसमासः कर्मधारयद्विगुतत्पुरुषाव्ययीभाव-बहुव्रीहिद्वन्द्वभेदात् षड्विधः यश्च कुम्भकारादिरुपपदसंज्ञकः समासोऽस्ति तेन सह समासः सप्तविधः । सङ्काशनिभनीकाशा-दीनामिव कारादीनामपि शब्दानामुपपदार्थान्वितस्यैव स्वार्थस्य बोधकतया तथाविधनामान्तरमिव दैतस्य समासान्तराद्विशेषः ।

ननु यदि षड्विधः सप्तविधो वा समासस्तदा कथं पञ्चविधत्वोक्तिः प्राचामसङ्गतेत्यतस्तामुपपादयति।

पूर्वमध्यान्तसर्वान्यपदप्राधान्यतः पुनः।
प्राच्यैः पञ्चविधः प्रोक्तः समासो वामटादिभिः॥

कश्चित्समासः पूर्वपदार्थधर्मिकान्वयबोधजनकतया पूर्वपदप्रधान उच्यते यथा प्राप्तजायार्द्धपिप्पलीपूर्वकायादिकस्तत्पुरुषः यथा वा उपकुम्भाद्यव्ययीभावः पुरुषसिंहादि कर्मधारयश्च। कश्चिन्मध्यपदार्थधर्मिकधीजनकतयैव मध्यपदप्रधानो यथा घटानधिकरणप्रतियोगितानवच्छेदकेत्यादिकस्तत्पुरुषः घटस्य नाधिकरणमित्यादिविग्रहे मध्यपदार्थस्यैव विशेष्यत्वात् बहुपदे बहुव्रीहिरेवेत्यस्य तत्पुरुषादेर्बहुनामगर्भत्वाभावे तात्पर्य्यमित्यग्रे व्युत्पाद्यत्वात्। कश्चिदन्त्यपदार्थधर्मिकधीहेतुत्वादन्त्यपदप्रधानः यथा राजपुरुषादिकस्तत्पुरुषो नीलोत्पलादिकः कर्मधारयो द्विगार्थ्याद्यव्ययीभावश्च। कश्चित्सर्वपदार्थधर्मिकबुद्धिहेतुत्वात् सर्वपदप्रधानः यथेतरेतरद्वन्द्वो द्वन्द्वमात्रं वा। कश्चित्स्वघटकान्यपदार्थधर्मिकज्ञानजनकत्वादन्यपदार्थप्रधानः यथा बहुव्रीहिः शलेयवाद्यव्ययीभावश्च। तदेवं पञ्चभेदानादायैव पञ्चविधत्वं प्राच्चैरुक्तमतो न विरोधः। नित्यानित्यभेदेन समासस्य द्वैविध्यमप्यस्ति यदुक्तं जयादित्येन विभक्तिमात्रप्रक्षेपान्निजान्तर्गतनामसु। स्वार्थस्याबोधबोधाभ्यां नित्यानित्यौ समासकाविति। स्वान्तर्गतनामसु विभक्तिमात्रप्रक्षेपेण यत्तद्भ्यार्थस्याबोधः स नित्यः समासः यथा कृष्णसर्पनिर्मक्षिकासुरादिः कृष्णः सर्पो मक्षिकाया निः न सुर इत्यादितस्तत्तद्भ्यस्य वैजात्यादेरग्रहात् यत्तद्भ्यस्य च बोधः सोऽनित्यो यथा राजपुरुषपूर्वकायादिः तत्तद्भ्यार्थस्य राज्ञः पुरुषः पूर्वं कायस्येत्यादिवाक्यादपि प्रतीतेः। स्फरद्दाग्गो चलश्चैव इत्या-

दिक: कर्मधारयोऽप्यनित्य एव समास: स्फुरन्ती वाणी-त्यादिविग्रहस्य वाक्यादौ स्फुरदादिविधेयकबोधाजनकत्वेऽपि स्फुरदभिन्नवाण्यादावैकत्वादिबोधकत्वमादायैव तदर्थप्रकाश-कत्वात् स्फुरन्तीं वाणीमित्यादिवाक्यस्यैव तत्र विग्रहत्व-सम्भवाच्च विग्रह एव समासलभ्यार्थस्य बोधकत्वं तन्त्रं न तु समासे विग्रहार्थस्य विग्रहलभ्ययोर्लिङ्गसंख्ययोर्व्यञ्जकवैधुर्य्येण प्रायश: समासाबोध्यत्वात्। अतएव यत्र समासे तयोर्व्यञ्जक-सद्भावस्तत्रावगमोऽपि यथा जरतीचित्रगुर्जन: प्रियतिसा पुरुष इत्यादौ स्त्रीत्वस्य स्त्रीप्रत्ययतिस्रादेशयोस्तदभिव्यञ्जकयो: सत्त्वात् यथा वा अक्षपरि शलाकापरि प्रिययुवा हस्त्यश्व-मित्यादावेकत्वादे: अक्षशलाकयोरेकत्व एवाव्ययीभावस्य युष्मदस्मदोर्द्वित्व एव युवाद्यादेशस्य सेनाङ्गानां बहुत्व एव समाहारद्वन्द्वस्य विधानात्। तदुक्तमभियुक्तै: सङ्ख्या तु व्यञ्जकाभावादव्यक्ता प्रातरादिवत्। यत्र तु व्यञ्जकं किञ्चि-त्तत्र सङ्ख्या प्रकाशते ,शलकापरि हस्त्यश्वं पूर्वकायोऽर्द्धपिप्प-लीति। पूर्वादेरर्द्धस्य च ङसर्थैकत्वमन्तर्भाव्यैवावयविना तत्पुरुषस्य व्युत्पन्नत्वात् सरसिजादौ कण्ठे कालादौ चालुक् समासे सुप: संख्यावगमेऽपि न क्षति: तच्च व्यञ्जकसुप: सत्त्वे-ऽपि संख्या न बुध्यत इति तु समासशक्तिवादिन: पातञ्जला:।

समासेषु कर्मधारयं लक्षयति।

क्रमिकं यन्नामयुगमेकार्थेऽन्यार्थबोधकम्।
तादात्म्येन भवेदेष समास: कर्मधारय:॥

क्रमिकं यन्नामद्वयं तयोरेकस्य नाम्नोऽर्थे धर्मिणि तादा-त्म्येनापरनाम्नोऽर्थस्यान्वयबोधं प्रति समर्थं तादृशनामद्वयं कर्मधारय: नीलोत्पलमित्यादावुत्पलादिपदस्यार्थे नीलादि-पदार्थस्य तादात्म्येनान्वय: तथा पुरुषसिंह इत्यादावपि

पुरुषादावुत्तरपदलक्षणायाः सिंहादिमद्भेदस्य पुरुषः सिंह इवे-
त्यादिविग्रहे प्रायेणोपमेयस्योपमानैरिति कर्मधारयानुशास-
नात्। कुम्भस्य समीपमित्याद्यर्थक उपकुम्भादिर्न तादा-
त्म्येनान्वयबोधकः प्रबलमपद्रव्यमित्यादेः संग्रहाय नामपदस्य
धातुभिन्नोपलक्षकत्वात् सार्थकसामान्यपरत्वेऽपि तत्त्वभावाच्च।
नीलमुत्पलमित्यादौ तु समानविभक्तिकं नामद्वयं स्वार्थयोर-
भेदान्वयं बोधयदपि न क्रमिकं विभक्त्या व्यवधानात्। यदि च
तादात्म्येन नीलादिनामार्थस्यान्वयबुद्धौ नीलादिनामोत्तर
नामोपस्थाप्यत्वं तन्त्रमतो न तत्राभेदसम्बन्धेन नीलादेरन्वयः
परन्तु विशेषणविभक्त्युपस्थापिते तादात्म्य एवाधेयत्वेन नील-
घटपटावित्यादौ च नीलपदाव्यवहितेन घटपटेत्येवं द्वन्द्वात्मक-
नाम्नैवोपस्थापिते पटे नीलस्य तादात्म्येनान्वयान्न व्यभिचारः
स्तोकं पचति धान्येन धनं प्रकृत्या पटुरित्यादावपि स्तोकादेर्न
धात्वाद्यर्थे तादात्म्येनान्वयः किन्तु द्वितीयाद्यर्थे तादात्म्य
एवाधेयत्वेनेत्यादिकं विभाव्यते तदा क्रमिकत्वमनुपादेय-
मेव। राजपुरुष इत्यादिकस्तु तत्पुरुषो न पुरुषे पूर्वपद-
लक्षितराजसम्बन्धिनस्तादात्म्येनान्वयबोधकः समासविग्रह-
योस्तुल्यार्थकत्वहान्यापत्तेः परन्तु राजसम्बन्धस्यैव अतएव
राजपुरुष इत्यादौ पूर्वपदे षष्ठ्यर्थसम्बन्धे लक्षणेति मणि-
कृदुक्तमपि सङ्गच्छते। यथा च नामार्थयोर्भेदेनान्वयेऽपि न
क्षतिस्तथोपरिष्टाद्वक्ष्यते। किञ्चिद्विशिष्टसुबर्थानवच्छिन्नस्यैव
वा तादात्म्येनान्वयबोधकत्वमुक्तनिरुक्तौ निवेश्यम्। न चैव-
मपि पञ्चपूल्यादिद्विगौ द्विगार्ग्यं गच्छत इत्यादिस्थलीये द्वित-
याद्यभिन्नगार्ग्यादिबोधकाव्ययीभावे चातिव्याप्तिस्तदन्यत्वेनापि
विशेषणीयत्वात्। अत्र च मानुषब्राह्मणो ब्राह्मणमानुष
इत्याद्यप्रयोगाद्विशेषणविशेष्ययोर्यत्र मिथस्तादात्म्येन व्यभिचार-

स्तत्रैव कर्मधारयः साधुः प्रमेयधूम इत्यादौ तु नरस्य शरीरं राज्ञः शिर इत्यादाविव तादात्म्यसम्बन्धार्थकषष्ठ्या तत्पुरुष एवेति वृद्धाः। चन्दनतरुर्विन्ध्यगिरिर्वसन्तसमय इत्यादिप्रयोगस्य प्रामाणिकत्वात् विशेष्यस्यैव विशेषणाव्यभिचारित्वं कर्मधारये तन्त्रं न तु विशेषणस्यापि तदव्यभिचारित्वं पुरुषोत्तम इत्यत्र चोत्तमत्वं नित्यज्ञानादिमत्त्वं किन्तु भ्रमविधुरत्वम् अतएव तत्र पुरुषस्येव पुरुषेऽपि तस्य व्यभिचारसत्त्वादुत्तमपुरुष इत्यपि कर्मधारयः साधुरिति तु नव्याः। तदाद्युत्तरपदकः कर्मधारयः प्रायशो नेष्यते नीलतदस्तीत्यादितो जात्वपि नीलोत्पलादेरस्तीत्याद्यप्रतीतेः। पक्वयज्ञोजनं रम्यमामतङ्गष्ज्ञनं वृथा। नालयद्रुम आस्वाद्यः कटुतद्रूपमोच्यते इत्यादिप्रयोगात् क्वचिदिष्यतेऽपि प्रयुक्तश्च जुमरनन्दिना परमः स इत्याद्यर्थे परमसः परमतावित्यादि। तत्पुरुषोऽप्येतेन व्याख्यातः। ननु विशेष्यतया नामार्थप्रकारकान्वयबुद्धिमात्रं प्रत्येव नामोत्तरविभक्त्युपस्थाप्यत्वं तन्त्रं न तु तादात्म्यसम्बन्धावच्छिन्नतत्प्रकारताकबुद्धिं प्रति गौरवादतो नामार्थयोर्नीलोत्पलयोरन्वयासम्भवात् कर्मधारयादिकः समासो न यौगिकः किन्तु नीलोत्पलत्वादिविशिष्टे रूढ एव। तदुक्तं भर्तृहरिणा अबुधान् प्रत्युपायाश्च विहिताः प्रतिपत्तये। शब्दान्तरत्वादत्यन्तं भेदो वाक्यसमासयोरिति वैयाकरणाः तन्मन्दं नीलोत्पलमित्यादौ समुदाये रूढ्यप्रतिसन्धानेऽपि नीलादिप्रत्येकपदोपस्थित्या तयोस्तादात्म्येनान्वयबोधस्यानुभविकत्वेन गौरवस्य प्रामाणिकत्वादन्यथा नामार्थस्यान्वयबोधसामान्यं प्रत्येव नामोत्तरनामोपस्थाप्यत्वं तन्त्रमुरीकृत्य नीलमानयेत्यादौ नामार्थसुबर्थयोर्नान्वयबोधः परन्तु सुबन्तभागस्य नीलविशिष्टकर्मत्वादौ रूढिरेवेत्यपि किन्न रोचयेः। न च समासस्या-

शक्तत्वे नीलोद्रव्यञ्च घट इत्यादाविव नीलघटो द्रव्यमित्यादावपि घटे धर्मिण्येकत्र द्वयमिति न्यायेन नीलद्रव्ययोस्तादात्म्येनान्वयोपपत्तिरिति वाच्यं नामार्थस्य मुख्यविशेष्यताक इव तादात्म्यावच्छिन्नविधेयताकोऽपि बोधे नाम्नः प्रथमान्तत्वस्य तन्त्रत्वात् विधेयत्वन्तु विषयतावच्छेदकतान्यप्रकारत्वं प्रकारताप्रभेदो वेत्यन्यदेतत् पटमित्यादौ तु कर्मत्वादौ पटादिर्न तादात्म्येन विधेय इति न तत्र व्यभिचारः। ननु नीलं पीतञ्चोत्पलं यत्र इत्यर्थं नीलपीतोत्पलं सर इत्यादिको बहुव्रीहिरिव नीलं पीतञ्चोत्पलमित्यर्थे नीलपीतोत्पलं पुष्पमित्यादिकः कर्मधारयोऽप्येकत्र द्वयमिति न्यायेन नीलपीताभ्यामवच्छिन्नोत्पलनिष्ठप्रमिताकबोधजनकः कथं न स्यात् इति चेन्न बहुपदे बहुव्रीहिरेव नेतरो द्वन्द्वान्यः समास इत्यनुशिष्टिबलेन बहुव्रीहेरेव स्वनिविष्टनामद्वयोपस्थाप्यार्थद्वयावच्छिन्नतादृशनामान्तरार्थनिष्ठविषयताकबोधं प्रति हेतुत्वेन समासान्तरस्य तादृशधियं प्रत्यसमर्थत्वात्। नीलपीतोत्पले रम्ये पीतनीलोत्पलाश्रितमित्यादौ तु नीलोत्पलं पीतोत्पलञ्च रम्यमित्याकारक एव बोधो न तु नीलं पीतञ्च यदुत्पलं तद्रम्यमित्याकारः। अतएव द्वन्द्वात् परस्य प्रत्येकाभिसम्बन्धसूचनार्थं नीलपीते च ते उत्पले चेत्यादिकमेव तत्र विग्रहं वर्णयन्ति न तु नीलं पीतञ्च तदुत्पलञ्चेत्यादिकम्। घटस्य नाधिकरणमित्यादिविग्रहे घटानधिकरणमित्यादिकस्तु मध्यपदप्रधानस्तत्पुरुषो न बहुनामगर्भो नवैकत्र द्वयमितिन्यायेन स्वार्थस्य बोधक इति सम्प्रदायविदः।

स्यादेतत् समासानां समुदायशक्तत्वे वाचस्पतिर्मितायाः स श्यामे कण्ठे व्रणः पुमान् इत्यादौ वाचि मितायाः कण्ठे च श्यामादेरभेदेनान्वयो वागादेः पदार्थैकदेशत्वेन तत्र पदान्त-

दार्थस्य पशुरपशुर्गगनं समवेतमित्यादाविव निराकाङ्क्षत्वादेव पत्नरा द्विजातिस्वाध्यायो जटाभिस्तापसस्तृतेत्यादौ पत्नीसह-भावस्य द्विजातौ जटावैशिष्ट्यस्य च तापसे भेदेनापि नान्वयो यथाकाममभिधानादित्यादौ। यौगिकत्वे तु तत्र तत्र तथा-विधान्वयो दुर्वारो वाक्प्रभृतेः पदार्थत्वादिति चेन्न वृत्त्येक-देशपदस्वार्थसम्बन्धस्य कारकस्य वा बोधकान्यविभक्तेः स्वार्थानु-भावकतायां निराकाङ्क्षत्वादेव तस्य निरस्तत्वादतएव चैत्रस्य गुरुकुलं शरैः शातितपत्रक इत्यादौ गुर्वादिपदस्य वृत्त्येकदेश-त्वेऽपि तदर्थे षष्ठ्यर्थसम्बन्धस्य तृतीयार्थकरणत्वादेश्चान्वयः सर्वसिद्धः। समासस्येव क्यजादिप्रत्ययान्तस्यापि वृत्तित्वात् परिष्कृतायाः मततं यस्तु वाचस्तौयते। सम्पदा जटया वापि पुत्रीयति स पुरुष इत्यादेरपि वागाद्यंशे परिष्कृतादेः पुत्राद्यंशे च सम्पदादेः सहभावादिबोधकतायां न सामर्थ्यमत-एव प्रतियोगिपदादन्यद्यदन्यत् कारकादपि। वृत्तिशब्दैक-देशार्थे न तस्यान्वय इष्यत इत्यपि पठन्ति कर्म चाण्डालयोगोत्थं कुरु पापक्षयं ममेत्यत्र च योगोत्थमित्यस्य योगप्रयोज्यमित्यर्थः स चाभेदेन पापक्षयेऽन्वितः। यस्मिन् राशिगते सूर्ये विपत्तिं यान्ति मानवाः। तेषां तत्रैव कर्त्तव्या पिण्डदानादिका क्रियेति वचनन्तु अमूलं समूलत्वे तु यस्मिन् राशौ गते सूर्ये इत्येव तत्र पाठ इत्यास्तां विस्तरः।

द्विगुं लक्षयति।

संख्याशब्दयुतं नाम तदलक्ष्यार्थबोधकम्।
अभेदेनैव यत्स्वार्थे स द्विगुस्त्रिविधोमतः॥

संख्यावच्छिन्नशक्तयत्पदोत्तरत्वविशिष्टं यन्नाम स्वार्थ-धर्मिकं तादात्म्येन तदलक्ष्यार्थस्यान्वयबोधं प्रति समर्थं तन्नामोत्तरतापन्नं तन्नामैव तदलक्ष्यार्थाभिन्नस्वार्थे द्विगुरुच्यते।

त्रिकटु त्रिभुवन चतुर्युग चतुर्वर्ग पञ्चगव्य पञ्चामृत षड्रस षट्पदार्थ सप्तर्षि अष्टनाग अष्टवसु नवरस नवग्रह दशमूल एकादशरुद्र एकादशेन्द्रिय द्वादशादित्यादिकस्तु कर्मधारय: शुण्ठ्यादिपर्य्याप्तत्रित्वावच्छिन्नबोधकतया न पूर्वपदालक्षणार्थस्य बोधकस्त्रिकटुप्रभृतिभ्य: कटुत्रयादिसामान्यस्याप्रतीते: पञ्चमूलोत्यादौ तु मूलपञ्चकत्वेनैव मूलविशेषेषु तात्पर्य्यं नतु विशेषरूपेणापि अतएव कण्टकार्य्यादिकं स्वल्पं गाम्भार्य्यादि च यन्महत्। पञ्चमूलं तदुभयं दशमूलमुदाहृतमित्यादिकस्तादृप्येण बोधस्तलौय: प्रयोग: वर्षाकाले सप्तर्षेण युक्ता चापि त्रयस्त्रशोत्यादिवदेकवचनस्य साधुत्वसम्भवात् द्वयो रूपमित्याद्यर्थे द्विरूपादिपदं नाभेदेन द्विप्रभृतेरनुभावकम् एकत्वसंख्यया विशिष्टं बोधयदपि एकपदं न पर्य्याप्तिसंसर्गेण तदवच्छिन्नस्य बोधकं द्वितयादिपदं पर्य्याप्त्या द्वित्वावच्छिन्नं प्रतिपादयदपि न तत्र शक्तं वाक्यत्वादतो नैकघटद्वितयपटेत्यादिकर्मधारयेऽतिप्रसङ्ग:। सप्तशतो पद्यतामित्यादौ च यद्यपि शते धर्मिणि सप्तानामभेदेन नान्वयो बाधितत्वान्नापि सप्तपदलक्षितस्य सप्तगुणितस्य द्विगुत्वहान्यापत्ते: तथापि शतपदार्थैकदेशे शतत्वसंख्यायां तस्या: सप्तत्वसम्भवादिति वदन्ति। द्विगार्ग्यं गच्छत इत्याद्यव्ययीभाववारणन्तु पूर्ववत्। स चायं द्विगुस्त्रिविध: तद्धितार्थोत्तरपदसमाहारभेदात्।

तत्र तद्धितार्थं द्विगुं लक्षयति।

> तद्धितार्थान्वितस्वार्थस्तद्धितार्थद्विगुर्मत:।
> तद्धितार्थे लाक्षणिकस्त्वन्यनामा त्वसर्वग:॥

यो द्विगु: स्वोत्तरतद्धितार्थान्वितस्वार्थक: स तद्धितार्थद्विगु:। द्विमुद्रो वृष इत्यादौ द्वाभ्यां मुद्राभ्यां क्रीतस्य द्विवर्षा गौरित्यादौ द्वाभ्यां वर्षाभ्यामभिन्नवयस्कस्य द्विदलं पवित्रमित्यादौ

द्वाभ्यां दलाभ्यां निर्मितस्य द्विगुञ्जं स्वर्णमित्यादौ द्वाभ्यां गुञ्जाभ्यां तुलितस्य त्रिकाण्डः पुरुष इत्यादौ त्रिभिः काण्डैः परिमितस्य पञ्चकपालश्चरुरित्यादौ पञ्चभिः कपालैः संस्कृतस्य बोधने लुप्तस्यैव ठगादितद्धितस्य क्रीताद्यभिधायकत्वात् परिशिष्टकृतां मतेनेदम्। उक्तप्रयोगेषु द्विगोरन्तिमनाम्नैव क्रीतादिरूपार्थो लक्ष्यते न तु लुप्तष्ठगादिरप्युदिच्यतेऽतस्तद्धितार्थलाक्षणिकस्यान्त्यनामको द्विगुरेव तद्धितार्थद्विगुरिति फणिभाष्यमतन्तु न युक्तम् असर्वगत्वात् पाञ्चपुरुषिरित्यादौ पञ्चानां पुरुषाणामपत्यस्य पञ्चगर्ग्यरूप्यो गौरित्यादौ पञ्चानां गर्गाणां भूतपूर्वस्य बोधने तद्धितेनैव स्वार्थस्यापत्यप्रभृतेरुपस्थापनात् द्विस्वर्णमुद्रः पशुरित्यादावुत्तरपदस्य शक्तिविरहेण क्रीताद्यर्थे लाक्षणिकत्वायोगाच्च।

उत्तरपदद्विगुं लक्षयति।

स्वान्तर्निविष्टशब्दाभ्यां शब्दान्तरसमासतः।
यो द्विगुः शाब्दिकैरुक्तः स उत्तरपदद्विगुः॥

यो द्विगुः स्वघटकनामभ्यां सह साकाङ्क्षनामान्तरेण समासस्यान्तर्गतः स उत्तरपदद्विगुः यथा पञ्च गावो धनमस्येत्यादिविग्रहे पञ्चगवधनः पुरुष इत्यादौ बहुव्रीह्यादिनिविष्टः पञ्चगवादिः।

समाहारद्विगुं लक्षयति।

स्वार्थान्वितसमाहारलक्षकस्वान्त्यशब्दकः।
उक्ताभ्यामितरः किं वा समाहारद्विगुर्द्विगुः॥

स्वोत्तरस्याद्यार्थस्य समाहारलक्षको यदीयान्त्यशब्दः स द्विगुः समाहारद्विगुः पञ्चपुलीत्यत्र हि योगलभ्यानां पञ्चाभिन्नपुलानां समाहारः परस्थपुलशब्देन लक्ष्यते न तु तत्र द्विगोः शक्तिरन्यलभ्ये शक्त्यायोगात् अतएव न लक्षणापि शक्यसम्बन्धस्यैव लक्षणा-

त्वेन वाक्ये तदसम्भवात्। यदि च पञ्चपुलीत्यत: पञ्चानां पुला-नामिव बोधो न तु तत्समाहारस्यापि अतएव पञ्चपुलीं छिनत्ति इत्यादिक: प्रयोग: प्रमाणम् अन्यथा समूहात्मन: समाहारस्य छिदाद्यसम्भवेन तदयोग्यत्वापत्ते: पुलादेर्हि त्वबहुत्वेऽप्येक-वचनस्यानुशासनिकं दारादेर्बहुवचनवदुपपद्यते। न च द्रव्य-प्राधान्ये पञ्चगवीत्यादौ ह्रस्वो न स्यात् गोशब्दस्येव स्त्रीप्रत्यय-स्यापि समासान्तस्योपसर्जनस्यैव तद्विधानादिति वाच्यं समा-हार संज्ञकद्विगोरप्यन्यस्य स्त्रीप्रत्ययस्य पृथगेव ह्रस्वविधेर्वक्तव्य-त्वात् प्रयोगानुसारित्वात् कल्पनाया: पञ्चपाचकीत्यादावव्याप्तिश्च तत्रोत्तरपदस्य वाक्यत्वेन लक्षकत्वायोगादिति सूक्ष्ममीक्षते तदा पूर्वनिरुक्ताभ्यां तद्धितार्थोत्तरपदद्विगुभ्यां भिन्नद्विगुरेव समाहारद्विगुर्बोध्य:। एवञ्च द्विगो: कर्मधारयान्तर्गतत्वेऽपि न क्षतिरिति तु विभावनीयम्।

तत्पुरुषं लक्षयति।

यदीयेन सुबर्थेन युतयत् बोधनक्षम:।
य: समासस्तस्य तत्र स तत्पुरुष उच्यते।

यदर्थगतेन सुबर्थेन विशिष्टस्य यदर्थस्यान्वयबोधं प्रति य: समास: स्वरूपयोग्य: स तदर्थस्य तदर्थे तत्पुरुष: न तु यन्नामोत्तरं यन्नाम यदर्थगतसुबर्थावच्छिन्नस्य यत्स्वार्थस्य बोधकं तदुत्तरं तन्नामैव तदर्थयोस्तत्पुरुष: पूर्वकायोऽर्द्धपिप्प-लीत्यादावव्याप्ते:। स्तोकपक्वेत्यादौ क्रियाविशेषणै: कर्म-धारय एव महाकविसन्निविष्ट इत्यादौ कविसन्निवादाविव प्रकृते-ऽप्येकनामार्थैकदेशे पचनादावपरनामार्थस्याभेदान्वयबोधकतया तच्छात्वसम्भवात् स्तोकं पक्वेत्यादौ समस्तादाख्यातवाचित्वे तु तत्पुरुष: सम्भवत्येव क्रियाविशेषणै: समास एवाव्युत्पन्न इति तु न देश्यं स्तोकनम्रा स्तनाभ्यामित्यादे: कालिदासाद्यै:

प्रयुक्तत्वात् द्विगौ कर्मधारये च शाब्दिकानां तत्पुरुषत्वव्यपदेशः पदसंस्कारार्थो गौणः।

विभजते।

द्वितीयादिसुबर्थस्य भेदादेव च षड्विधः।
क्रियान्वयी द्वितीयादेरर्थः प्रायोऽत्र योजितः॥

ग्रामगतः चैत्रनीतः ब्राह्मणदत्तः वृक्षपतितः चैत्रधनं मैत्रगतिः गृहस्थित इत्यादौ द्वितीयादिसुबर्थस्य कर्मत्वकर्तृत्वादेर्बोधभेदादेतस्य द्वितीयातृतीयादितत्पुरुषत्वेन षड्भेदाः स्वघटकैकपदार्थनिष्ठद्वितीयार्थावच्छिन्नापरपदार्थबोधकसमासादेर्धर्मषट्कस्य सुवचत्वात्। इयांस्तु विशेषो यदेतेषु धात्वर्थान्वय्येव द्वितीयादेरर्थः प्रायो घटकः पीठं परितः पुण्येन सुखं ग्रमाय विद्या दण्डाहृटः गवां कृष्णा सम्पन्नचौरा तिलेषु तैलमित्यादिविग्रहे तत्पुरुषस्यासाधुत्वात् वर्षसुखी लोष्टकाणः कुण्डलहिरण्यं घटान्यः कुवेरवलिः कर्मकुशल इत्यादौ तु तत्तद्विशेषविधेर्द्वितीयादितत्पुरुषः।

ननु ग्राम गत इत्यत्र गतौ ग्रामकर्मत्वस्य राजपुरुष इत्यत्र च पुरुषे राजसम्बन्धस्यावगमो न ग्रामादिपदेभ्यो लुप्तसुपः स्मरणात् तल्लोपमजानतोऽप्यन्वयबोधात् समृद्धं ग्रामगत इत्यादितः समृद्धग्रामयोरभेदान्वयधीप्रसङ्गाच्च सम्पन्नं दधि पश्येत्यादाविव तत्रापि नामार्थयोरभेदान्वयबोधोपयुक्तस्य नाम्नोः समानविभक्तिप्रतिसन्धानस्याविशिष्टत्वात् नापि ग्रामादिपदस्य ग्रामकर्मत्वादिलक्षकत्वात् अभेदान्यसम्बन्धेन नामार्थस्यान्वयबोधं प्रत्यनुकूलस्य नामोत्तरविभक्त्युपस्थाप्यत्वस्य तादृशप्रत्ययोपस्थाप्यत्वस्य वा गत्यादावसत्त्वात्। न च ग्रामादिपदलक्षितस्य ग्रामकर्मकादेरेव तत्र गत्यादौ तादात्म्येनान्वय इति साम्प्रदायिकानां मतमेव साम्प्रतं तत्पुरुषास्यापि समस्य-

मानपदार्थयोरभेदान्वयबोधकत्वे कर्मधारयत्वापत्तेः ग्रामं गतः राज्ञः पुरुष इत्यादिविग्रहस्य समासतुल्यार्थकत्वहान्यापत्तेश्चेति चेन्न प्रत्ययान्ततत्तन्नामार्थस्यैव भेदेनान्वयबोधं प्रति तत्तन्नामोत्तरप्रत्ययोपस्थाप्यतायास्तन्त्रत्वेन ग्रामगत इत्यादौ ग्रामादिपदलक्षितग्रामकर्मत्वादेर्गत्यादौ भेदेनान्वये बाधकाभावात्। नचैवं गतो ग्रामित्यत्रापि ग्रामपदलक्षितस्य ग्रामकर्मत्वादेर्गत्यादौ भेदेनान्वयबोधप्रसङ्गः प्रत्ययान्तान्यतत्तन्नामोपस्थाप्यार्थस्यान्वयबोधसामान्यं प्रत्येवोत्सर्गतस्तादृशतत्तन्नामोत्तरनामोपस्थाप्यत्वस्य हेतुत्वेन तदसम्भवात्। अत एवार्द्धपिप्पलीच्छेद इत्यादौ पूर्वपदप्रधानत्वेनानुशिष्टस्य तत्पुरुषादेरन्यपदार्थानां पिप्पलीप्रभृतीनां अर्द्धाद्यर्थे घटपटमठानामित्यादौ च सर्वपदप्रधानत्वेन द्वन्द्वस्यानन्यपदार्थानां घटादीनां सुबर्थे अन्वयः तथा बहुगुड़द्राक्षेत्यादौ गुड़ादीनामपि बहुजर्थे प्रकृत्यर्थस्येषदसमाप्तौ नाम्नः प्राग्बहुचो विधानादिति।

ननु यदि नामार्थयोरपि भेदेनान्वयो व्युत्पन्नस्तर्हि ग्रामगत इत्यादौ कर्मत्वादिसंसर्गेण ग्रामादेरेव गत्यादावन्वयोऽस्तु कृतं ग्रामादिशब्दस्य ग्रामकर्मत्वादिलक्षणयेति चेत्, सत्यं विग्रहवाक्यानां समाससमानार्थकत्वरक्षणाय तत्र लक्षणास्वीकारात् मास्तु वा ग्रामादिपदस्य तत्कर्मत्वादौ लक्षणा कर्मत्वादिसंसर्गेणैव ग्रामादेर्गत्यादावन्वयसम्भवात्तथापि न क्षतिः ग्रामं गत इत्यादिविग्रहस्यापि कर्मत्वार्थकद्वितीयाद्युपसन्धानवशादेव कर्मत्वादिसंसर्गेण गत्यादौ ग्रामाद्यन्वयबोधकतया समाससमानार्थकत्वसम्भवात् ग्राममित्यादौ कर्मत्वादिधर्मिकान्वयबोधानुरोधेन द्वितीयादेः कर्मत्वाद्यर्थकत्वात् अतएवाघटः पट इत्यादावन्यस्य असुरो दैत्य इत्यादौ विरोधिनः अनिन्द्रः अर इत्यादौ सदृशस्य अब्राह्मणो वार्द्धषिक इत्या-

दावपक्षष्टस्य अमुदःमुदरन्तरुण्या इत्यादौ खल्वस्य वाचकेन नञ्निपातेन स्वार्थ प्रतियोगित्वादिसम्बन्धेनैव घटादेरनुभावनेऽपि तत्रत्य तत्पुरुषे नाव्याप्तिः। पटस्याभाव इत्यर्थे प्रसज्यनञा अव्ययीभाव एव समासः प्रमाणन्तेनापट वर्त्तते इत्याद्येव तत्र प्रयोगस्तत्पुरुषस्योत्तरपदलिङ्गकत्वनियमात् इति वृद्धाः। प्रसज्यनञाप्यपट इत्यादिस्तत्पुरुषएव साधुर्नाव्ययीभावः नञ्तत्पुरुषविधेस्तदपवादकत्वात् अतएव वादिनामविवाद इत्यादिकः किरणावल्यादौ पुंसि प्रयोग इति तु पक्षधरमिश्राः। युज्यते चोत्तरः कल्पो नचेदेवं दर्शते राजमातङ्गास्तस्यैवामी तुरङ्गमाः। चैत्रो ग्रामगतस्तत्र मैत्र किं कुरुतेऽधुना। इत्यादौ राजसम्बन्धादे राजादिपदलक्ष्यत्वे तदेकदेशस्य राजादेस्तदा परामर्शो न स्यात् विशेष्यविधया वृत्त्या पूर्वोपस्थापितस्यैवार्थस्य परामर्शकत्वात् तदादिशब्दानां न हि प्रजावतीयं मे त्वं तस्मै देहि कम्बलम्। नीलो मणिर्गुणः सोऽत्र भ्रात्रादिर्बोध्यते तदा।

नन्वेवमनयैव रीत्या निषादस्थपतिं याजयेदिति श्रुतौ निषादानां स्थपतिरिति व्युत्पत्त्या न तत्पुरुषः परन्तु निषादः स्थपतिरित्यर्थे कर्मधारय एवेति सिद्धान्तो व्याहन्येत तत्पुरुषे भक्तिभिया हि तत्र कर्मधारयस्वीकारस्तन्मूलके निषादस्याधानेऽपूर्वविद्याप्रयुक्तिश्च कल्पते कल्पते च निषादीयतत्तदध्ययने निषेधविधिबाधात् स्त्रीशूद्रौ नाधीयेतामिति श्रुतौ तत्तदध्ययनेतराध्ययनपरत्वं धातोः शूद्रपदस्य त्रैवर्णिकान्योपलक्षकत्वात्। यदि च कर्मधारय इव तत्पुरुषेऽपि न लक्षणा तदा तत्पुरुष एव तत्रोचितस्त्रैवर्णिकस्यैव निषादीयस्थपतित्वेन प्राप्तौवपूर्वविद्याप्रयुक्तेस्तन्मूलकनिषेधविधिसङ्कोचस्य चाकल्पत्वादिति चेत् तत्पुरुषे लक्षणापक्षेऽपि किमिति कर्मधारय एव तत्राभ्युपेयते

न तु तत्पुरुषः निषादानां स्थपतिरिति व्युत्पत्त्या निषादस्थपतिपदान्निषादसम्बन्धवत्त्वेन स्थपत्यनुभवसहस्रस्य सर्वसिद्धत्वेन तदनुरोधाल्लक्षणायाः क्लृप्तत्वेन तत्कल्पनाभयस्यासम्भवात् न हि निषादस्थपत्यादिपदं निषादादिसम्बन्धवत्तया स्थपत्यादिबोधने निराकाङ्क्षं तथा सति निराकाङ्क्षत्वादेव तत्पुरुषत्वासम्भवेन लक्षणापत्तेस्तद्बाधकतयोपन्यासानौचित्यात्। अथ बाधकं विना मुख्यार्थ एव श्रुतीनां प्रामाण्यं न तु प्रमाणान्तरविषयेऽपि लक्ष्यार्थे मुख्ये शब्दस्वरस इत्यादिमीमांसया तथैव सम्प्रतिपत्तेरिति चेत्तर्हि बाधकाभावे कर्मधारयविधयैव वेदानां प्रामाण्यं न तु प्रामाणान्तरविषयेऽपि तत्पुरुषविधया कर्मधारयात् समासान्तरस्य दौर्बल्यमित्यादिमीमांसया तथैव प्रतिपत्तेरित्यपि किन्न रोचयेः। तत्पुरुषाद्बहुव्रीहेर्जघन्यत्वमित्यत्राप्युक्तैव रीतिरनुसर्त्तव्या न हि बहुव्रीहौ समस्तपदानां लाक्षणिकत्वादेव ततो दुर्बलत्वम् एकपदमात्रलक्षणयापि बहुव्रीहेर्व्यवस्थाप्यत्वात् इति आस्तां विस्तरः।

अव्ययीभावं लक्षयति।

> उत्तरार्थान्वितस्वार्थोऽव्ययपूर्वस्तु यो भवेत्।
> समासः सोऽव्ययीभावः स्त्रीपुंलिङ्गविवर्जितः॥

यः समासः स्वोत्तरपदोपस्थाप्येन यदर्थेनान्वितस्य यदर्थस्य बोधकाव्ययपूर्वभागकः स तद्विशिष्टस्य तदर्थस्य बोधनेऽव्ययीभावः गृहे निर्मक्षिकम् उपकुम्भमित्यादौ हि मक्षिकाया अभावः कुम्भादेश्च सामीप्यादिर्मक्षिकादिपदप्राग्वर्त्तिना निराद्यव्ययेनानुभाव्यते अर्द्धशरीरमित्यादौ उत्तरपदार्थान्वितस्वार्थबोधकमप्यर्द्धपदं नाव्ययं निर्मक्षिका भूमिः निर्मनुष्यो देश इत्यादौ तु मक्षिकादेरभाववन्तं बोधयन्नपि निर्मक्षिकादिक-

स्तत्पुरुषो न ताहशार्थे स्त्रीपुंलिङ्गकार्य्यविधुर इति तत्र न प्रसङ्गः।

नन्वक्षस्याक्षस्य शलाकाया वा च्युतेऽन्यथा पातनमित्यर्थेऽक्ष-परि शलाकापरि इति अव्ययीभावेऽव्याप्तिस्तस्याव्ययगर्भत्वेऽपि तत्पूर्वकत्वाभावात् एवं द्वौ गार्ग्यौ इत्यर्थे द्विगार्ग्यं गच्छत इत्यादौ द्वाभ्यां दण्डाभ्याम् इत्यर्थे द्विदण्डि प्रहरतीत्यादौ तिसृणां यमुनानां समाहार इत्यर्थे त्रियमुनं स्नातीत्यादौ लोहिता गङ्गा यस्मिन्नित्यर्थे लोहितगङ्गं देश इत्यादौ दण्डेन मिथः प्रहृत्य वृत्तमित्यर्थं दण्डादण्डि रणमित्यादौ केशेषु मिथः प्रगृह्य वृत्त-मित्याद्यर्थे केशाकेशि युद्धमित्यादौ खले यवा यदा संहृता यवा यदा तिष्ठन्तो गावो यदेत्याद्यर्थे खलेयवं संहृतयवं तिष्ठद्गु वा काल इत्यादौ द्विगार्ग्यद्विदण्ड्यादिष्वपि तेषु अव्ययगर्भत्व-स्याप्यभावादतः प्रकारान्तरेण निर्वक्ति।

समादेशं विना श्रूयमाणषष्ठी न बोधिका।
स्वार्थे यदर्थस्य यद्वा सोऽव्ययीभाव इष्यते॥

समादेशं विना श्रूयमाणषष्ठी स्वार्थे यत्समासार्थस्यान्वय-बोधं प्रत्यसमर्था स एव वाव्ययीभावः श्रूयमाणैव षष्ठी स्वार्थे समासान्तरार्थस्यान्वयबोधने समर्था न तु लुप्तापि क्रतयो-रक्षपरिव्यर्थत्वमित्यादौ त्वव्ययीभावार्थस्य लुप्तापि क्रतयो-रेकाचान्यथापातनयोर्निष्फलत्वमित्यन्वये लुप्तषष्ठ्यैव पातनस्य सम्बन्धप्रत्यायनात्। स्निग्धस्योपगङ्गं पावित्र्यमित्यादौ स्निग्धस्य गङ्गासमीपस्य पवित्रत्वमित्याद्यन्वये समीपादेः सम्बन्धः श्रुतयाप्यसमादेशवशादेव षष्ठ्यानुभाव्यते इति न तत्रोप-गङ्गाद्यव्ययीभावेऽव्याप्तिः अनुगङ्गेन सञ्चारः उपगङ्गेषु पूतत्व-मुपकुम्भादानीतमित्यादावसमादेशं विनापि श्रूयमाणाभिस्तृ-

नौयामसम्यादिसुब्भिरव्ययीभावार्थस्य करणत्वाधिकरणत्वादिकं बोध्यत इति षष्ठोपर्य्यन्तानुसरणम्।

बहुव्रीहिं लक्षयति।

बहुव्रीहिः स्वगर्भार्थसम्बन्धित्वेन बोधकः।
निरूढ़या लक्षणया स्वांशज्ञापकशब्दवान्॥

समास इति प्रकृतं तथाच स्वांशस्य निरूढ़लक्षणया ज्ञापकेन शब्देन घटितः स्वगर्भस्य यादृशार्थस्य सम्बन्धित्व-प्रकारेणान्वयबोधं प्रति समर्थः समासः स्वगर्भतादृशार्थ-सम्बन्धिबोधने बहुव्रीहिरित्यर्थः। आरूढ़वानरो वृक्ष इत्य-त्रारूढ़ो वानरो यमिति व्युत्पत्त्या स्वकर्मकारोहणकर्तृवानर-सम्बन्धित्वेन वृक्षपीतपयस्कं पात्रमित्यत्र पीतं पयो येन इति रीत्या स्वकरणकपानकर्मजलसम्बन्धित्वेन पात्रं पक्वतण्डुलश्चैत्र इत्यत्र पक्वस्तण्डुलो येनेति दिशा स्वकर्तृकपाककर्म तण्डुल-सम्बन्धित्वेन चैत्रं दत्तदक्षिणो द्विज इत्यत्र दत्ता दक्षिणा यस्मै इति क्रमेण स्वसम्प्रदानकदानकर्मदक्षिणासम्बन्धित्वेन द्विजं पतितपत्रस्तरुरित्यत्र पतितं पत्रं यस्मादिति विग्रहेण स्वापा-दानकपतनाश्रयपत्रसम्बन्धित्वेन तरुं चित्रगुरित्यत्र चित्रा गौर्यस्येति वाक्यानुसारेण चित्राभिन्नस्वगोसम्बन्धित्वेन चैत्रं रक्तपटः काय इत्यत्र रक्तः पटो यत्रेति व्युत्पत्त्या रक्ताभिन्न-स्ववृत्तिपटसम्बन्धित्वेन कायम् एवं वाणच्छिन्नकरो नर इत्या-दावपि वाणेन छिन्नः करो येन यस्य वा इत्यादि विग्रहे वाण-करणकस्वकर्तृकच्छिदाकर्मकरसम्बन्धित्वादिना नरादिकं बहु-व्रीहिर्बोधयतीति सर्वत्र स्वगर्भतत्तदर्थसम्बन्धित्वेन धर्मिणाम-वगमः। दक्षिणपूर्वा पूर्वोत्तरेत्यादिविदिग्बहुव्रीहिस्थले दक्षिणया पूर्वा यस्या इत्यादिविग्रहेण स्वपार्श्वस्थदक्षिणसहित-पूर्वसम्बन्धित्वादिना आग्नेयीप्रभृतीनां विदिशां बोधः। अस्ति-

क्षीरा नास्तिक्षीरा गौरित्यादावप्यस्ति क्षीरं यस्या इत्यादि-विग्रहेणास्तित्ववत्क्षीरसम्बन्धित्वादिप्रकारेण गवादेरवगतिः इयांस्तु विशेषो यत्त्वेकेषां मतेऽस्तीत्यादिकं तिङन्तमन्येषां तत्प्रतिरूपकाव्ययमिति। उप समीपे दश येषामिति समीप-गणितत्वार्थकषष्ठ्या विग्रहादुपदशाः शकुनय इत्यादौ स्वसमीप-गणितदशसम्बन्धित्वेन नवानामेकादशानाञ्च पक्षिणामवगम-स्तत्र दशशब्दस्य दशत्वलक्षणया स्वपर्य्याप्तसंख्यासमीपगणित-दशत्वसम्बन्धित्वेनैव नवादेर्बोध इति दुर्गप्रभृतयः। अधिका दश येषामित्यादिविग्रहे अधिकदशाः पुरुषा इत्यादावपि स्वपर्य्याप्तसंख्याधिक दशवृत्तिसंख्यापर्य्याप्त्यधिकरणदशसम्बन्धि-त्वेन नवादिपुंसां प्रत्ययः। द्वौ त्रयो वा येषां इत्यन्यतरार्थक-वाशब्देन विग्रहे द्वित्राः पवित्राः परमित्यादौ द्वित्र्यन्यतर-पर्य्याप्तस्वपर्य्याप्तसंख्यासम्बन्धित्वेन द्वयोस्त्रयाणां वा पवित्राणां बोधः पटे घटे वा घटत्वमित्याद्यनुरोधेन वाकारस्यान्यतरार्थ-कताया व्युत्पाद्यत्वात् तस्य च वृत्तौ गतार्थत्वादश्रुतिः पञ्च षड्वा येषामित्यादिविग्रहात् पञ्चषाः पुरुषा इत्यादावप्युक्तरीत्यै-वान्वयो द्रष्टव्यः। परे तु द्वौ वा त्रयो वा येषामित्यादिविग्रहे वाशब्दस्य संशयकोट्यर्थकतया द्वित्रा इत्यादि बहुव्रीहेः स्वधर्मिकसंशयकोटितापन्नद्वित्रिसम्बन्धित्वेन द्विप्रभृतिबोध-कत्वमित्याहुः।

द्विस्त्रयो येषामिति विग्रहे तु द्विशब्दस्य द्विगुणितवाचित्वेन द्विगुणितत्रिपर्य्याप्तस्ववृत्तिसंख्यासम्बन्धित्वेन द्वित्रा रसा इत्यादौ षसामवगमः सुजन्तभाविनैव विग्रहस्य व्युत्पन्नत्वाच्च पञ्चकृत्वो दश येषामित्यर्थे पञ्चदशा इत्यादिको न समासः सर्वत्रोक्तबहुव्रीहौ राजादित्वादतिचरमस्वरादेर्लोपः। स्वधन-सम्बन्धी चैत्र इत्यादौ स्वधनस्य सम्बन्धीति व्युत्पत्त्या

स्वगर्भार्थस्य सम्बन्धित्वेन चैत्रं बोधयन्नपि तत् पुरुषो न स्वांशस्य निरूढ़लक्षणया प्रत्यायकपदेन घटितः। तथा आधुनिकलक्षणया स्वपटबोधकेन पटपदेन गर्भितः पट-सम्बन्धीत्यादिरपि। मातृभक्त इत्यादिकस्तु तत्पुरुषः स्वमा-तृत्वेन निरूढ़लक्षणया बोधकेन विशेषितोऽपि न तत्स-म्बन्धित्वेन बोधकः। न च द्वौ मुनी त्रयो वा मुनयो यस्येति वक्तृत्वार्थकषष्ठ्या विग्रहे स्ववक्तृमुनिद्वयादिसम्बन्धित्वेन बोधके द्विमुनि त्रिमुनि वा ग्रन्थ इत्यादौ द्विमुन्याद्यव्ययीभावे स्वमातृ-सम्बन्धित्वेन बोधके मातृसम्बन्धीत्यादि तत्पुरुषे चातिव्याप्ति-स्तदन्यत्वेनापि विशेषणीयत्वात्। इदमत्रावधातव्यं चित्रगुर-स्तीत्यादौ चित्राभिन्नस्वगोसम्बन्धिप्रभृतीनां प्रतीत्यर्थं न चित्र-गुसमुदायस्य लक्षणा तस्य वाक्यत्वेन लक्षकत्वायोगात् वाक्ये लक्षणायाः प्रागेव परास्तत्वात्। न च चित्रपदमेव तत्र चित्राभिन्नस्वगोसम्बन्धि लक्षकं गोपदन्तु तादृशार्थे तात्पर्य्य-ग्राहकं लक्षणाया निरूढ़त्वसम्पादकं वेति वाच्यं चित्रपदस्य प्रथमान्तत्वाभावेन तदर्थेऽस्तित्वाद्यन्वयस्यानुपपत्तेः प्रथमान्त-पदोपस्थाप्यस्यैव भावनाविशेष्यत्वात्। अन्यथा राजपुरुषो-ऽस्तीत्यादावपि राजन्यस्तित्वान्वयप्रसङ्गात् प्रकृत्यर्थ एव सुपः संख्याबोधकत्वव्युत्पत्तेः गोपदोत्तरप्रथमया चित्रपदोपस्थाप्ये चित्राभिन्नस्वगोसम्बन्धिन्येकत्वबोधनायोगाच्च। यत्तु गोपद-मेव तादृशगोसम्बन्धिलक्षकं चित्रपदन्तु तत्र तात्पर्य्यादि-ग्राहकमिति मणिकारादुक्तं तन्न युक्तं पूर्वपदार्थसाकाङ्क्षस्यैव स्वार्थस्योपसर्जनतायां गोपदस्य ह्रस्वविधानात् चित्रपदार्थेन समं तदर्थस्यानन्वये तदनुपपत्तेरन्यथा गौरस्तीत्यादावपि चित्राभिन्नस्वगोसम्बन्धित्वेन गोपदस्य लक्षणायामुदन्तत्वापत्तेः न च नामोत्तरवर्त्तिन एव गोपदस्य स्वार्थोपसर्जनतायां ह्रस्व-

विधिर्यत्र गोपदेन लक्षणयोपस्थापिते स्वगोसम्बन्धिन्यभेदेन चित्रपदस्यान्वयः तत्र चित्रगवोऽस्तीत्यादिकर्मधारयेऽपि गोपदस्य क्लीबत्वप्रसङ्गात् वस्तुतः कृतपाकश्चैत्र इत्यादौ स्वकृतिविषयपाकसम्बन्धित्वादिना चैत्राद्यवगमः पूर्वपदस्य परपदस्य वा लक्षणया न सम्भवदुक्तिकस्तयोरशक्तत्वेन भाक्तत्वायोगात्। न च तत्र कादिवर्णस्य स्वरूपशक्तघञादिप्रत्ययस्य वा स्वकृतिविषयपाकसम्बन्धिनि लक्षणा तन्निरूढत्वसम्पादकञ्च शब्दान्तरमिति साम्प्रतं कृतादिपदेभ्यः स्वार्थानुपस्थितावपि तदन्वयबोधप्रसङ्गात् घञादिमात्रस्य नामत्वाभावेन तन्मात्रोपस्थाप्यार्थे सुबर्थान्वयायोगात् प्रकृत्यर्थावच्छिन्नस्यैव कृदर्थस्य पदार्थान्तरेऽन्वयबुद्धेर्व्युत्पन्नत्वाच्च तस्माच्चित्रगुरित्यत्र गोपदं सगोसम्बन्धिलक्षकं तदेकदेशे च गवि तादात्म्येन चित्रपदस्यान्वयः। न च गोधर्मिकान्वयबुद्धौ तद्धर्मिकवृत्तिज्ञानत्वेन हेतुत्वात् पदार्थैकदेशे गवि चित्रस्यान्वयो दुर्घटः चित्रव्रजोऽस्तीत्यादौ गोस्थानरूपस्य व्रजस्यैकदेशे गवि चित्रस्यानन्वयेन तादृशव्युत्पत्तेरावश्यकत्वादिति वाच्यं घटशून्यं चैत्रनमेत्यादि तत्पुरुषे भेदेनैव चित्रगुप्रभृतिबहुव्रीहावप्यभेदेन पदार्थैकदेशधर्मिकान्वयबोधस्य व्युत्पत्तिवैचित्र्येण सम्भवात् फलानुरोधित्वात् कल्पनायाः प्राच्यैरपि सुन्दरराजपुरुष इत्यादावभेदेन सुन्दरादेः पदार्थैकदेशे राजन्यन्वयबुद्धेः स्वीकाराच्च। यत्तु गोपदं तत्र स्वकीयगोत्वेन सम्बन्धित्वेन च लक्षकमतश्चित्रस्य गोपदार्थ एव स्वकीये गवि तस्य च सम्बन्धिनि अन्वयान्न पदार्थैकदेशान्वयित्वमेकपदार्थयोश्च मिथोऽन्वयः कृतिवर्त्तमानत्वयोरिव नाव्युत्पन्न इति तन्मन्दं तथा सति चित्रगुः पुरुषस्तस्याः सञ्चारोऽतिमनोहर इत्यादौ तदादेः स्वकीयत्वादिपरामर्शकत्वापत्तेः पदार्थैकदेशस्यैव परामर्शकतायास्तदादावव्युत्पन्नत्वादिति। एवञ्चारूढवानरो

वृच इत्यादावपि वृहधातुना स्वकर्मकारोहणकर्तृवानरपदेन च वानरसम्बन्धिन उपस्थापनादमीषामाकाङ्क्षादिधीसाचिव्यादेव स्वकर्मकारोहणकर्त्रभिन्नवानरसम्बन्धित्वादिना वृच्चादेर्बोध इत्यास्तां विस्तरः।

न चारूढो वानरो यस्य वृक्षमित्यादिविग्रहादारूढवानरपदं स्वकीयत्वारूढवानरसम्बन्धित्वेन ग्रामादिकं बोधयदपि बहुव्रीहिः स्यादन्तादृग्वाक्यस्य विग्रहत्वं खण्डयन्नाह।

अस्यैकं प्रथमान्तं सत् सुबन्तैरितरैः सह।
यदा भेदसुबन्तेन साकाङ्क्षं नाम विग्रहः॥

अस्य बहुव्रीहेर्घटकमेकं नाम प्रथमान्तं सत् सुबन्तैरितरनामभिः सह भेदार्थकसुबन्तयच्छब्देन साकाङ्क्षं विग्रहः कथ्यते नचोक्तवाक्ये तथा सुबन्तस्यापि यदस्तत्र वृक्षपदेनैव साकाङ्क्षत्वात् आरूढो वानरो य इत्यादौ तु यच्छब्दो न भेदार्थकसुबन्त इति न तादृशस्यापि वाक्यस्यार्थे बहुव्रीहिः पतितस्य धनं यस्य दण्डाद्घटो यस्मादित्यादिकस्तु समानार्थकसुबद्द्वयोमन्तर्भाव्य न विग्रहः सम्प्रदायविरोधात् एवं घटेन पटो यत्रेत्यादिकः सहार्थमन्तर्भाव्यापि सुबन्तैरिति तु मध्यवाभिप्रायं तेनाघटो देश इत्यादिबहुव्रीहेर्न घटो यत्रेत्यादिविग्रहेण नञादेः सुबन्तत्वाभावेऽपि नाव्याप्तिः नपुत्र इत्यादौ तु सह पुत्रो येनेत्यादिरेव विग्रहो न तु पुत्रेण सहेत्यादिरन्यपदार्थाप्राप्तेः सघटो देश इत्यादौ च सह घटो येनेत्यादिविग्रहे सहार्थो वैशिष्ट्यं न तु सामानाधिकरण्यं घटे देशस्य तद्बाधात्। जीवत्पितृकइत्यादेस्तु जीवन् पिता यस्येति विग्रहो यस्य च पिता जीवन्नित्येवं जीवद्विधेयकान्वये निराकाङ्क्षोऽपि जीवदभिन्नः पिता यदीय इत्यन्वय एव साकाङ्क्षः। इदन्तु बोध्यं यत्र विग्रहवाक्ये सुबन्तपदः क्रियासाकाङ्क्षत्वसम्भवस्तत्र तदर्थान्वितक्रियागर्भित

स्वार्थं विना बाधकं बहुव्रीहिर्व्युत्पन्नः तेन गन्तव्यो ग्रामो यस्येति विग्रहे गन्तव्यग्रामकश्चैत्र इत्यादितः स्वकर्तृक गति-कर्मग्रामसम्बन्धित्वेनैव चैत्रादेरौत्सर्गिको बोधः कदाचित्तु तात्-पर्य्यादिवशाद्गन्तव्याभिन्नस्वकीयग्रामसम्बन्धित्वेन यत्र तु न यद्-स्तत्साकाङ्क्षत्वसम्भवस्तत्र विशेष्यविधयान्वये यन्नामार्थमुख्य-विशेष्यको विग्रहवाक्याद्बोधः सुबन्तयदर्थान्वित तन्नामार्थ-गर्भित एवार्थोऽतएव धनी दासो यस्येत्यर्थे यदीयधनवान् दास-स्तस्य धनिदासकोऽयमित्यादितो नावगमः किन्तु धनवत् स्वदाससम्बन्धिन एव चन्द्रश्चूडायां यस्येत्यादिकस्तु विग्रहो न यदीयश्चन्द्रश्चूडायामित्यर्थकः किन्तु यदीयचूडायां चन्द्र इत्यर्थकस्तादृशार्थे एव सप्तम्यन्तेनेन्द्वादेर्विशेषतो बहुव्रीहि-विधानात्तेन चन्द्रचूडः शिव इत्यादौ स्वचूडावृत्तिचन्द्रसम्बन्धि-त्वेनैव शिवस्यावगमो न तु चूडावृत्तिस्वकीयचन्द्रसम्बन्धित्वेन तस्य गगनादेर्वा बोधः ससम्बन्धिकपदार्थस्य विशेषणत्वस्थले तु सुबन्तयदर्थान्वितेन तादृशपदस्यार्थेन गर्भितेऽपि अतएव चैत्रः पुत्रकृतोत्कर्ष इत्यादौ स्वपुत्रकृतोत्कर्षवानेव चैत्रादिः प्रतीयते नत्वन्यदीयपुत्रकृतोत्कर्षाश्रयः।

बहुव्रीहिं विभजते।

> तदतद्गुणसंविज्ञानौ द्वौ भेदौ तदादिमः।
> विग्रहस्य विशेष्यो यस्तद्विशेष्यकबोधकृत्॥

तद्गुणसंविज्ञानोऽतद्गुणसंविज्ञानश्च बहुव्रीहेर्द्वौ भेदौ तत्र विग्रहवाक्यस्य विशेष्यविधया प्रत्याय्यो योऽर्थस्तद्विशेष्यकबोध-कृद्बहुव्रीहिः तयोरादिमस्तद्गुणसंविज्ञानस्तस्य स्वार्थगुणी-भूतस्य सम्यग्विशेष्यविधया विज्ञानं यस्मादिति व्युत्पत्त्या सान्वयसंज्ञाकत्वात् तद्भिन्नस्त्वतद्गुणसंविज्ञानश्चरम इत्यर्था-द्गम्यते घटस्वरूपः पदार्थः इत्यादितो हि घटः स्वरूपं यस्येति

विग्रहस्थले स्वस्वरूपाभिन्नघटसम्बन्धित्वेन घटाभिन्न स्वस्वरूप-सम्बन्धित्वेन वा विग्रहविशेष्यं कलसमेव विशेष्यविधया बोध्यते घटस्य स्वरूपं यस्मादिति विग्रहे च विग्रहस्य यद्विशेष्यं ततोऽन्यदेव स्वजन्यस्वरूपाभिन्नघटसम्बन्धित्वेन कुटादिर्गण इत्यादिरपि कुट आदिर्यस्येति व्युत्पत्त्या कुटाभिन्नस्य स्वधर्मिक व्यवस्थाधर्मिणः सम्बन्धित्वेन धात्वन्तरमिव कुटमपि बोधयं स्तद्गुणसंविज्ञान एव बहुव्रीहिः।

प्राचां मतेन तद्गुणसंविज्ञानबहुव्रीहिमन्यथा निर्वक्ति।

य: स्वार्थघटकार्थस्य स्वार्थान्वयिनि बोधने।
अनुकूलो बहुव्रीहिः स तयोरथवादिमः॥

यो बहुव्रीहिः स्वार्थस्यान्वयिनि स्वार्थघटकस्याप्यर्थस्या-न्वयबोधने समर्थः स तयोस्तद्गुणसंविज्ञानयोरादिमः लम्ब-कर्णमानय हारग्रीवं पश्येत्यादौ हि बहुव्रीहिर्लम्बस्वकर्णसम्ब-न्धिनः स्वग्रीवावृत्ति हारसम्बन्धिनश्च स्वार्थस्यान्वयिनि कर्मत्वादौ स्वार्थघटकीभूतस्य तादृशकर्णहारादेरपि व्युत्पत्तिवैचित्र्येण-णान्वयबोधने समर्थ इत्येवं विध एव तद्गुणसंविज्ञानस्तद्भिन्न एव चार्थादतद्गुणसंविज्ञानः यथा दृष्टसागरमानय इत्यादा-विति प्राचां मतम्।

व्युत्पत्तिवैशद्यार्थमन्यथापि पुनर्विभजते।

स्वान्तर्निविष्टद्वित्र्यादिनामभिर्विग्रहात् पुनः।
बहुव्रीहिर्बहुविधो द्विपदत्रिपदादिकः॥

द्वित्रिचतुरादिभिरेव स्वघटकनामभिर्विग्रहवशात् द्विपद-त्रिपदचतुष्पदादिको बहुव्रीहिर्बोध्यः चित्रा गावोऽस्येति विग्रहा-च्चित्रगुरित्यादौ द्विपदस्यैव जरतो चित्रा गावोऽस्य महन्नीलमुत्-पलं यचेत्यादि विग्रहाज्जरती चित्रगुश्च तौ महन्नीलोत्पला वरितित्यादौ त्रिपदस्यापि बहुव्रीहेरावश्यकत्वात् जरतो चित्र-

गवो यस्य मत्तनीलोत्पलं यत्रेति द्विपदविग्रहे जरतीशब्दे पुंवद्भावस्य मत्तशब्दे चाकारस्य प्रसङ्गादुत्तरपदे तयोर्विधानात् समासान्त्यपदस्य चोत्तरपदत्वात् एकत्र द्वयमिति न्यायेन गवि शिवजरतीरभेदानुभवस्योक्तरीत्या सम्पादयितुमशक्यत्वेन तदर्थमेव त्रिपदादिबहुव्रीहेरावश्यकत्वाच्च ।

द्वन्द्वं लक्षयति ।

यद्यदर्थकयन्नामव्यूहो यद्यत्प्रकारके ।
बोधे समर्थः स द्वन्द्वः समासस्तावदर्थकः ॥

यद्यदर्थोपस्थापकस्य क्रमिकयादृशनामस्तोमस्य निश्चयस्तत्तदर्थप्रकारकान्वयबोधं प्रति तत्त्वेन समर्थस्तादृशनामनिवह एव तावदर्थको द्वन्द्वसमासः । पाणिपादं वादय धवखदिरौ छिन्धीत्यादौ हि कर्मत्वाद्यंशे करचरणादिप्रकारकान्वयबोधं प्रत्यमादिधर्मिकः करचरणाद्युपस्थापकस्य पाणिपादादिक्रमिकनामस्तोमस्याव्यवहितोत्तरत्वसम्बन्धेन निश्चयः कारणम् अतः पाणिपादादिसमुदायः करचरणादितत्तदर्थे द्वन्द्वः । यत्तु पाणिपादमित्यादौ समाहारद्वन्द्वे सर्वत्रोत्तरपदे पाणिपादादिसाहित्ये लक्षणा अतएव नित्यं तत्रैकवचनं समाहारस्यैकत्वात् पदान्तरन्तु तादृशलक्षणाया निरूढत्वसम्पादकं तथाविधसाहित्यस्य च स्वाश्रयनिष्ठत्वादिसम्बन्धेनैव द्वितीयाद्यर्थकर्मत्वादौ साकाङ्क्षत्वात् पाणिपादं वादयेत्यादेर्नायोग्यत्वमिति प्राच्यैरुक्तं तन्न युक्तं तुल्यवदेकक्रियान्वयित्वं बुद्धिविशेषविशेष्यत्वं वा पाणिपादयोः साहित्यं तस्य च नानात्वसम्भवेन तद्गतद्वित्वादिबोधार्थं समाहारद्वन्द्वादपि द्विवचनाद्यापत्तेर्दुर्वारत्वात् । साहित्यस्य द्विबहुत्वेऽपि न समाहारद्वन्द्वस्य द्विवचनादिसाकाङ्क्षत्वं तादृशद्विगोरिवेति चेत् तर्हि पाणिपादप्रभृतीनां नानात्वेऽपि न तदर्थकस्य द्वन्द्वस्य द्विवचनाद्याकाङ्क्षत्वमित्येव वक्तु-

सुचितं कृतं साहित्यभङ्गा हस्त्यश्वं धनमित्यादेरयोग्यतायाः दुर्वारतापाताच्च नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वेन हस्तिनामश्वानाञ्च साहित्यस्य स्वाश्रयत्वादिसम्बन्धेन धनादावन्वयायोगात् तादृशसाहित्ये धनादेरभेदविरहाच्च समाहारपरिभाषा तु क्लीवलिङ्गत्वनित्यैकवचनत्वादिपदसंस्कारोपयोगितयैवोपपन्ना न इन्द्वस्यार्थव्यवस्थापिका। एतेन धवखदिरावित्यादावितरेतरद्वन्द्वेऽप्युत्तरपदे धवखदिरसाहित्याश्रये लक्षणा अन्यथा द्विवचनादेः प्रकृत्यर्थतावच्छेदकवत्येव पर्य्याप्तिसम्बन्धेन स्वार्थद्वित्वाद्यनुभावकत्वव्युत्पत्तेर्धवखदिरावित्यतो धवद्वयस्य खदिरद्वयस्य च प्रतीत्यापत्तेरिति मीमांसकानां मतमप्यपास्तं तुल्यवदेकक्रियान्वयित्वं धवखदिरविशेष्यकधीविशेष्यत्वं वा धवखदिरयोश्च साहित्यं तदाश्रयश्च धवद्वयादिकमपीति तादृशसाहित्याश्रयलक्षकत्वपक्षेऽपि धवखदिरावित्यतो धवद्वयादिबोधस्य दुर्वारतापत्तेः न च त्रितया विशेष्यकधवखदिरधर्मिकधीविशेष्यत्वमेव प्रकृते धवखदिरयोः साहित्यं तच्च न धवद्वयादेरिति वाच्यं तादृशसाहित्यान्वयस्यानुभवेनास्पर्शनात् तस्मात् यत्र नानाधर्माणां प्रकृत्यर्थतावच्छेदकत्वं तत्र तत्तद्धर्मावच्छिन्ने समुदित एव पर्य्याप्तिसम्बन्धेन द्वित्वादिबोधने द्विवचनादिकं साकाङ्क्षं न तु तादृशैकधर्मावच्छिन्नं परित्यज्य तथाविधापरधर्मावच्छिन्ने यतो धवखदिरावित्यादितो धवयोः खदिरयोश्च बोधप्रसङ्ग इति तत्त्वम्। घटघटेत्यादिकस्य घटकलसेत्यादिकस्य घटतद्घटेत्यादिकस्य च क्रमिकनामस्तोमस्य निराकाङ्क्षत्वेन घटादेरन्वयबोधं प्रत्यहेतुत्वमतो न तादृङ्नामनिवहो घटाद्यर्थे द्वन्द्वः अतएव समस्यमानपदार्थयोस्तत्तावच्छेदकयोर्वा यत्र मिथो भेदस्तत्रैव द्वन्द्वस्य साधुत्वसूचनाय चार्थे द्वन्द्व इति पाणिनिः प्राह। अतएव भेदगर्भसमुच्चयार्थकं च शब्दमन्त-

भाव्य धवश्च खदिरश्चेत्यादिकं विग्रहमस्य प्रयुञ्जते बुधाः समुपाददते च तत्र मिथोभेदप्राप्त्यर्थस्वकारद्वयं पीततत्पटयोस्तादात्म्यमित्यादौ तत्पटादेः पीताद्यभिन्नत्वेऽपि पीतत्वतत्पटत्वाद्योः पदार्थतावच्छेदकयोरस्त्येव भेदः सुबर्थस्तु द्वित्वं न तत्र प्रकृत्यर्थेऽन्वेति पर्य्याप्तिसम्बन्धेन पीततत्पटे तस्य बाधात् सुबर्थद्वित्वादेस्तादृशसम्बन्धेनैव प्रकृत्यर्थसाकाङ्क्षत्वात् परन्तु प्रकृत्यर्थतावच्छेदकयोः पीतत्वतत्पटत्वयोरेव व्युत्पत्तिवैचित्र्यात् अतएव द्व्यणुकारम्भकसंयोगनाशेभ्यः कार्य्यद्रव्यं नश्यतीति भाष्यस्य योग्यतासम्पत्तये सुबर्थकत्वस्य कार्य्यद्रव्यत्वेऽन्वयमभिधित्सुनाचार्य्येण जात्यभिप्रायकमेकवचनमिति गुणकिरणावल्यामभिहितम्। अतएव च श्याला स्वुभ्रातरः पत्न्याः स्वामिनो देवृदेवरौ इत्यत्र च द्विवचनमहिम्ना स्वामिनो भ्रातरौ देवृदेवरोभयपदवाच्या इत्यर्थः सुभूत्यादिसिद्धः सङ्गच्छते। यदि च पटद्वयासत्त्वेऽपि भूतले पीतपटावित्यादिकः प्रयोगः स्यात् पीतत्वपटत्वोभयाश्रयस्य तत्र सत्त्वादेवं पीतपटयोरभेद इत्यादितः शुक्लपटत्वादेरबोधप्रसङ्गश्च तदंशे सुबर्थद्वित्वस्य प्रकारत्वादित्यादिसूक्ष्ममीक्ष्यते तदा गोदौ ग्राम इत्यादाविव साधुत्वार्थमेव तत्र द्विवचनमिति वदन्ति। विद्यते विन्दति विन्त्तेनामनिट् इत्यत्र विद्यत इत्यादिशब्दो न विदधातुत्वेनोपस्थापकः किन्तु सत्ताद्यर्थकतादृशधातुत्वेनैव। मृगपाण्डुरयोः पदार्थयोर्भेदेऽपि हरिणहरिणावित्यप्रयोगात् समानशब्दयोर्द्वन्द्वप्रसक्तावेकशेषो व्युत्पत्तिसिद्धस्तेन हरिणाविलक्षण सुमस्युताभ्यामिव हरिणपदाभ्यामुपस्थितयोर्मृगपाण्डुरयोर्बोधः हरी नमस्यावित्यवाप्युच्चारीत्येव हरिपदाभ्यां विष्णुचन्द्रयोरवगतिः अन्यथा हरिहरौ नमस्यावित्यपि प्रयोगापत्तेः हरो च हरयश्चेति विग्रहस्थले यत्र हरय इत्यादितः समस्तमात्पदा-

योगामवान्तरसंख्यागमस्तत्र तत्तत्संख्यावच्छिन्नस्वार्थलक्षकस्य लुप्तस्य हर्य्यादिपदस्योत्तरत्वेन प्रतिसंहितमेव हर्य्यादिपदं तथाविधस्वार्थस्य लक्षणया बोधकं तदप्रतिसन्धाने तु श्रुतमेव हरिपदं विष्णुहयोः सिंहत्रयस्य चैकया लक्षणया शक्तिभ्रान्त्यैव वा न च विग्रहस्थसुबर्थस्य द्वित्वादेः समासाप्रतिपाद्यत्वनियमात्तथाविधद्वित्वत्रित्वान्तर्भावेण द्वन्द्वस्यैवासाधुत्वादुक्तक्रमेणैकशेषो न युक्तः शलाकापरि हस्त्यश्वमित्यादौ व्यभिचारेणोक्तनियमस्यासत्त्वात् एकत्वे चैकत्वानि चेति विग्रहे च एकत्वानीत्येकशेषस्य गुणकिरणावल्यामाचार्य्यैरभिहितत्वाच्च हंसश्च हंसी च इत्यर्थे हंसहंस्याविति अप्रयोगात् तत्रापि पुंसा स्त्रिया सारूप्ये इत्यनुशिष्टहंसीपदस्य लोपे हंसावित्यत्र लुप्तमेव हंसीपदमनुसन्धाय स्त्रीपुंसयोर्बोधः तल्लोपमजानतस्तु हंसपदे स्त्रीहंसत्वपुरुषहंसत्वाभ्यां विभिन्नरूपाभ्यामेकस्याः शक्तेर्लक्षणाया वा ग्रहादेव । यत्तु तत्र हंसपदमेव लक्षणया हंसीत्वेन शक्त्या च हंसत्वेन बोधकं सुबर्थस्तु पुंस्त्वं हंस एवान्वेति न तु हंस्यामयोग्यत्वात् इति मतं तन्न, तथा सति स्त्रीहंसत्वहंसत्वयोः पदार्थतावच्छेदकयोर्मिथो भेदविरहेण द्वन्द्वाप्रसक्तावेकशेषस्य दुष्करत्वापत्तेः अन्यथा घटतद्वदावित्यपि द्वन्द्वप्रसङ्गात् हंसी च हंसाश्चेति विग्रहेऽपि हंसा इत्यतो हंसद्वयहंसत्रययोः प्रागुक्तरीत्यावगमः दुन्दुभी च दुन्दुभयश्चेति विग्रहे दुन्दुभी सुन्दरावित्यत्राक्षभेर्य्योर्बोधनस्थले पुंलिङ्गस्यैव दुन्दुभिशब्दस्य शिष्टतया तद्विशेषणत्वादेव सुन्दरादेः पुंस्त्वं युवा च युवतिश्च इत्यर्थे युवानावित्यत्राप्युक्तरीत्यैव युवतीयौवनवतोर्बोधः वरटाहंसौ लक्षणासारसावित्यादौ तु स्त्रीपुंसयोर्द्वन्द्वेऽपि पदसारूप्यविरहान्नैकशेषः दम्पत्यर्चनप्रकरणे ब्राह्मणावानयेदित्यत्रापि ब्राह्मणश्च ब्राह्मणी च इति विग्रहे प्रागुक्त-

दिशा ब्राह्मणभार्य्यापत्योरवगमः। एकश्चैका चेत्यत्र एकौ द्वौ च द्वे चेत्यत्र द्वौ उभे चोभौ चेत्यत्र उभे त्रयश्च तिस्रश्च इत्यत्र च विग्रहे त्रय इत्यादिरेकशेष इष्यत एव। ग्राम्यानेकशफेष्वतरुणेषु स्त्रीपुंसयोर्बहुत्वमन्तर्भाव्य सारूप्येण द्वन्द्वस्थले तु पुंस एव लुक् तेन मेषाश्च मेषाश्चेत्यर्थे मेषा इत्यत्रापि लुप्तं बहुमेषाणां वाचकं मेषपदं प्रतिसन्दधत एव बहुमेषाणामनेकमेषीणाञ्चावगमः। एवं महिषाश्च महिष्यश्चेत्यर्थे महिषा इत्यत्रापि महिषपदं बहूनां महिषाणां मृगाश्च मृग्यश्चेत्यर्थे मृगा इत्यत्र तु मृगादेरग्राम्यत्वान्न पुंसो लुक् परन्तु स्त्रियाः यथा गर्द्दभाश्च गर्द्दभ्यश्चेत्यर्थे गर्द्दभा इत्यत्रापि खराणामेकशफत्वात् वर्कराश्च वर्कर्य्यश्च इत्यर्थे वर्करा इत्यत्रापि तरुणार्थकत्वात् स्वसा च भ्राता चेत्यर्थे भ्रातरावित्यत्र पुत्रश्च दुहिता चेत्यर्थे पुत्रावित्यत्र च विरूपैकशेषेऽपि स्वसृपदं दुहितृपदञ्च लुप्तं प्रतिसन्धायैव भ्रातृभगिन्योः पुत्रकन्ययोश्चावगमः। ज्येष्ठपुत्रदुहित्रोश्च ज्यैष्ठे मासि न कारयेदित्यादिकस्तु प्रयोगः परिचिन्तनीयः। स च मैत्रश्चेति विग्रहे त्यदादिना तदन्यस्य द्वन्द्वे लुकि तावित्यत्रापि लुप्तं मैत्रादिपदमनुसन्दधत एव मैत्राद्यवगमः स च त्वञ्चेत्यादिविग्रहे च किं पदान्यत्यदादिद्वयगर्भद्वन्द्वे तु पूर्वस्यैवं लुक् तस्यैव वा त्यदादेर्लुकि युवामित्यत्र त्यादावप्युक्तक्रमेणैव तदर्थयुष्मदर्थयोर्बोधः स च सचेत्यत्रापि विभिन्नार्थयोर्विग्रहे स्वपूर्वागणितोऽपि तदादिः स्वोत्तरापठित एव तत्तन्मानुषतुल्योऽसौ यद्यद्दिव्यातिनिर्मलेत्यादौ तु न त्यदादिगणेन द्वन्द्वः परन्तु तदाद्यव्ययेन यथा तत्तत्तामसभूतभोनय इत्यादौ यत्तदादिव्यतिरिक्तानामेवाव्ययानां सरूपैकशेषस्य व्युत्पन्नत्वात् प्रयोगानुरोधित्वात् कल्पनायाः कश्च त्वञ्चेत्यादिविग्रहे च किमा तादृशद्वन्द्वे तु

मदन्यस्यैव त्यदादेर्लुकि काविव्यादिक एव प्रयोगः चैत्रस्य पितराविव्यत्रापि विरूपैकशेषे लुप्तस्य मातृपदस्य स्मरणात् मातुरवगमः तदस्मरतस्तु पितृपदे जनकशरीरत्वेन लक्षणया मातापित्रोरवगतिरिति प्राञ्चः। कौमारास्तु मात्रा पितुर्द्वन्द्वे मातापितृभ्यां मातरपितराभ्यामिति प्रयोगद्वयोदर्शनाच्चैत्रस्य पितराविव्यत्र नैकशेषः परन्तु पुष्पवन्तादिपदवत् मातृत्वपितृत्वाभ्यां विभिन्नरूपाभ्यामेकशक्तिमदेव नियतद्विवचनाकाङ्क्षं पितृपदं प्रकृत्यन्तरम् एवं श्वश्रूश्च श्वशुरश्चेत्यर्थे श्वशुरौ इत्यत्र श्वशुरपदमपि श्वश्र्वा श्वशुरस्य द्वन्द्वे श्वश्रूश्वशुराविव्येव प्रयोगादित्याहुः।

द्वन्द्वं विभजते।

> द्वौ भेदावस्य शास्त्रोक्तौ समाहारेतरेतरौ।
> एकान्यवचनाकाङ्क्षाहीनोपादानतश्च तौ॥

अस्य द्वन्द्वस्य द्वौ भेदौ समाहार इतरेतरश्च शास्त्रसिद्धौ तत्रैकवचनान्यसुबाकाङ्क्षाविहीनः समाहारः तथाविधसुबाकाङ्क्षश्चेतरेतरः पाणिपादं हस्त्यश्वमित्यादितो हि करचरणादीनां बहूनामप्यवगतावेकवचनमेव प्रमाणं धवखदिराविव्यादौ द्विवचनादेः पदिस्कन्दिखिदेर्दादिव्यादौ तु पदिस्कन्दिभ्यां सहितः खिदिरिति विग्रहे मध्यपदलोपी कर्मधारयो यथा शव्याखतिशाल इति मणिग्रन्यादौ।

उपपदसमासं लक्षयति।

> यदुत्तरपदं नामानुत्तरं यदर्थबोधकम्।
> धातुजन्यमुपपदसमासः स तदन्तकः॥

धातुजन्यां निष्पन्नं यस्योत्तरपदं शब्दान्तरानुत्तरं सत् यादृशार्थस्य बोधं प्रत्यसमर्थं तादृशार्थकान्यपदकः समासः उपपदसंज्ञकः कुम्भकारः क्षीरपायीत्यादिके तूपपदसमासे धातुजन्यां निष्पन्नं कर्त्राद्यर्थकं कारादिपदं पदान्तरानुत्तरं सत्

कर्त्रादेरन्वयबोधक्षमं चन्द्रनिभमित्यादौ तु तत्पुरुषे निभादिपदं सदृशाद्यर्थे तादृशमपि न धातुकृद्भ्यां निष्पन्नमिति तद्व्युदासः।

विभजते।

कारकैकोपपदकः षड्विधोऽयमिति भ्रमः।
कर्मकर्त्राद्युपपदभेदाद्बहुविधस्तसौ॥

कारकेषु श्रोत्तानशयः पूर्वसर इत्यादावुत्तानादिः कर्त्ता कुम्भकारः सौवीरपायीत्यादौ कर्म कच्छप: पार्श्वशय इत्यादौ करणम् उखास्रत् वहभ्रट् इत्यादावपादानं खशयः कुरुचरः इत्यादावधिकरणमुपपदं सम्प्रदानन्तु न कुत्रापि दृश्यते दृश्यते च ब्रह्मभूयमित्यादौ कारकभिन्नेनाप्युपपदेन समास इत्यसावनेकविध एव न तु कारकमात्रोपपदकत्वात् षड्विध एव न्यूनत्वाधिकत्वाभ्यां विभागव्याघातादिति सूर्य्यम्पश्याप्युक्ता समासः परन्त्वव्ययपदस्यैव नञा समस्तस्यैव तस्य स्वार्थबोधने व्युत्पन्नत्वान्न केवलस्य तस्य प्रयोगः।

यौगिकेषु क्रमप्राप्तं तद्धितान्तं नाम लक्षयति।

यन्नाम तद्धितं यच्च यत्क्रमं सद्यदर्थकम्।
यद्द्वयं यत् क्रमं तत्र तद्धितान्तं निगद्यते॥

यद्यपि नामोत्तरतद्धितत्वं तद्धितोत्तरनामत्वं वा प्रत्येकं बहुगुड़ो द्राक्षेत्यादौ दाक्षिरित्यादौ चाव्यापकमेव तद्धितान्ते नाम्नि तथापि यादृशं नाम यच्च तद्धितं यादृशानुपूर्व्यवच्छिन्नं सद्यादृशार्थस्यान्वयबोधे समर्थं तादृशानुपूर्व्यवच्छिन्नं तदद्वयमपि तादृशार्थे तद्धितान्तं नामेत्यर्थः पचतितरामित्यादिकन्तु नामैव न प्रागेव तु तद्धितान्तं तस्यापि लक्ष्यत्वे यः शब्दस्तद्धितं यच्चेति पठनीयं टावादेरपि तद्धितत्वोपगमादजाब्राह्मणीत्यादेर्नासंग्रह इति वदन्ति।

कृदन्तं नाम लक्षयति।

यद्धात्वर्थान्वितस्वार्थधीकृत कृद्यादृशं भवेत्।
तद्धातूत्तरगं तत् कृत् कृदन्तं नाम तादृशम्।

यद्धात्वर्थान्वितस्वार्थान्वयबोधं प्रति यादृशानुपूर्व्यवच्छिन्नस्य यत्कृतो निश्चयः कारणं तद्धातूत्तरगं तत् कृदेव तादृशानुपूर्व्यवच्छिन्नं सत् कृदन्तं नाम यथा पाठकपाठ्यमानादि तद्धि धात्वर्थेनान्वितस्य स्वार्थकर्त्रादेः कर्मत्वादावन्वयबोधं प्रति द्वितीयाद्यंशे तादृशानुपूर्वीकत्वेन निश्चीयमानं हेतुः चैत्रेण ग्रामस्य गन्तव्यमित्यादौ धात्वर्थे स्वार्थमिष्टसाधनत्वादिकं बोधयदपि तव्यादिकं धात्वर्थनिष्ठविषयतानिरूपितस्वार्थविषयताकबोधजनकत्वेन धात्वर्थान्वितस्वार्थकमेव भावकृतामपि स्वरूपार्थकत्वं व्युत्पादितमेव।

तदेवं रूढयोगाद्यर्थभेदेन नाम्नश्चातुर्विध्यमुक्तं सम्प्रति शब्दसंस्कारानुगुणलिङ्गभेदेन त्रैविध्यमाह।

स्त्रीलिङ्गमपि पुंलिङ्गं क्लीवलिङ्गमिति त्रिधा।
शब्दसंस्कारसिद्ध्यर्थं भाषया नाम भिद्यते॥

स्त्रीलिङ्गं पुंलिङ्गं नपुंसकलिङ्गमित्यपि त्रिधा नाम भिद्यते तत्र स्त्रीलिङ्गत्वादिकं न स्त्रीत्वादिवाचकत्वं तटः तटी तटमित्यादौ प्रकृत्यर्थस्य तटादेः स्त्रीत्वाद्यवगतावयोग्यतापत्तेः। परन्तु स्त्रीलिङ्गत्वादिना परिभाषितत्वमात्रं परिभाषायाः प्रयोजनञ्चेह पदसंस्कारः सोऽपि तट इत्यादौ पुंस्त्वेन सुबादिसद्भावः तटीत्यादौ स्त्रीत्वेन ङीबादिप्रत्ययः तटमित्यादौ क्लीवत्वेन सुबादेर्लुगादिरिति दुन्दुभी सुवर्णं इत्यादौ तु शब्दसंस्कारस्यैव फलमर्थविशेषस्य लाभो न ह्ययं दुन्दुभिरिदं सुवर्णमित्यादितोऽक्षस्याशीतिरक्तिकापरिमितस्वर्णादेश्चावगमः। यत्र च सम्पदादिशब्दे स्त्रीलिङ्गत्वादिप्रयुक्तो नास्ति संस्कारस्य

विशेषस्तत्राप्यभेदेन तत्साकाङ्क्षे शोभनादिपदे एवास्ति विशेषणपदानां विशेष्यपदलिङ्गग्राहित्वस्य विना बाधकं नियमात्। यत्तु तटादिकं द्रव्यमिव तद्गतं स्त्रीत्वादिकं पदार्थान्तरमपि तटादिपदस्यार्थः प्रत्ययानान्तु तद्व्यञ्जकतामात्रमिति वैयाकरणैरुक्तं तन्न युक्तं, तटादिपदैर्यैस्तटत्वादिमेव धर्मान्तरेण स्त्रीत्वादिना तटादेरननुभवेन तादृशपदार्थान्तरे प्रमाणाभावात् न विप्रा वेदमुच्चरेदित्यादौ च टावादिना प्रत्ययेनैव स्वार्थस्य योन्यादिमत्त्वलक्षणस्त्रीत्वस्य प्रकृत्यर्थेऽनुभावनात् न प्राणि प्राप्नुयाद्दायं न विप्रोऽध्ययनं त्यजेत् इत्यादावपि लुप्तालुप्ताभ्यां सुब्भ्यामिवोपस्थितं विलक्षणसंस्थानरूपं नपुंसकत्वं प्राणिनि पुंस्त्वञ्च विप्रेऽनुभूयते न चेदेवं दधि भुञ्जीत इत्यादौ कर्मत्वादेरनुभवार्थं तस्यापि प्रकृत्यर्थता किन्न स्यात् स्यादेवेति चेत् संख्याया अपि स्यादिति किन्न रोचये रोचयेस्तदपि प्रत्ययानां तत्तदर्थव्यञ्जकतामात्रत्वादिति तु रिक्तं वचः प्रत्ययानामन्वयव्यतिरेकाभ्यां संख्यादिवाचकत्वव्यवस्थितेः अन्यथा प्रत्ययानामेव तत्तद्विशिष्टार्थबोधकतायां प्रकृतीनामभिव्यञ्जकतामात्रस्य सुवचत्वात् अस्तु वा न प्राणिप्राप्नुयाद्दायमित्यादौ प्राण्यादिमात्रबोधकस्य प्राण्यादिपदस्यैव लक्षणया नपुंसकप्राण्यादिपरतेत्यास्तां विस्तरः।

फणिभाष्याद्युक्तं नाम्नः पञ्चविधत्वमुपपादयति।

एकैकेन तथा द्वाभ्यां वचनैस्त्रिभिरेव च।
साकाङ्क्षत्वप्रयुक्तन्तु नाम पञ्चविधं स्मृतम्॥

सुपां मध्ये एकवचनमात्रसाकाङ्क्षत्वेन द्विवचनमात्रसाकाङ्क्षत्वेन बहुवचनमात्रसाकाङ्क्षत्वेन द्विवचनमात्रनिराकाङ्क्षत्वेन वचनत्रयसाकाङ्क्षत्वेन च नाम्नः पञ्चविधत्वव्यपदेशः एकादिकं विंशत्यादिकं सार्थकभावकृदन्तं भूयमानभवितव्यादिकं क्रिया-

विशेषणार्थकं सङ्ख्यादिगुडद्रावान्योन्यपरस्परादिकन्तु सुगामेव-वचनमात्रेण माकाङ्क्षं भवितव्यानां भवन्ति द्वाराणीत्यादौ च भवितव्यानामित्यस्य प्राप्तव्यानामित्यर्थः। उपपदं द्विपदं पुष्पवन्तपदं सर्वेवेदोऽश्विनपदं भूस्वर्गयो रोदस्यादिपदं ग्रामि गोपदञ्च द्विवचनमात्रेण प्राणप्रभृतिकं त्रिचतुरादिकपदं कति-पदञ्च बहुवचनेनैव उभयपदमेकवचनबहुवचनाभ्यामेव घट-पटादिकं तु त्रिभिरपि वचनैः। यथा चैतत्तथाग्रे प्रतिपाद-यिष्यामः।

नामधातुभेदात् प्रकृतेर्द्वैविध्यमुक्तं तत्र सामान्यतो विशेष-तश्च नाम निरूप्यावसरसङ्गत्या धातुं निरूपयति।

यो यत्स्वार्थस्योत्तरस्थत्वजार्थे बोधनक्षमः।
स तादृशार्थकः शब्दो धातुस्त्रिविध ईरितः॥

यः शब्दः स्वोत्तरत्वजः शब्देऽर्थे स्वोपस्थाप्यस्य यादृशार्थ-स्यान्वयबोधं प्रति समर्थः स तादृशार्थे धातुरुच्यते। पच-पिपक्षादयो हि शब्दाः पक्तृपिपक्षित्रादिनामनिविष्टाः स्वोत्तर-त्वजार्थे कर्त्रादौ स्वोपस्थाप्यानां पचनपाकेच्छादीनामन्वयधियं प्रति प्रभवो नत्वन्ये घटाद्याः। स चायं मूलधातुः सौत्रः प्रत्ययान्तश्चेति त्रिविधः।

सुबर्थेऽपि धात्वर्थस्यान्वयवादिनां मतेन धातुं लक्षयति।

यः सुबर्थे निजार्थस्य स्वान्ते क्वचिन्तनं विना।
यादृशस्यान्वयाहेतुः स वा धातुस्तदर्थकः॥

यः शब्दः स्वान्ते क्वचिन्तमं विना सुबर्थे यादृशस्य निजार्थ-स्यान्वयधियं प्रत्यसमर्थः स एव तादृशार्थको धातुः पाकं कुरु सम्पदं पश्येत्यादौ हि पचादिको धातुः स्वोत्तरस्य भावक्तः प्रतिसन्धानदशायामेव सुबर्थकर्मत्वादौ स्वार्थस्य पचनादेरन्वय-बोधमाधत्ते न त्वन्यथा स्वरूपस्य घञाद्यशक्यत्वेन तत्र धात्वर्थ-स्यान्वयायोगादिति प्राञ्चः।

धातोर्विधात्रयं व्याचयति ।

गणधातुर्गणोक्तोऽन्यो सौत्रः सूत्रैकदर्शितः ।
योगलभ्यार्थको धातुः प्रत्ययान्तः प्रकीर्त्तितः ॥

गणोक्तो गणपठितः पचभूप्रभृतिः सौत्रः सूत्रमात्रोपात्तः स्कन्भुजप्रभृतिकः योगलभ्यार्थकः स्वावयवलभ्यार्थस्य बोधकः पाचिपिपच्चादिः तितिक्षादिरपि सनर्थस्वरूपान्तर्भावेन यौगिक एव हिन्दोलान्दोलादेर्लौकिकस्यापि सत्त्वाच्चतुर्विध एव धातुरिति वोपदेवः। सौत्रपदं यौगिकगणोक्ताभ्यामन्यपरमतो लौकिकस्य नाधिक्यमित्यन्ये ।

परस्मैपदित्वादिभेदेनापि त्रैविध्यं सम्भवति अतस्तदपि निर्वक्ति ।

यो यत्पदार्थकर्तृत्वे यादृक् स्वार्थस्य बोधकः ।
स तत्पदी भवेद्धातुस्तादृशः स्वार्थबोधने ॥

यो धातुः स्वोपस्थाप्यस्य यादृशार्थस्य यत्पदोपस्थाप्ये कर्तृत्वेऽन्वयबोधं प्रति समर्थः स धातुस्तत्पदी गमभूप्रभृतयः स्वार्थस्य गत्युत्पत्तिप्रभृतेर्मुख्ये गौणे वा परस्मैपदार्थ एव कर्तृत्वेऽन्वयं प्रति प्रभवः सत्यपि योग्यतादिग्रहे चैत्रो गच्छति भवति इत्यादित इव गच्छते भवते प्रभृतिभ्यो गतिकर्तृत्वाद्यप्रतीतेः सङ्गच्छते भवते इत्यादितः सङ्गतिप्राप्त्यादिकर्तृत्वावगमात्तादृशार्थे आत्मनेपदिन एव ते यजति करोतीत्यादित इव यजते कुरुते इत्यादितोऽपि यागादिकर्तृत्वस्यावगतेर्यागाद्यर्थे यजिकृञादिरुभयपदी। तदुक्तमभियुक्तैः पदद्वयेन साकाङ्क्षाः स्वरितञित् स्वन्तधातवः। सनन्ताः प्रायशो मूलधातुवत् पदिनो मताः॥ काङ्यङन्ताङानुबन्धा रुचाद्याश्चात्मनेपदे। परे परस्मैपदिनो नित्यं कर्त्तरि धातवः॥ स्वरितः समाहारस्वरानुबन्धा यजपचाद्याः ञितो ञानुबन्धाः कृञ्सुञादयो स्वन्ताश्च भाविप्रभृतयः

कर्तृत्ववाचिना पदद्वयेन समं साकाङ्क्षाः सनन्तास्तु स्वप्रकृति-पदभाजस्तेन बुभूषते विवर्द्धिषति इत्यादिको न प्रयोगः। श्रृदृशोः परस्मैपदित्वेऽपि सनन्तयोस्तयोरात्मनेपदित्वमेव श्रत उक्तं प्रायश्च इति क्यङन्ता हंसायाद्याः यङन्ता बोभूयाद्याः ङानुबन्धाः शीङाद्याः रुचादिगणश्च कर्तृत्ववाचिनात्मनेपदेनैव साकाङ्क्षाः परे पुनर्धातवः परस्मैपदेनैवेत्यर्थः।

प्रत्ययोऽसौ चतुर्विध इति यदुक्तं तस्य चतस्रो विधा दर्शयति।

विभक्तिश्चैव धात्वंशस्तद्धितः कृदिति क्रमात्।
चतुर्धा प्रत्ययः प्रोक्तः कादिभिः पञ्चधाथवा॥

धात्वंशः सन् क्यचादिः। वत्सकोऽश्वक इत्यादौ दया-कुत्साद्यर्थकस्य कादेः अजा ब्राह्मणी श्वश्रूरित्यादौ स्त्रीत्वा-द्यर्थकटावादेश्च तद्धितत्वोपगमे चतुर्विध एव प्रत्ययस्तदनुपगमे तु पञ्चविध एव अतएवाश्वकभार्य्य इत्यादौ पुंवद्भावस्तद्धित-क्तोरेव कोपधस्य तन्निषेधादेवमौपगव इत्यादाविव पट्वी-त्यादौ ङीत्वादिरिति कालापाः।

प्रत्ययेषु विभक्तिं लक्षयति विभजते च।

संख्यात्वव्याप्यसामान्यैः शक्तिमान् प्रत्ययस्तु यः।
सा विभक्तिर्द्विधा प्रोक्ता सुप्तिङ्चेति भेदतः॥

संख्यात्वावान्तरजात्यवच्छिन्नशक्तिमान् यः प्रत्ययः सा विभक्तिः सुप्तिङ् इति भेदतो द्विविधा एकत्वत्वाद्यवच्छिन्न-शक्तिमानपि तदादिर्न प्रत्ययः प्रत्ययश्च त्वजादिर्न संख्याशक्त इति तयोर्व्युदासः।

यथाख्यातमात्रस्य तदेकवचनस्य वा न संख्याशक्तत्वे प्रमाणं तदाख्यया निवेक्ष्यति॥

प्रकृत्यर्थस्य यः स्वार्थे विधेयत्वेन बोधने ।
समर्थः सोऽथवा शब्दो विभक्तित्वेन गीयते ॥

यः शब्दः स्वार्थे धर्मिणि स्वप्रकृत्यर्थविधेयकान्वयबोधं प्रति समर्थः स वा विभक्तिरित्युच्यते घटमित्यादौ सुपा कर्मत्वं घटीयमित्यादिरिव पचतीत्यादौ तिङापि कृतिः पाकीयेत्यादिवद्देश्यविधेयभावेन स्वार्थे प्रकृत्यर्थस्य धीरुत्पाद्यते न तु प्रत्ययान्तरेण तस्य प्रकृत्यर्थावच्छिन्नस्वार्थविषयताशालिन्येव शाब्दे सामर्थ्यात् न हि दाक्षिरित्यादितोऽपत्यं दक्षस्येत्यादिवद्देश्यविधेयभावेन बोधः कस्यापि किन्तु दक्षापत्यत्वाद्यवच्छिन्ने धर्मिण्येव सुवर्थैकत्वादेः अन्यथा अपत्यं दक्षस्य चैत्रस्य चेत्यादाविव दाक्षिश्चैत्रस्य चेत्यादावप्यपत्यादिधर्मिकस्य दक्षचैत्राद्योर्विधेयभावेन युगपदन्वयस्य दुर्वारतापत्तेः प्रथमाद्यभेदादौ स्वार्थे प्रकृत्यर्थस्य विधेयभावेन धियं जनयत्येव न चैदेवं नीलो घट इत्यादौ नीलाद्यभेदरूपस्यावान्तरवाक्यार्थस्य पूर्वमप्रतीतौ महावाक्यार्थबोधस्य तत्पूर्वकत्वहान्यापत्तिरतो न तस्यामव्याप्तिः ।

विभक्त्योः सुपं लक्षयति विभजते च ।

प्रकृत्यर्थे स्वार्थसंख्यान्वयधीहेतवः सुपः ।
प्रथमादिप्रभेदेन ताश्च सप्तविधा मताः ॥

प्रकृत्यर्थधर्मिकस्वार्थसंख्यान्वयबोधिका विभक्तयः सुप उच्यन्ते ताः प्रथमाद्वितीयादिभेदेन सप्तविधाः तिङस्तु स्वार्थभावनाद्यन्वयिन्येव स्वार्थसंख्यामवबोधयन्ति न तु स्वप्रकृत्यर्थ इति तासां व्युदासः ।

सुप्सु प्रथमां लक्षयति ।

तादात्म्यभिन्ने स्वार्थे या प्रकृत्यर्थस्य बोधने ।
न समर्था विभक्तिः सा प्रथमा परिकीर्त्यते ॥

या विभक्तिस्तादात्म्याभिन्नस्वार्थधर्मिकप्रकृत्यर्थबोधं प्रति न

स्वरूपयोग्या सा प्रथमा द्वितीयादयः स्वार्थे कर्मत्वादौ प्रकृत्यर्थस्यान्वयबोधं प्रति समर्थाः प्रथमा तु विशेषणपदोत्तरस्था तादृशि तादात्म्ये तथान्वयं बोधयन्त्यपि न तादात्म्याभिधाने तथा प्रथमाया द्विवचनम् औ द्वितीयाया पुनः औट् इति न तत्राव्याप्तिशङ्कापीति वदन्ति ।

यदि स्वर्गकामो यजेतेत्यादौ प्रथमोपस्थाप्यस्य नियोज्यत्वस्य यागादावाधेयत्वस्य वा विध्यर्थकृतिसाध्यत्वादिघटककृत्यादौ प्रकृत्यर्थावच्छिन्नस्यान्वयः प्रामाणिकः यदि वा धृतिः स्वाहेत्यादौ चतुर्थ्याः स्थाने न प्रथमा परन्तु प्रथमैवोद्देश्यत्वबोधिका तदा तस्यामव्याप्तिरसम्भवो वा स्यादतोऽन्यथा निर्वक्ति ।

धात्वर्थेन विशिष्टस्य तिङर्थस्यान्वयं प्रति ।
यदन्तनामबोध्यत्वं तत्त्वं सुप् साथवा तथा ॥

धात्वर्थावच्छिन्नतिङर्थस्यान्वयबोधं प्रति यदन्तनामोपस्थाप्यत्वं तत्त्वं तादृशी सुप् वा प्रथमा यजेतेत्यादौ तिङर्थस्येष्टसाधनत्वादेर्न प्रकृत्यर्थावच्छिन्नस्य यागादावन्वयः किन्तु केवलस्य अतस्तस्य प्रथमान्तनामानुपस्थाप्यत्वेऽपि न क्षतिः चैत्रमैत्रौ स्त इत्यादौ च द्वन्द्वेनैव प्रथमान्तनाम्ना चैत्रस्योपस्थापनान्न व्यभिचारः ।

द्वितीयादिविभक्तिषट्कं संक्षेपार्थमेकग्रन्थे निर्वक्ति ।

धातुभेदानुपादाय तदर्थे कर्मतादिकान् ।
बोधयन्त्यो द्वितीयाद्या निर्वक्तव्या विभक्तयः ।

धातुभेदाः पचाद्याः तथा च तिबन्तपचधातूपस्थाप्यपाकधर्मिककर्मत्वानुभवानुकूलसुप्सजातीयत्वं द्वितीयाया लक्षणं चौरस्य हिनस्तीत्यत्र तिबन्तधात्वर्थे कर्मतादिप्रतिपादिकापि षष्ठी न पाके तण्डुलस्य पाचक इत्यादौ पाके तादृश्यपि न

तिबन्तपच्यर्थे ग्रामं गच्छतीत्यादावमादेः पाकादौ कर्मत्वाद्य-
ननुभावकत्वेऽपि तदनुभावकसजातीयत्वान्नाव्याप्तिः काष्ठेन
पचतीत्यत्र तृतीया करणत्वस्यैव बोधिका न तु कर्मत्वस्य पटौ
स्त इत्यादौ द्विवचनस्यौकारस्य प्रथमात्वमिव द्वितीयात्वं न
चतिकरम् उपधेयसङ्करेऽप्युपाधेरसाङ्कर्य्यात् प्रकृत्यर्थमुख्य-
विशेष्यकान्वयबोधानर्जकत्वे सतीति वा वक्तव्यम् । अधिक-
मभिहितं प्राक् पच्यर्थधर्म्मिककरणत्वान्वयबोधानुकूलसुप्सजा-
तीयत्वं तृतीयात्वं शताय परिक्रीणातीत्यादौ धात्वर्थे करणत्व-
बोधं प्रत्यनुकूलापि चतुर्थी न पच्यर्थे तथा परिक्रीकरणतायामेव
तद्विधानात् काष्ठात् पचनमित्यादौ तु पञ्चमी न करणत्वस्य
बोधिका असामर्थ्यात् किन्तु कारणत्वस्यैव हेतुतायां तदनु-
शासनात् । ददात्यर्थधर्म्मिकसम्प्रदानत्वानुभावकसुप्सजातीयत्वं
चतुर्थीत्वं दास्या मालां प्रयच्छतीत्यत्र दाने सम्प्रदानत्वस्यानु-
भाविकापि तृतीया न ददात्यर्थे दानधातोर्योग एव सम्प्रदान-
तायां दाणोऽनाचार इत्यनेन तृतीयानुशासनात् । रीतिरुक्तैव ।
सम्प्रदानत्वशक्ता सुप् चतुर्थीति तु न युक्तं सम्प्रदानत्वाद्य-
पेक्षया लघुन्येकत्वादाविव चतुर्थ्याः शक्तिमत्त्वादनुशिष्टे मत्-
सरादिपद इव निरूढलक्षणाभिप्रायकत्वेनाप्युपपत्तेः पतधात्वर्थ-
तावच्छेदकरूपावच्छिन्नधर्म्मिकविभागबोधानुकूलसुप्सजातीयत्वं
पञ्चमीत्वं तले पतस्तरुं त्यजतीत्यादौ वस्तुगत्या पत्यर्थे विभा-
गस्य बोधिकापि द्वितीया न पतनत्वजात्यवच्छिन्ने तस्या एव
पत्यर्थतावच्छेदकत्वात् नरकं पतित इत्यादौ भोगावच्छिन्नस्य
दुरितस्य पत्यर्थत्वेऽपि द्वितीयया न तत्र विभागोऽनुभाव्यते
परन्त्वाधेयत्वं तिबन्तदाधात्वर्थधर्म्मिकस्वार्थान्वयबोधास्वरूपयो-
ग्यत्वे सति प्रथमान्यं सुप्त्वं षष्ठीत्वं धनं करेण विप्राय
प्राणात् काश्यां ददात्यसावित्यत्र द्वितीयादिर्ददात्यर्थे स्वार्था-

म्बन्धोच्चकतया तत्स्वरूपयोग्य एव प्रथमा तु तदयोग्यापि प्रथमेव धनस्य दातेत्यत्र दाने स्वार्थबोधिकापि षष्ठी न तिव-न्तस्य दाधातोरर्थे येनासम्भवः हिनस्त्यर्थहिंसाधर्मिकस्वार्थ-कर्मत्वानुभावकसुप्सजातीयत्वं वा चौरं ज्वरयतीत्यादौ हिंसायां कर्मत्वबोधिकापि द्वितीया न हिनस्त्युपस्थाप्यायां दण्डेन हिनस्तीत्यादौ तादृश्यामपि हिंसायां करणत्वादेर्बोध-कस्तृतीयादिर्न तु कर्मत्वस्य। सम्बन्धसामान्ये स्वत्वे वा शक्ता सुप् षष्ठी ग्रामं गच्छति पटं ददातीत्यादौ च धात्वर्थतावच्छेद-कीभूते संयोगस्वत्वादौ द्वितीयया धेयत्वमेव बोध्यत इत्यपि वदन्ति। पचधात्वर्थतावच्छेदकरूपावच्छिन्नधर्मिकस्वार्थाधेयत्व-बोधानुकूलसुप्सजातीयत्वं सप्तमीत्वं शाकसूपयोः पाचक इत्यादौ द्विवचनस्य लक्ष्यत्वादि पूर्ववत् अधिकरणतायामाधेयत्वे वा शक्ता सुप् सप्तमी ग्राममध्यास्ते इत्यादावधिकरणत्वं बोधयन्त्यपि द्वितीयादिर्न तत्र शक्ता ग्रामाय गच्छतीत्यादौ कर्मत्वादिष्वेव चतुर्थ्यादिः। तत्वधर्मिकस्वार्थाधिकरणत्वा-न्यथासिद्धसुप्सजातीयत्वं वा सप्तमीत्वमित्यपि वदन्ति। स्वादित्रिकान्यतमत्वं प्रथमात्वम् एवममादित्रिकान्यतमत्वा-दिना द्वितीयात्वादिकं निर्वाच्यमित्यप्याहुरिति कृतं विस्तरेण।

क्रियाकारकयोरन्वयव्युत्पत्तयेऽन्यथापि सुपं विभजते।

कारकार्थेतरार्थी च सुप् द्विधा च विभज्यते।
धात्वर्थांशे प्रकारो यः सुबर्थः सोऽत्र कारकम्॥

वृत्त्या कारकस्य बोधिका तदन्यस्य चेत्येवं द्विविधोऽपि सुपो विभागः तत्र यद्धातूपस्थाप्यतादृशार्थेऽन्वयप्रकारीभूय भासते यः सुबर्थः स तद्धातूपस्थाप्यतादृशक्रियायां कारकम्। वृक्षात् पतति व्याघ्रात् बिभेति इत्यादौ ब्राह्मणाय ददाति पुत्राय क्रुध्यतीत्यादौ दात्रेण छिनत्ति घटत्वेन जानातीत्यादौ स्थाल्यां

पचति शक्तौ भासत इत्यादौ ग्रामं गच्छति घटं पश्यतीत्यादौ चैत्रेण पच्यते घटेन भूयत इत्यादौ च पतप्रभृतिधात्वर्थे पतनादौ पञ्चम्याद्युपस्थापितो विभागादिः प्रकारीभूय भासते इति तत्तद्धातूपस्थापिततत्तत्क्रियायां विभागादिकं प्रकृते कारकमतो धात्वर्थे स्वार्थबोधकतया तत्र पञ्चम्यादिः कारकविभक्तिरुच्यते यादृशेन नामार्थेनावच्छिन्नस्य सुबर्थस्य यादृशधात्वर्थेऽन्वयः स एव तादृशधात्वर्थे कारकतया व्यपदिश्यते तेन वृक्षात् पततीत्यादौ वृक्षादेरपि पतनादिक्रियायामपादानादिकारकव्यवहारः। स्तोकं पचतीत्यादौ क्रियायां प्रकारीभूतोऽपि स्तोकादिर्न कारकं सुपानुपस्थापनात् द्वितीया तु तत्र क्लीवलिङ्गत्ववदानुशासनिक्येव स्तोकपाचक इत्यादिकस्तु तत्पुरुषो गिरिकाण इत्यादिवद्विशेषविधेरेव षष्ठ्यर्थस्तु सम्बन्धो न धात्वर्थे प्रकारीभूय भासते तण्डुलस्य पचतीत्याद्यप्रयोगादतः सम्बन्धो न कारकं न वा तदर्थिकापि षष्ठ्यादिः कारकविभक्तिः। अतएव क्रियाप्रकारीभूतोऽर्थः कारकं तच्च षड्विधम्। कर्तृकर्मादिभेदेन शेषः सम्बन्ध इष्यत इति शाब्दिकाः स्मरन्ति। शेषः कारकादवशिष्टः सम्बन्धः कारकादन्य इत्यपि पठन्ति। रजकस्य वस्त्रं ददातीत्यादौ च परिष्कार्यत्वादिलक्षणः सम्बन्धो वस्त्रादावेव षष्ठ्यानुभाव्यते तण्डुलस्य पाचकः मैत्रस्य भोक्तव्यमित्यादौ कर्मत्वकर्तृत्वादिकं कारकमेव धात्वर्थे पचनादौ कृद्योगे कर्तृकर्मणोः षष्ठ्यनुशिष्टेः गुरुविप्रतपस्विदुर्गतानां प्रति कुर्वीत भिषक् स्वभेषजैः पद्मस्यानुकरोत्येष कुमारीमुखमण्डलः सा लक्ष्मीरुपकुरुते यया परेषामित्यादावपि मातुः स्मरति चोरस्य छिनत्ति जलस्योपस्कुरुते इत्यादाविव क्रियाविशेषयोगे कारकार्थैव षष्ठी प्रयोगदृष्ट्या प्रत्यनूपेभ्यः करोतेः कर्मण्यपि वैकल्पिकस्य षष्ठीविधे वक्तव्यत्वात् न हि गुरून्

प्रतिकरोतीत्यादित इवोक्तवाक्येभ्यो गुर्वादिकर्मकत्वं प्रति-कारादिक्रियायां नावगम्यते। अतएव सामान्यवत्त्वे सति वाक्यकरणकप्रत्यत्वत्वादित्यादावनुशासनाभावेऽपि सति सप्तम्याः सामानाधिकरण्यमर्थश्चिन्तामणौ चिन्तितः। दण्डेन घटः भूतले पट इत्यादौ तु वतीयाद्यर्थः करणत्वादिकं न कारकं धात्वर्थानन्वितत्वात् अतएव तादृशवाक्यार्थे दण्डघटः भूतलपट इत्यादिर्न समासः कारकविभक्त्यन्तर्भावेणैव विशेषविधिं विना तत्पुरुषस्य व्युत्पन्नत्वात् मम प्रतिभाति रोचके स्फुरतीत्यादौ प्रतिभानादिक्रियायामस्मदादेः सम्बन्धः षष्ठ्या कथं बोध्यताम् अकारकविभक्तित्वादिति तु विभावनीयम्।

कारकं विभजते।

अपादानसम्प्रदानकरणाधारकर्मणाम्।
कर्त्तुश्च भेदतः षोढ़ा कारकं परिकीर्त्तितम्॥

अपादानादीनां भेदो वैधर्म्यमपादानत्वादि तत्प्रयुक्तः कार-कस्य षड्विधत्वव्यवहारः।

तत्रापादनत्वं लक्षयति।

क्रियाधर्म्मिणि यः स्वार्थः पञ्चम्या विग्रहस्थया।
अनुभाव्यः कारकन्तदपादानत्वसंज्ञकम्॥

क्रिया धात्वर्थः तत्र च यद्धातूपस्थाप्ययादृशार्थे विग्रह-वाक्यस्य पञ्चम्या यः स्वार्थोऽनुभावयितुं शक्यः स तद्धातूप-स्थाप्यतादृशक्रियायामपादानत्वमुच्यते वृक्षात् पतित इत्यतो वृक्षावधिकविभागानुकूल पतनकर्त्तेत्यन्वयबुद्धौ धातूपस्थाप्य-पतने पञ्चम्युपस्थाप्यो विभागः स्वानुकूलत्वसम्बन्धेन प्रकार इति स एव तत्रापादानत्वम्। न च वृक्षादिव स्वस्मात् पति-तश्चैत्र इत्यप्रयोगात् धात्वर्थान्वितं परसमवेतत्वमपि तत्र पञ्च-म्यर्थ इति तदप्यपादानत्वं स्यात् इष्टत्वात् वस्तुतः परसम-

वेतत्वं न पञ्चम्यर्थं तथा सति वृक्षान्यसमवेतस्य पतनस्या-प्रसिद्ध्या वृक्षात् पतति खग इत्यादेरयोग्यतापत्तेः पञ्चम्यर्थं तु स्वावधिकत्वसम्बन्धेन प्रकृत्यर्थान्वितस्य पञ्चम्यर्थविभागस्य सामानाधिकरण्यानुकूलत्वोभयसम्बन्धेन धात्वर्थे पतनेऽन्वयस्य व्युत्पन्नत्वान्न तादृशप्रयोगः चैत्रावधिकत्वविशिष्टविभागाधि-करणनिष्ठं यत् चैत्रविभागानुकूलं पतनं तस्य चैत्रे बाधात् स्वावधिकत्वविशिष्टविभागस्य स्वस्मिन्नसत्त्वादिति युक्तमुत्-पश्याम:। प्रासादमारुह्य प्रेक्षते इत्याद्यर्थे तु प्रासादात् प्रेक्षते इत्यादिवाक्यं न विग्रहस्तादृशार्थे प्रासादप्रेक्षणादि-शब्दानामसमासत्वादतस्तद्विशिष्टपञ्चम्यर्थे आरोहणानन्त-र्य्यादौ नातिप्रसङ्गः अपादानशब्दस्तु तत्तत्कर्मानधिकरणत्वे सति तत्तत्कर्मजन्यविभागाश्रये शक्त इति न तत्र तद्व्यवहारः। तत्कर्मकरत्याग एव तरुतः पतनमतस्तस्य त्यागे कर्मवद-पादानं तद्भवत्येव धात्वर्थतानवच्छेदकीभूतएव विभागे पञ्चम्याः साधुतया तरोस्त्यजतीत्यादिको न प्रयोगः त्यजेर्वि-भागावच्छिन्नक्रियावाचित्वात् वृक्षादपैतीत्यादावपि लक्षणया पतनमेव धात्वर्थः विभागावच्छिन्नक्रियायास्तथात्वे वृक्षं त्यजति जहातीत्यादिवत् वृक्षमपैतीत्यपि प्रमाणमेव पतिस्तु न विभागावच्छिन्नं स्पन्दमभिधत्ते किन्त्वधःसंयोगावच्छिन्नं गुरुत्वप्रयोज्यपतनत्वजात्यवच्छिन्नं वा वृक्षाच्चलतीत्यादिवच्च वृक्षात् स्पन्दते इत्यपि प्रयोगो भवत्येव चलिस्पन्द्योर्द्वयोरप्य-कर्मकधातुत्वेन तत्प्रयोगस्याविशिष्टत्वात्। यत्तु तरुं त्यज-तीत्यत्र विभागो धात्वर्थः क्रियाजन्यविभागत्वेनापादानत्वमिव धात्वर्थतावच्छेदकीभूतफलत्वेन कर्मत्वमपीत्यपादानत्वकर्मत्व-योर्विभक्तिप्रसक्तौ कर्मत्वस्य परत्वात्तस्य बोधिका द्वितीयैव प्रव-र्त्तते न त्वपादानत्वस्य बोधिका पञ्चमी तथैव साकाङ्क्षत्वात्

अपादानसम्प्रदानकरणाधारकर्मणाम्। कर्त्तुश्चोभयसम्प्राप्तौ परमेव प्रवर्त्तते इत्यनुशासनादिति तच्चिन्त्यं । वृक्षाद्विभजते खग इत्यत्रावधित्वमवधिता निरूपकत्वं वा धात्वर्थेऽन्वितं पञ्चम्या प्रतिपाद्यते तेन वृक्षनिष्ठावधिताकविभागवान् खग इत्याकारकस्तत्र बोधः स्वप्रतियोगिक संयोगस्येव स्वावधिक-विभागस्यापि स्वस्मिन्नसत्त्वादेव स्वस्माद्विभजते इत्यादिको न प्रयोग इत्युक्तप्रायम् अवधित्वन्तु स्वरूपसम्बन्धप्रभेदः पदार्था-न्तरं वा इत्यन्यदेतत्। व्याघ्रात् बिभेति त्रस्यतीत्यादौ हेतुत्वं जन्यत्वं वा पञ्चम्यर्थः तच्च भावित्वेन स्वानिष्टचिन्तनपर्य्य-वसितस्य भयस्यैकदेशेऽनिष्टे चिन्तन एव वान्वितं तथाच व्याघ्रहेतुकस्य स्वानिष्टस्य भावित्वेन चिन्तनवान् व्याघ्रहेतुक-त्वेन भाव्यनिष्टधर्मिकचिन्तनवानिति वा तत्र बोधः। पापा-न्निवर्त्तते अधर्माद्विरमतीत्यादौ पञ्चम्या द्वेषोऽर्थः तत्र प्रकृ-त्यर्थस्य विषयत्वेन तस्य च निवृत्तिरूपे धात्वर्थे जन्यत्वेनान्वयः तेन पापगोचरद्वेषजन्यनिवृत्तिमानित्येवं तत्र बोधः तत्र विषयत्वं पञ्चम्यर्थः तथाच पापगोचरनिवृत्तिमानित्यर्थ इत्यन्ये। रणात् पराजयते इत्यत्र युद्धनिवृत्तिः पराजेरर्थः पञ्चम्यास्तु द्वेषस्तेन रणगोचरद्वेषजन्ययुद्धनिवृत्तिमानित्येवं तत्र बोधः कृत्यसाध्यत्वधीप्रयुक्तप्रवृत्त्यभाववत्त्वं तत्र पराजेरर्थः पञ्चम्यास्तु विशेष्यत्वं तच्च धात्वर्थैकदेशे बुद्धावन्वितं तेन रणधर्मिक स्वकृ-त्यसाध्यत्वधीप्रयुक्तप्रवृत्त्यभाववानित्याकारकस्तत्र बोध इत्यपि वदन्ति। शत्रुं पराजयते इत्यादौ त्वभिभवहेतुव्यापारः पराजेरर्थ इति धात्वर्थतावच्छेदकफलशालितया शत्रुप्रभृतेः कर्मत्वमिव। पापात् जुगुप्सते इत्यत्र गर्हापूर्वकनिवृत्ति-र्गुपधातोरर्थः सुपो विषयित्वं तच्च गर्हानिवृत्त्योः क्रमेणान्वयि तथाच पापविषयकगर्हाप्रयुक्तपापगोचरनिवृत्तिमानित्याकार-

बोधः। वल्मीकाग्रात् प्रभवति धनुःखण्डमाखण्डलस्येत्यत्र धातोरर्थः प्राक्प्रकाशनं तत्र पञ्चम्या अधिकरणत्वमाधेयत्वं वा प्रत्याय्यते यत्र प्रकाशनं प्रभुव इति सूत्रेणाधिकरणस्यैवापादानत्वोपदेशात्। एवञ्च वल्मीकाग्रवृत्तिप्रथमप्रकाशनवदाखण्डलस्य धनुःखण्डमित्याकारकस्तत्र बोधः। वल्मीकः सातपो मेघः आखण्डलः शक्रः। वल्मीकाग्रे आविर्भवति इत्यादौ च प्रकाशपर्य्यवसितोऽप्याविर्भावो न प्रपूर्वस्य भवतेरर्थ इति तत्राधिकरणतायां सप्तम्येव प्रमाणम्। धर्मादुत्पद्यते सुखं दण्डात् जायते घट इत्यादौ धातुना स्वाधिकरणसमयध्वंसानधिकरणसमयसम्बन्धरूपस्तत्समयवृत्तिध्वंसप्रतियोगिसमयावृत्तित्वे सति तत्तत्समयसम्बन्धरूप एव वा उत्पादः प्रत्याय्यते पञ्चम्या तन्निष्ठं जन्यत्वं तथाच धर्मजन्यो यः स्वाधिकरणसमयध्वंसानधिकरणसमयसम्बन्धस्तद्वत् सुखम् इत्याकारस्तत्र बोधः।

वार्त्तिककृतस्तु उत्पद्यते इत्यादौ प्रागभावप्रतियोगितारूपमेवोत्पत्तिमत्त्वं धात्वर्थस्तत्र च तिङर्थस्य वर्त्तमानादिकालस्यावच्छेद्यता सम्बन्धेनान्वयात् भाविन्युत्पद्यते इत्यादिको न प्रयोगः। किन्तु उत्पत्स्यत इत्यादिस्तत्र भविष्यत्कालावच्छेद्यस्यैव प्रागभावप्रतियोगित्वस्य सत्त्वेन वर्त्तमानकालावच्छेद्यतदसत्त्वात् अतएव नाशं प्राप्नोति प्राप्स्यतीत्यादावपि प्रतियोगित्वपर्य्यवसितायां प्राप्तौ लडादिना वर्त्तमानादिकालावच्छेद्यत्वमेवानुभाव्यते न तु वर्त्तमानत्वादिकं नाशप्रतियोगित्वस्य व्याप्यवृत्तित्वे भाविनाशं प्राप्नोति नष्टो नाशं प्राप्स्यतीत्यादिप्रयोगस्य दुर्वारतापत्तेः। वर्त्तमानं भाविकालवृत्ति वा यत् नाशप्रतियोगित्वं तस्य च भाविनि विनष्टे च सत्त्वात् नश्यति नंक्ष्यतीत्यादावपि धात्वर्थस्य नाशस्य प्रति-

योगित्वं स्वार्थेन वर्त्तमानादिकालेनावच्छिन्नं तिङा बोध्यते तेन भावि नश्यति नष्टो नंक्ष्यतीत्यादिको न प्रयोगः सम्प्रत्यादि-कालावच्छेदस्य नाशप्रतियोगित्वस्य भाव्यादावसत्त्वात्। यत्तु नश्यति नंक्ष्यति ननाशेत्यादौ प्रतियोगित्वमिव वर्त्तमाना भाविन्यतीता चोत्पत्तिरपि यथाक्रमं तिङर्थः तथाच वर्त्तमानोत्पत्तिकस्य ध्वंसस्य प्रतियोगित्वं न भाव्यादौ भाव्युत्पत्तिकस्य न नष्टादौ अतो भावी नश्यतीत्यादिको न प्रयोग इति दीधितिकृदुक्तं तन्न युक्तं कथितक्रमेणैव साम-ञ्जस्ये लङादेरुत्पत्तावपि वृत्त्यन्तरकल्पने गौरवात् अतएव ध्वंसप्रागभावयोः प्रतियोगितायां पूर्वापरकालावच्छेद्यत्व-प्रवादोऽपि पक्षधरमिश्राद्यनुमोदितः सङ्गच्छते। नचैवं प्रागभावादिप्रतियोगित्वस्य धर्माद्यजन्यत्वात् धर्मादुत्पद्यते सुखमित्यादेरयोग्यतापत्तिः सुखादेराद्यक्षणसम्बन्धरूपा-यामप्युत्पत्तौ धर्मादिजन्यत्वे प्रमाणाभावेनोक्तदोषस्य मतान्तरेऽप्यविशिष्टत्वादाद्यक्षणसम्बन्धस्य धर्माद्यजन्यत्वेऽपि तद्घटनत्वोपगमेन पक्षमीसमर्थने प्रागभावप्रतियोगित्व-रूपायामप्युत्पत्तौ तस्य सुवचत्वादिति प्राहुः कूपादन्धं वारयति विषाद्बालं निवारयति इत्यादौ च क्रियाधर्मिक-निवृत्त्यनुकूलव्यापारो वारणं तन्निविष्टनिवृत्तौ पञ्चम्या कूपा-दिप्रकारकत्वं द्वितीयया चान्धादिनिष्ठत्वं प्रत्याय्यते क्रिया च पतनभोजनादिर्विशेषतो ग्राह्या तथा चान्धनिष्ठायाः पतनधर्मिककूपप्रकारकनिवृत्तेर्बालनिष्ठायाश्च भोजनधर्मिक विषप्रकारकनिवृत्तेरनुकूलव्यापारवानित्याकारकस्तत्र बोधः तथाविधनिवृत्त्यनुकूलव्यापारश्च स्वार्थधीद्वारा कूपे मा पत विषं मा भुंक्ष्व इत्याद्यभिलापरूपः स्फुट एव। यत्तु पतनादिप्रतिकूलव्यापारो वारणं तदेकदेशे च पतनादा-

वन्थादेराधेयत्वेन कूपादेः कर्मत्वेनान्वयादन्धनिष्ठस्य कूपकर्मकपतनस्य प्रतिकूलव्यापारवानित्यादिरूपः कूपादन्धं वारयतीत्यादितो बोध इति तत्तुच्छं तादृशपतनस्याप्रसिद्धस्थले तथाविधवाक्यस्यायोग्यतापत्तेः परस्वेभ्यः पाणिं निवारयतीत्यत्रानयनधर्म्मिकनिवृत्त्यनुकूलव्यापारो निवारणं तदन्तर्गतनिवृत्तौ च पाण्यादेरवच्छेदकत्वेन परस्वादेश्च प्रकारत्वेनान्वयः तादृशव्यापारः कराकुञ्चनादिरेव। स्वाङ्गाद्बाणं वारयतीत्यत्र च यद्यपि बाणनिष्ठस्य स्वाङ्गसंयोगस्य विरोधिव्यापारो नार्थः तादृशसंयोगस्याप्रसिद्धेः तथापि बाणसंयोगाभावनिष्ठायाः स्वाङ्गवृत्तितायाः प्रयोजकव्यापारः तथाच संयोगाभावनिष्ठस्य प्रयोजकव्यापारस्तत्र वारणं तन्निविष्टे च संयोगे द्वितीयान्तलभ्यस्य बाणप्रतियोगिकत्वस्य संयोगाभावनिष्ठे च पञ्चम्यन्तलभ्यस्य स्वाङ्गवृत्तित्वस्यान्वयः कार्य्याभाव इव तन्निष्ठे अधिकरणविशेषवृत्तित्वेऽपि प्रतिबन्धकस्य प्रयोजकत्वात् अतएव मणिः काष्ठे दाहाभावस्य प्रयोजकः नतु पाथसीत्यादिकः सार्वलौकिकव्यवहार इति बाणसंयोगाद्यभावनिष्ठस्य स्वाङ्गवृत्तित्वस्य प्रयोजकत्वं बाणापसारणादिव्यापारस्य नासिद्धम्। दण्डात् घट इत्यादौ पञ्चम्यर्थोऽपि जन्यत्वादिकं न कारकं धात्वर्थानन्वयित्वात् अतएव दण्डघट इत्यादिकस्तत्र न प्रयोग इत्यपि ध्येयम्।

सम्प्रदानत्वं लक्षयति।

गत्यादिभिन्ने धात्वर्थे चतुर्थ्या विग्रहस्थया।

यः स्वार्थो बोधनीयस्तत् सम्प्रदानत्वमीरितम्।

गत्यादिभिन्ने यद्धातूपस्थाप्ये यादृशार्थे विग्रहस्थचतुर्थ्या यः स्वार्थो बोधयितुं शक्यते स तद्धातूपस्थाप्यतादृ-

शक्रियायां सम्प्रदानत्वमुच्यते। ब्राह्मणाय दानं धनस्ये-त्यादौ ददातेः स्वत्वजनकत्यागोऽर्थ स्तन्निविष्टे च स्वत्वे ब्राह्मणादेः प्रतियोगित्वं निरूपितत्वं वा चतुर्थ्या बोध्यते इति तदेव तत्र सम्प्रदानत्वं ब्राह्मणप्रतियोगिकं ब्राह्मण-निरूपितं वा यद्धनवृत्ति स्वत्वं तज्जनकस्त्याग इत्येवं तत्र प्रत्ययात् धात्वर्थतावच्छेदकीभूतस्वत्वाख्यफलवत्तया धनादे-र्दानकर्मत्वात्। नचैवं पशुकामनया यागकरणदशायां चैत्रः स्वात्मने पशुं ददातीत्यपि प्रयोगापत्तिस्तादृशयागस्य चैत्रीयं यत् पशुनिष्ठं स्वत्वं तज्जनकत्यागत्वादिति वाच्यं स्वत्वध्वंसजनकक्रियापर्य्यवसन्नस्य त्यागस्यैकदेशे स्वत्वध्वंसेऽपि द्वितीयार्थस्यान्वयेन पशुफलकयागे पशुनिष्ठस्य स्वत्वध्वं-सस्य जनकत्वविरहादेव तद्वाक्यस्याप्रमाणत्वात्। ग्रामाय गत इत्यादौ विग्रहस्थचतुर्थ्या धात्वर्थे बोध्यमपि कर्मत्वं न गत्यादिभिन्ने वृक्षाय सेचक इत्यादौ गत्यादिभिन्ने चतुर्थ्या बोधनीयोऽपि सम्बन्धयितुमित्यादि तुमर्थो न विग्रहस्थयेति न तत्र प्रसङ्गः। सम्प्रदानशब्दस्तु स्वाश्रयगोचरत्यागजन्य-स्वत्वस्य प्रतियोगिन्येव शक्त इति स्वत्वप्रतियोगित्वं सम्प्र-दानमित्यादिको न प्रयोगः।

न च दानस्य स्वत्वहेतुत्वे प्रमाणाभावः सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः। प्रयोगः कर्मयोगश्च सत्प्रति ग्रह एव चेत्यादि मन्वादिवचनैस्तस्य स्वत्वहेतुत्वाप्रतिपाद-नादिति वाच्यं ब्राह्मणाय त्यक्तायां गवि गौरियं ब्राह्म-णस्य नतु ममेत्यादिसर्वजनीनप्रतीतेरेव तत्र प्रमाणत्वात् प्रदानं स्वाम्यकारणमिति वचनाच्च। अतएव विदेशस्थं पात्रमुद्दिश्य त्यक्तधने स्वीकारमन्तरेणैव पात्रस्य मरणस्थले पितृदायत्वेन तद्धनं पुत्रादिभिर्विभज्य गृह्यते अन्यथा

तैरिव उदासीनैरपि तद्दत्तस्वीकारस्य कुमारादेरिवोपादाने यथेष्टनियोगे च प्रत्यवायो न स्यात् । नन्वेवं दानादेव स्वत्वसिद्धेर्दत्तवस्तुनि स्वीकारो व्यर्थ इति चेन्न सख्या चादृष्टगुणं फलमित्यादिस्मृतेः प्रतिगृहीतद्रव्यदानस्य फलविशेषं प्रति हेतुत्वेन तादृशफलसम्पत्त्यर्थमेव प्रतिग्रहस्योपयोगात् याजनाध्यापनप्रतिग्रहैर्द्विजो धनमर्ज्जयेदित्यादि श्रुत्या प्रागुक्तस्मृत्या च प्रतिग्रहस्यापि स्वत्वहेतुत्वबोधनाच्च स्वत्वजनकव्यापारस्यैवार्ज्जनपदार्थत्वात् । दासाय भक्ष्यं ददाति भृतकाय वेतनं ददातीत्यादावपि स्वत्वजनकत्यागं प्रतिपादयन् ददातिर्मुख्य एव पुण्यजनकन्तु न तादृशं दानमवैधत्वात् । यत्तु स्वीकारजन्यस्य स्वत्वस्य जनकस्त्यागो दानं मनसा पात्रमुद्दिश्य धनत्यागस्तु न दानं किन्तूत्सर्गमात्रं प्रतिग्रहजन्यस्वत्वं प्रति हेतुभूतवैधत्यागस्यैव तथात्वात् उपेक्षा तु स्वत्वध्वंसमात्रजनकस्त्यागो नतु तत्र स्वत्वजनत्वस्यान्तर्भाव इति मैथिलैरुक्तं तन्न युक्तं लाघवेन स्वत्वजनकत्यागस्यैव ददात्यर्थत्वात् । तिलानस्मै प्रतियच्छति तुरगमस्मै विक्रीणीत इत्यादौ द्रव्यान्तरग्रहणपूर्वकं दानमेव प्रतिदानं मूल्यग्रहणपूर्वकं दानमेव च विक्रय इति तत्रापि मुख्यमेव सम्प्रदानत्वं चतुर्थ्या बोध्यते तिलादिकञ्च न मूल्यं पणपुराणादेरेव शास्त्रे तथात्वोपदेशात् । अदृष्टार्थं दत्तस्यैव च स्वीकारः प्रतिग्रह इति परेण प्रतिदत्तस्य विक्रीतस्य वा तिलतुरगादेः स्वीकारो न दोषावहः ।

मैत्राय रोचते मोदक इत्यत्र चतुर्थ्या धात्वर्थान्वितमाधेयत्वं धातुना च भक्ष्यत्वप्रकारकेच्छोपस्थाप्यते तिङा तु प्रकाशत इत्यादाविव विषयत्वलक्षणं कर्तृत्वं तथाच मैत्रनिष्ठया भक्ष्यत्वप्रकारकेच्छया विषयतावान् मोदक इत्याकारकस्तत्र

बोधः। गुरवे गां धारयते इत्यत्र छृक्ता गृहावस्थितिर्द्वि-तीयया तदन्वितं कर्त्तृत्वं चतुर्थ्या च तन्निविष्टगृहान्वितं सम्बन्धित्वमुपपस्थाप्यते तेन गोकर्त्तृकाया गुरुसम्बन्धिगृहा-वस्थितेरनुकूलव्यापारवानित्याकारस्तत्र बोधः धातूत्तरणिचा व्यापारबोधनादिति कालापाः। पाणिनीयास्तु धारेरुत्तमर्ण इति सूत्रानुसारेण चैत्राय शतं धारयते इत्यादाविव गुरवे गां धारयते इत्यादावपि ऋणग्रहणं धारणं दत्तत्वञ्च चतुर्थ्यर्थः तथाच गुरुदत्तां गां ऋणत्वेन गृह्णातीत्याकारस्तत्र वाक्यार्थः पश्चाच्छोध्यत्वेनाङ्गीकृत्य गृहीतञ्च द्रव्यमृणमित्याहुः। पुत्राय राध्यति पुत्रायेच्चत इत्यादौ दैवनिरूपणं धात्वर्थस्तन्निविष्टे च दैवे सुवर्थस्य सम्बन्धस्यान्वयस्तेन पुत्रस्य दैवं निरूपयतीत्येवं तत्र बोधः। गुरवे गां प्रतिशृणोति आशृणोतीत्यादौ देयत्वे-नाभ्युपगमः शृणोतेरर्थस्तत्र गोविशेषणत्वेन तदेकदेशे च दाने गुरोरुद्देश्यत्वेनान्वयस्तेन गुरूद्देश्यकदानकर्मत्वेन गामभ्यु-पगच्छतीत्येवं तत्र बोधः। होत्रे प्रतिगृणातीत्यादौ हर्षा-नुकूलव्यापारलक्षणं प्रोत्साहनं गृणातेरर्थस्तदेकदेशे च हर्षे होत्रादेरन्वयस्तेन होतृनिष्ठहर्षानुकूलव्यापारवानित्याकारक-स्तत्र बोधः। चैत्राय कुप्यति क्रुध्यतीत्यादौ धात्वर्थ उत्कट-द्वेषस्तत्र विषयित्वलक्षणं सम्प्रदानत्वं चतुर्थ्या बोध्यते तेन चैत्र-विषयकोत्कटद्वेषवानित्याकारकस्तत्र बोधः। पुत्रे कोपो न युज्यते इत्यादौ कृदन्तस्य कोपपदस्यैवार्थे पुत्र इत्यस्यान्वयो नतु धात्वर्थे। पटाय यतते इत्यादावपि धात्वर्थकृतौ सुपा पटस्य विषयित्वं बोध्यते तत्रोद्देश्यत्वमेव चतुर्थ्यर्थः कथमन्यथा पटेच्छया तन्तुनिर्माणदशायां पटाय यतते इत्यादिकः प्रयोगः इत्यपि वदन्ति। मित्राय द्रुह्यतीत्यत्र हिंसाचरणं द्रोहस्तेन मित्रस्य हिंसमाचरतीत्यर्थः। शिष्यायेर्ष्यतीत्यत्रानिष्टानुपे-

गुणमीर्ष्या तथाच शिष्यानिष्टं नोपेक्षत इत्यर्थः। पुत्रायासूयतीत्यत्र असूया गुणद्वेषस्तेन पुत्रस्य गुणं द्वेष्टीत्याकारस्तत्र बोधः। मित्रं द्रुह्यति शिष्यमीर्ष्यति पुत्रमसूयतीत्यपि प्रयोगात् द्रुहादिकर्म्मणः सम्प्रदानत्वं वैकल्पिकमित्युच्यते। कोपपूर्वकस्य द्रोहादेर्द्रुहादिधातुवाच्यत्वे तत्कर्म्मणः सम्प्रदानत्वं द्रोहादिमात्रस्य तथात्वे तु कर्म्मत्वमेवेति पुनः कौमाराः। सोपसर्गयोस्तु क्रुधद्रुहोः कर्म्मणः कर्म्मतैव नतु सम्प्रदानता अतएव शिष्यस्याभिक्रोद्धा मित्रस्याभिद्रोढेत्यादौ कृद्योगे कर्म्मणि षष्ठ्येव प्रमाणम्।

करणत्वं लक्षयति।

योऽर्थो विकरणान्तस्य धातोरर्थे तृतीयया।
बोध्यते करणं ताद्य कारकं तदिहोच्यते॥

सविकरणस्य यद्धातोरुपस्थाप्ययादृशार्थतृतीयया यादृशः स्वार्थेऽनुभाव्यते स तज्जातूपस्थाप्यतादृशक्रियायाः करणसंज्ञकं कारकमुच्यते। दात्रेण छिनत्ति घटत्वेन जानातीत्यादौ धात्वर्थे छिदायां दात्रस्य व्यापारद्वारा जन्यत्वादि ज्ञानादौ च घटत्वादेः प्रकारित्वादिकं तृतीयया बोध्यते तदेव तत्र करणत्वं चैत्रेण पक्वमित्यादौ धातोरर्थे तृतीयया बोध्यमपि कर्तृत्वं न विकरणान्तस्य हस्तेन गृह्णातीत्यादौ विकरणान्तभिन्नोऽपि ग्रहादिधातुर्विकरणान्त एव घृतेनाग्निं जुहोतीत्यादावपि लुप्तमेव प्रतिसन्धीयमानविकरणमस्तीति मतेनेदं नातस्तत्र घृतादेः करणत्वव्याहतिः करणशब्दस्तु व्यापारप्रत्यासत्त्या जनकस्य वाचकः चाक्षुषादौ चक्षुरादिः संयोगेन अनुमित्यादौ व्याप्तिज्ञानादिः परामर्शादिना स्मृत्यादावनुभवादिः संस्कारादिना स्वव्यापारेणैव सम्बन्धेन हेतुः शरीरात्मप्रभृतयस्तु ज्ञानादौ तादात्म्येनैव अतो न तेषां तत्र करणत्वप्रसङ्गः।

श्रावणेऽपि प्रत्यक्षे कर्णावच्छिन्नशब्दात्मना व्यापारेणैव सम्बन्धेन श्रोत्रं करणं स्वव्यवस्थापकगुणं पुरस्कृत्यैव वहिरिन्द्रियाणां प्रवृत्तेः शब्दसामान्याभावस्य श्रावणत्वविरहेऽपि क्षत्यभावात् श्रोत्रमनसोः संयोग एव वा तत्र व्यापारः ज्ञानस्य धारावहन-स्थले च तृतीयादिकं प्रति द्वितीयादिकं न प्रथमादेः प्रत्यासत्तिस्तत्सम्बन्धेन हेतुत्वे मानाभावात् फलायोगव्यवच्छिन्नं फलोपधायकं वा कारणमेव करणं ज्ञानादावात्मादेः करणत्वस्येष्टत्वात् उपधेयसङ्करेऽपि कर्तृत्वकरणत्वाद्युपाधेरसाङ्कर्य्यादेव कारकस्य षड्विधत्वादत एवात्मानमात्मना वेत्ति सृजत्यात्मानमात्मनेत्यादिकः प्रयोगः अतएव च विवक्षातः कारकविभक्तयो भवन्तीत्यपि प्रवाद इत्यन्ये। पशुना रुद्रं यजेत इत्यत्र पशुं रुद्राय ददातीत्यर्थः करणं कर्म्म यजेः कर्म्म च सम्प्रदानमित्यनुशासनात् कर्म्मत्वादावपि तृतीयादेः साधुत्वात्। एतदुदाहरणमात्रविषयानुशिष्टिरियमिति वृद्धाः। पायसेन विष्णुं यजेत इत्यादिप्रयोगात् सामान्यत एवेत्यपरे। दण्डेन घट इत्यत्रापि तृतीयार्थः करणत्वं परन्तु तत्र कारकं क्रियानन्वयित्वात्।

अधिकरणत्वं लक्षयति।

> यत्क्रियायां यदन्यार्थः सप्तम्या विषयस्तया।
> सोऽध्यस्तस्यां तदेवाधिकरणं नाम कारकम्॥

क्रिया धात्वर्थस्तथाच यद्धातूपस्थाप्यक्रियार्थे विशेष्यतया सप्तम्या यः यः स्वार्थोऽनुभाव्यते तदेव तद्धातूपस्थाप्यताद्दशक्रियायामधिकरणत्वं नाम कारकम्। ग्रामे गन्तेत्यत्र धात्वर्थे गतौ ग्रामनिष्ठमधिकरणत्वं तन्निरूपितमाधेयत्वं वा सप्तम्यानुभाव्यत इति तदेव तद्धातूपस्थाप्यताद्दशक्रियायामधिकरणत्वकारकम् अतएव ग्रामगन्तेत्यादिकस्तत्र समासः।

यद्यपि चैत्रादिनिष्ठाया गतेः समवायादिना ग्रामादिवृत्तित्वं बाधितं कालिकादिना तद्वृत्तित्वञ्चातिप्रसक्तं स्पन्दे गच्छतीत्यपि प्रयोगापत्तेस्तथापि ग्रामे गच्छत्ययं नतु गृहादावित्याद्यनुभवसाक्षिकेण स्वरूपसम्बन्धविशेषेण तथात्वं बोध्यम्। यत्तु संयोगावच्छिन्नक्रियाया गतित्वात् तन्निविष्टसंयोगे समवायेनैव ग्रामवृत्तित्वसत्त्वान्नासङ्गतिरिति तन्न ग्रामादेर्धात्वर्थतावच्छेदकीभूतफलान्वयित्वेन कर्म्मतापत्त्या ग्रामं गच्छतीत्येव नियमतः प्रयोगापत्तेः। विक्लित्त्यवच्छिन्नक्रियायाः पाकत्वेन तस्यामिव तन्निविष्टविक्लित्तावपि समवायादिना स्थाल्यादिवृत्तित्वासम्भवेन स्थाल्यां पचति तण्डुलमित्यादौ तथाप्यप्रतीकाराच्च तण्डुलाद्यवयवविभागप्रभेदस्यैव विक्लित्तित्वादिति। घटत्वं घटे भासत इत्यत्र विषयतापर्य्यवसन्ने भासने घटनिष्ठं विशेष्यत्वमवच्छेद्यतासम्बन्धेन सम्बध्यानुभाव्यत इति तत्रापि तदेवाधिकरणतानामकं कारकम्। ज्ञाने घटत्वं भासत इत्यादौ निरूपितत्वमपि। घटे पटत्वं जानातीत्यादौ तु विशेष्यतारूपः सम्बन्धो न धात्वर्थेऽन्वेति घटपटयोस्ताद्रूप्येण प्रमास्थलेऽपि तादृशप्रयोगापत्तेः परन्तु द्वितीयार्थे पटत्वप्रकारत्व एवावच्छेद्यत्वसम्बन्धेन। यथा च सुबर्थयोर्मिथोऽन्वयेऽपि न क्षतिस्तथा वक्ष्यते। अधिकरणपदस्य शक्यतावच्छेदकन्तु न सम्बन्धमात्रं घटाद्यात्मनस्तदधिकरणतापत्तेः वृत्तिनियामकः सम्बन्धस्तथेत्यपि न कुण्डादौ वदरादेरिव वदरादावपि कुण्डादेरधिकरणतापत्तेर्वृत्तिनियामकत्वस्याधिकरणतावच्छेदकत्वे पर्य्यवसानाच्च नाप्याधेयतानिरूपकत्वमधिकरणत्वं तुल्यन्यायेनाधिकरणतानिरूपकत्वस्यैवाधेयतात्वेन परस्पराश्रयप्रसङ्गात् परन्त्वाधेयतावत् पदार्थान्तरमेवाधिकरणत्वं तच्च नैकं सर्वस्य सर्वाधिकरणतापत्तेः किन्त्वाधेयताभेदेन नानैव प्रतीत्यनु-

गमस्तु कूपत्वादिना कूपादेरिवाधिकरणतात्वे नैवाखण्डेन तस्य नचैकधर्मावच्छिन्नाधिकरणत्वं लाघवादेकमेवोचितं रूपत्वेन नीलस्याधिकरणं स्फटिकमित्यपि प्रयोगापत्तेः। अतएव तद्रूपरसयोः समनियतमप्यधिकरणत्वं विभिन्नमेव अन्यथा तद्रूपत्वेन तद्रसस्याधिकरणं घट इत्यादेरपि योग्यतापत्तेरित्यास्तां विस्तरः।

कर्मत्वकारकं लक्षयति।

यगन्तधातोरर्थो यत्तिङा स्वार्थेऽनुभाव्यते।
यत्रासौ कर्मता नाम कारकं कर्तृतेतरः॥

यगन्तस्य यद्धातोरुत्तरस्थतिङा यत्र स्वार्थं तदीयो यादृशोऽर्थोऽनुभावयितुं शक्यते तद्धातूपस्थाप्यतादृशक्रियायां स तिङर्थः कर्तृताभिन्नः कर्मत्वं नाम कारकमित्यर्थः। ग्रामो गम्यते इत्यत्र गमधातूपस्थाप्यायाः संयोगावच्छिन्नक्रियायाः स्वजन्यत्वसम्बन्धेन तिङ्पदोपस्थाप्ये संयोग एवान्वयो नतु त्यजत इत्यादाविव विभागादौ धात्वर्थतावच्छेदकस्यैव फलस्य बाधने कर्मविहितप्रत्ययानां धातुसाकाङ्क्षत्वादतः संयोग एव तत्र गतिक्रियायाः कर्मत्वं नतु विभागादिः तेन तरोस्त्यागिनि खगे तरुं गच्छतीत्यादिको न प्रयोगः गम्यते रथः स्वयमेवेत्यादौ कर्मत्वमिवानुकूलव्यापारवत्त्वलक्षणं कर्तृत्वं धात्वर्थस्य धर्म्यपि न तत् कर्तृताभिन्नमिति तद्व्युदासः। ननु चैत्रकर्तृकगमनजन्यसंयोगस्य ग्राम इव चैत्रेऽपि सत्त्वाच्चैत्रेण गम्यते चैत्र इत्यपि प्रयोगः स्यात् न स्यात् तिङर्थसंयोगे स्वजन्यत्वस्वाश्रयप्रतियोगिकत्वोभयसम्बन्धेन धात्वर्थगतेः साकाङ्क्षत्वेन चैत्रकर्तृकगत्याश्रय प्रतियोगिकत्वविशिष्टस्य संयोगस्य चैत्रे बाधितत्वात्। अतएव चैत्रो ग्रामं गच्छतीतिवत् चैत्रश्चैत्रं गच्छतीत्यपि न प्रयोगः तत्रापि द्वितीयार्थसंयोगे प्रकृत्यर्थस्य स्वप्रतियोगिक-

त्वसम्बन्धेनैव साकाङ्क्षतया द्वितीयान्तलभ्यस्य चैत्रीयत्वविशिष्टसंयोगस्य जनकत्वस्वाश्रयवृत्तित्वोभयसम्बन्धेनैव क्रियायामन्वयेन चैत्रप्रतियोगिकसंयोगाश्रयवृत्तिगतेश्चैत्रे बाधितत्वात् ।

यत्तु फलमिव क्रियायामन्वितं परसमवेतत्वमपि कर्मतावाचि प्रत्ययस्यार्थः परत्वञ्च तिङा स्वार्थफलान्वयिप्रतियोगिकं द्वितीयादिसुपा तु प्रकृत्यर्थप्रतियोगिकं प्रत्याय्यते तथाच चैत्रकर्तृकस्य चैत्रान्यसमवेतगमनस्याप्रसिद्धत्वेन चैत्रे तज्जन्यसंयोगस्यासम्भवात् चैत्रेण गम्यते चैत्र इत्यादिको न प्रयोगः । एवं चैत्रान्यसमवेतस्य गमनस्य चैत्रे वाधात् चैत्रश्चैत्रं गच्छतीत्यादिरपि । चैत्रेण गम्यते ग्राम इत्यादौ तु चैत्रकर्तृकस्य ग्रामभिन्नसमवेतस्य गमनस्य जन्यो यः संयोगस्तद्वान् ग्राम इत्यन्वयबोधने न किञ्चित् बाधकमिति प्राचैरुक्तं तन्न युक्तं, संख्याकालातिरिक्तस्य तिङर्थस्य धात्वर्थविशेषत्वनियमेन तिङर्थपरसमवेतत्वादेर्धात्वर्थगत्यादावन्वयायोगात् प्रथमान्तोपस्थाप्यग्रामादेरभेदान्यसम्बन्धेनान्वत्वप्रत्ययार्थे तिङर्थे वान्वयस्य दृष्टचरत्वेनाव्युत्पन्नत्वात् चैत्रेण गम्यते द्रव्यं द्रव्यं गच्छति चैत्र इत्यादौ द्रव्यान्यसमवेतस्य गत्यादेरप्रसिद्धत्वेनायोग्यतापत्तेश्च । नव्यास्तु फलमिव भेदोऽपि कर्मत्ववाचिप्रत्ययस्यार्थस्तथाच चैत्रेण गम्यते ग्राम इत्यत्र तिङर्थभेदस्य सामानाधिकरण्यसम्बन्धेन धात्वर्थविशेषत्वात् प्रतियोगित्वसम्बन्धेन प्रथमान्तार्थे ग्रामादौ विशेषणत्वान्न व्युत्पत्तिविरोधो नवातिप्रसङ्गः, चैत्रकर्तृकगमनाश्रयवृत्तिभेदप्रतियोगित्वस्य चैत्रे विरहात्, चैत्रं गच्छतीत्यादावपि प्रतियोगित्वसम्बन्धेन चैत्रान्वितस्य द्वितीयार्थभेदस्य सामानाधिकरण्यसम्बन्धेन धात्वर्थगतावन्वयात् तादृशगतेश्चैत्रे बाधाच्चैत्रं

गच्छति चैत्र इत्यादिको न प्रयोगः प्रतियोगित्वञ्च उभयावृत्ति-धर्मावच्छिन्नं धर्मद्वयानवच्छिन्नं वा ग्राह्यमतो द्रव्यं गच्छती-त्यादौ गतेर्द्रव्यभेदसामानाधिकरण्यविरहेऽपि न क्षतिरिति प्राहुस्तच्चिन्त्यम् ।

वृक्षं खगस्त्यजतीत्यादौ विभागावच्छिन्नक्रिया त्यजेरर्थः द्वितीयायास्तु विभागस्तेन वृक्षावधिकविभागवती या विभागाव-च्छिन्नक्रिया तद्वान् खग इत्याकारस्तत्र बोधः वृक्षावधिक-विभागवत्त्वञ्च जनकत्वस्वाश्रयवृत्तित्वोभयसम्बन्धेनैव क्रियायां ग्राह्यमतः खगावधिकविभागस्य खगादावसत्त्वात् खगं त्यजति खग इत्यादिको न प्रयोगः । खगेन त्यज्यते खग इत्यपि प्रयोगः प्रागुक्तरीत्या निरसनीयः ।

प्राञ्चस्तु ग्रामं गच्छति त्यजतीत्यादौ सर्वत्र क्रियामात्रं धात्वर्थस्त्यजिगम्योः पर्य्यायत्वेऽपि न क्षतिः । गत्यर्थक्रियायां संयोगस्यैव त्यज्यर्थक्रियायाञ्च विभागस्यैव बोधकतायाः कर्म-प्रत्ययेषु व्युत्पन्नत्वात् तरुं त्यजतीत्यादौ संयोगस्य तरुं गच्छती-त्यादौ च विभागस्य द्वितीयादितो नावगमः परैरपि समभि-व्याहृतधात्वर्थतावच्छेदकफलस्यैव द्वितीयादिबोध्यताव्युत्पत्ते-रभ्युपेतव्यत्वात् अन्यथातिप्रसङ्गात् । नचैवं स्पन्दो न स्पन्द इत्यादेरिव त्यागो न गतिरित्यादेरपि वाक्यस्य निराकाङ्क्षता-पत्तिस्तत्र त्यजिगम्योर्विभागाद्यवच्छिन्नक्रियालक्षकत्वेनैवान्वय-योग्यतासम्भवात् द्वितीयासाकाङ्क्षतुमन्तधातुत्वप्रयुक्त एव च धातूनां सकर्मकत्वव्यवहारो न तु फलावच्छिन्नक्रियावाचित्व-प्रयुक्तः स्पन्दनभूतावव्याप्तत्वात् । स्मृत्यर्थधातूनां कर्मणि षष्ठ्या इव द्वितीयाया अपि साधुत्वात् । एवञ्च ग्रामं गच्छति तरुं त्यजतीत्यादौ ग्रामसंयोगजनकक्रियावांस्तरुविभागजनक-क्रियावानित्याकारक एव बोधो न तु ग्रामसंयोगजनकसंयोगा-

वच्छिन्नक्रियावांस्तद्विभागजनकविभागावच्छिन्नक्रियावानित्याकारकः संयोगविभागयोरुभयथाभानस्य नीलघटजनकघटजनकदण्डवानित्यादौ घटादेरिव निराकाङ्क्षत्वेनासम्भवादनुभवबाधितत्वाच्चेत्याहुः।

परे तु संयोगः क्रिया च द्वयमेव प्रत्येकं गमिशक्यं तयोर्जन्यजनकभावस्तु वाक्यार्थमर्य्यादया भासते एवार्थयोरन्ययोगव्यवच्छेदयोरिव गम्यर्थयोः संयोगक्रिययोर्मिथ एव साकाङ्क्षत्वान्नैकमात्रे गमिप्रयोगः। पुष्पवन्तपदे चन्द्रत्वसूर्य्यत्वाभ्यामिव विभिन्नरूपाभ्यां प्रकृतेऽपि संयोगत्वक्रियात्वाभ्यां गमधातोरेकशक्तिस्वीकारेऽपि न चतिः इयांस्तु विशेषो यत्तत्र सूर्यशशिनोर्मिथो नान्वयः प्रकृते तु संयोगक्रिययोस्तथेति तथाच ग्रामं गच्छतीत्यत्र द्वितीयाया आधेयत्वं प्रतियोगित्वं वार्थस्तेन तदन्वितस्य संयोगस्य क्रियायामन्वयात् ग्रामवृत्तिस्तत्प्रतियोगिको वा यः संयोगस्तद्विशिष्टक्रियावानित्याकारकस्तत्र बोधः तरुं त्यजतीत्यत्राप्याधेयत्वमवधित्वं वा द्वितीयार्थस्तेन तदन्वितस्य धात्वर्थविभागस्य धात्वर्थान्तरे क्रियायामन्वयात् तरुवृत्तिस्तदवधिको वा यो विभागस्तद्विशिष्टक्रियावानित्याकारको बोधः संयोगादिवैशिष्ट्यञ्च जनकत्वस्वाश्रयवृत्तित्वोभयसम्बन्धेनैव प्रागिव ग्राह्यमतो नातिप्रसङ्गः। सकर्मकत्वमपि धातोः स्वार्थफलावच्छिन्नस्वार्थक्रियान्वयबोधकत्वं जानातीत्यादौ सकर्मकत्वव्यवहारो भाक्त इत्याहुः।

तण्डुलं पचतीत्यत्र रूपादिपरावृत्तिफलकतेजःसंयोगावच्छिन्नक्रिया पचेरर्थः तन्निविष्टे च निरूक्ते तेजःसंयोगे तण्डुलस्याधेयत्वेनान्वयः परमाणुं पचतीत्यपि प्रयुज्यत एव अतएव स्वतन्त्राः परमाणवः पच्यन्ते इति किरणावल्यामाचार्य्याः। ओदनं पचतीत्यादौ तु तण्डुलादावोदनादिपदस्य लक्षणा तत्र

क्रियायामन्वितमनुकूलत्वं द्वितीयार्थ इत्यपि कश्चित्। द्वयं
छिनत्तीत्यादावारम्भकसंयोगविरोधिविभागावच्छिन्नक्रिया छिदे-
रर्थस्तन्निविष्टे च संयोगे विभागे वा स्वावयववृत्तित्वसम्बन्धेन
तृणादेरन्वयः। पुष्पेण विष्णुं यजत इत्यत्र प्रीत्यवच्छिन्न-
समन्त्रकद्रव्यत्यागो यजेरर्थः प्रीतौ विष्णोराधेयत्वेन द्रव्ये च
पुष्पादेरभेदेनान्वयस्तेन विष्णुनिष्ठप्रीतिहेतुर्यो मन्त्रकरणकः
पुष्पाभिन्नद्रव्यत्यागस्तद्वानित्याकारस्तत्र बोधः स्वत्वध्वंसजन-
कोच्चापर्य्यवसन्नस्य त्यागस्यैकदेशे स्वत्व एव वा पुष्पादेराधेयत्वेन
तत्रान्वयस्तेन द्रव्येण विष्णुं यजत इत्यादौ द्रव्यस्य द्रव्याभिन्न-
त्वेन शाब्दासत्त्वेऽपि न क्षतिः। पितरमाराधयति उपास्ते
पूजयतीत्यादौ गौरवप्रयुक्तप्रीत्यवच्छिन्नक्रिया धात्वर्थस्तन्निविष्ट-
योर्गौरवप्रीत्योः क्रमेण विषयत्वाधेयत्वाभ्यां पित्रादेरन्वयस्तेन
पितृगोचरगौरवप्रयुक्ता या पितृनिष्ठप्रीतिहेतुक्रिया तद्वानित्येवं
तत्र बुद्धिः। गौरवं पुनराराध्यत्वावगाही ज्ञानप्रभेदो येयं
भक्तिरित्युच्यते। पित्रादिसेवायाश्च मन्त्रकरणकत्वाभावान्न
तत्र पितरं यजत इत्यादिकः प्रयोगः। परमात्मानमुपास्ते
इत्यादौ तु गौरवप्रयुक्तक्रियामात्रे धातुलक्षणा नातः परमेशितुः
प्रीतिविरहादयोग्यत्वापत्तिः। घृतं जुहोतीत्यादौ वह्न्यधि-
करणकपतनावच्छिन्नमन्त्रकरणकक्रिया हुधातोरर्थः प्रोक्ते च
पतने घृतस्याधेयत्वेनान्वयस्तेनाग्न्यधिकरणकस्य घृतवृत्ति-
पतनस्यानुकूलमन्त्रकरणकक्रियावानित्येवं तत्र बोधस्तादृशी च
क्रिया सघृतस्य करादेः प्रसारणन्युब्जीकरणादिरेव। अतएव
घृतादेः परित्यागित्वविरहाद्देवतादेर्न यष्टृत्वं किन्तु होतृत्वमेव
वह्नौ जुहोतीत्यत्र सप्तम्यन्तस्यार्थो न धात्वर्थनिविष्टे पतनेऽ-
न्वेति वह्निवृत्तित्वविशिष्टपतने तद्वृत्तित्वस्यान्वये निराकाङ्क्ष-
तापत्तेः, परन्तु तदवच्छिन्नक्रियायामेव प्रतिमादौ घृतादिस्नपनं

मन्त्रकरणकमपि नाम्नाधिकरणकं यतो घृतस्य प्रक्षेपमात्रमन्त्राधिकरणकतत् पतनानुकूलमपि न मन्त्रकरणकमतस्तदुभयं न होमः प्राजापत्येऽपि होमे मानस एव मन्त्रः करणं यद्वा वह्निसंयोगावच्छिन्नपतनानुकूलमन्त्रकरणकं क्रियैव जुहोत्यर्थस्तेन घृतं जुहोतीत्यत्र वह्निसंयोगजनकं यद्घृतस्य पतनं तदनुकूलमन्त्रकरणकक्रियाविशेषवानित्याकारको बोधः। नचैवं हुधात्वर्थतावच्छेदकीभूतसंयोगाश्रयफलशालित्वेन वह्न्यादेस्तदर्थकर्मतया वह्निं जुहोतीत्यपि प्रयोगापत्तिः साक्षात् धात्वर्थतावच्छेदकीभूतस्यैव फलस्यान्वयिनः कर्मत्वादन्यथा भवने लोष्टमुत्क्षिपतीत्यादौ गगनादेरुत्क्षेपणादिकर्मतायाः दुर्वारतापत्तेः, ऊर्द्ध्वसंयोगफलकक्रियावच्छिन्नव्यापारस्यैवोत्क्षेपणत्वात् नचोत्क्षेपणत्वादिदं जातिरेव तत्र धात्वर्थतावच्छेदकं प्रवेशनत्वादिना सङ्करेण तस्य जातित्वायोगात् लोष्टादेस्तत्कर्मत्वाप्रसङ्गाच्च। अतएव परम्परया दुहाद्यर्थतावच्छेदकीभूतवह्निः क्षरणशालित्वेन पयःप्रभृतेस्तत्कर्मत्वसम्पत्त्यर्थमकथितञ्चेति सूत्रान्तरस्य प्रणयनमपि पाणिनेः सङ्गच्छते।

धनं प्रतिगृह्णातीत्यत्र पुण्यार्थकदानजन्यस्वत्वस्य जनकः स्वीकारः प्रतिग्रह इति फलीभूतस्वत्ववत्तया धनस्य कर्मत्वं विक्रयादेर्दानविशेषत्वेऽपि न तस्य पुण्यजनकत्वमतस्तज्जन्यस्वस्वीकारो न प्रतिग्रहः। ग्रामं क्रीणातीत्यत्र मूल्यदानजन्यस्वत्वस्य जनकः स्वीकारः स्वत्वजनकं मूल्यदानमेव वा क्रयस्तत्फले च स्वत्वे ग्रामस्याधेयत्वेनान्वयस्तेन ग्रामनिष्ठस्य मूल्यदानजन्यस्वत्वस्यानुकूलस्वीकारवान् ग्रामनिष्ठं यत्स्वत्वं तदनुकूलमूल्यदाता वेति तत्र बोधः। ग्रामं विक्रीणातीत्यत्र मूल्यग्रहणजन्यस्य परस्वत्वस्यानुकूलत्यागः परस्वत्वजनकमूल्यग्रहणमेव वा विक्रयस्तेन ग्रामनिष्ठस्य मूल्यग्रहणजन्यपरस्वत्वस्यानुकूलो-

यो ग्रामस्य स्वामस्तद्दान् ग्रामनिष्ठं यत्परस्वत्वं तदनुकूलमूल्य-ग्रहणवानिति वा तत्र बोधः। मूल्यञ्च पणपुराणादिकमेव शास्त्रनिर्दिष्टं नतु द्रव्यमात्रं तेन तिलादीन् दत्त्वा माषादीनां विनिमये विप्राणां तिलविक्रयादिदोषस्यानवकाशः इत्युक्तमेव। नरकं पततीत्यत्र भोगावच्छिन्नं पातित्यमेव पतेरर्थस्तेन नरक-भोगानुकूलपातित्यवानित्याकारकस्तत्र बोधः नरकपतित इति द्वितीयातत्पुरुषोदाहरणमपि वृत्तिकारस्य एतदभिप्रायक-मेव पतनक्रियायास्तथात्वे तु नरके पततीत्यादिरेव युक्तः प्रयोगः स्वर्गं गच्छतीत्यादौ स्वर्गादिपदस्येव प्रकृते नरकपद-स्यापि तद्देशपरत्वात्। धनं लभते प्राप्नोतीत्यादौ स्वत्वाव-च्छिन्नो व्यापारो धात्वर्थः तन्निविष्टे सत्वे धनादेराधेयत्वे-नान्वयः।

ननु यगन्तधात्वर्थविशेष्यतापन्नस्तिङर्थो यदि कर्मत्वं तदा दुहादेर्मुख्यकर्मण्यव्याप्तिः। गोपेन गौः पयो दुह्यत इत्यादौ गोपकर्तृकव्यापारजन्यं यत् पयःकर्मकमोचनं तद्वती गौरित्येव-मन्वये मोचनवहिःचरणयोर्द्वयोरेव दुहधात्वर्थतावच्छेदक-फलत्वेऽपि गौणं यत् मोचनरूपं तस्यैव कर्म तिङाद्यैर्बोधनात् गौणं कर्म दुहादिभ्यस्तिङाद्यैरभिधीयते इति व्युत्पत्तेरतः प्रकारान्तरेण कर्मत्वं निर्वक्ति।

> यस्य धातोर्यदर्थे यः प्रकारीभूय भासते।
> द्वितीयया व्यारितोऽर्थस्तदा तत्कर्मतोच्यते॥

यत्धातोर्यदर्थे द्वितीयया यादृशः स्वार्थोऽनुभाव्यते तद्धा-त्वर्थतादृशक्रियायां तत्कर्मत्वं तच्च गां दोग्धि पय इत्यादिप्रयो-गात् पयः प्रभृतेरप्यचतं पाकं कुरुते इत्यादौ यत्न प्रकारीभूतमपि विषयत्वं न यतेरर्थे भवते ग्राममित्यादौ भूधात्वर्थे प्राप्तौ तथा-भूतमपि संयोगित्वादिकं न तदर्थोत्पत्तौ प्रकारः। चौरं

रुजन् पयः परिष्कुर्वन्नित्यादाविव रुजादिधात्वर्थहिंसादेर्हितोयार्थकर्मतायां विशेष्यत्वं सुलभं शब्दशानजादेर्निष्ठादिगणान्तर्गतत्वेन तदन्तधातोः कर्मणि षष्ठ्याः प्रतिषिद्धत्वात् दिवः करणस्य कर्मत्वोपदेशात् अक्षान् दीव्यतीत्यत्र द्वितीयार्थः करणत्वमपि गौणं कर्मत्वमेव अतएवाक्षा दीव्यन्ते द्यूतादावित्यादौ क्रीड़ाकरणतायामेव विहितास्तिङादिकर्मप्रत्ययाः। दुहादयस्तु फलावच्छिन्नक्रियाहेतुव्यापारवाचित्वादेव द्विकर्मकास्तेन गां पयो दोग्धि गोप इत्यत्र दुहेर्मोचनानुकूलव्यापारोऽर्थ इति तत्रत्यमोचने गोराधेयत्वेन पयसः कर्मत्वेनान्वयात् पयःकर्मताकं शक्तोवृत्तिमोचनं तदनुकूलव्यापारवान् इत्याकारकबोधस्तत्र बहिःक्षरणावच्छिन्नव्यापारो मोचनं तदनुकूलव्यापारो दोहनमतो धात्वर्थतावच्छेदकीभूतं बहिःक्षरणरूपं फलमादाय पयसो मोचनात्मकस्य तदादाय गोः कर्मत्वमवसेयम्। एवं शिष्यं धर्मं वदति वक्ति ब्रूते उपदिशत्याचष्टे इत्यादौ प्रतिपत्त्यवच्छिन्नव्यापारो वदप्रभृतिधात्वर्थ इति तन्निविष्टायां प्रतिपत्तौ शिष्यस्याधेयत्वेन धर्मस्य च विषयत्वेनान्वयाद्धर्मविषयिणी या शिष्यनिष्ठा प्रतिपत्तिस्तदनुकूलव्यापारवान् इत्याकारको बोधस्तादृशव्यापारो धर्मः सेव्यतामित्यादिको गुर्वाद्यभिलापः। शत्रुं शतानि जयतीत्यत्र ग्रहणावच्छिन्नपराभवो जयत्यर्थः तथाच शतस्य ग्रहणानुकूलो यः शत्रुकर्मकः पराभवस्तत्कर्त्तेत्येवं तत्र बोधः। पराभवश्च तिरस्कारः। प्रजाः शतं दण्डयतीत्यत्र ग्रहणावच्छिन्नशासनं दण्डार्थस्तथाच शतग्रहणानुकूलं यत् प्रजानां शासनं तत्कर्त्तेत्येवं तत्र बोधः। शासनं नियन्त्रणम्। सुधां समुद्रं मथ्नातीत्यत्र उत्थानावच्छिन्नोन्मन्थनं धात्वर्थस्तेन सुधोत्थानानुकूलं यत्समुद्रस्योन्मन्थनं तत्कर्त्तेत्यर्थः। उन्मन्थनमालोड़नम्। पान्थं पन्थानं पृच्छतीत्यत्र अभिधाना-

च्छिन्नव्यापारः पृच्छा तथाच पान्थनिष्ठं यत्पथोऽभिधानं तदनुकूलव्यापारवानित्येवं तत्र बोधः। अभिधानमिच्छाभिलापस्तदनुकूलव्यापारश्च केन पथा गन्तव्यमित्यादि प्रश्नः। नृपमर्थं प्रार्थयते याचते भिक्षते इत्यादौ दानाय प्रेरणं धात्वर्थस्तथाच नृपनिष्ठं यदर्थस्य दानं तत्प्रेरणावानित्यर्थः। प्रेरणा प्रवर्त्तना सा च दीयतामित्याद्यभिलापरूपा। ग्राममजां वहति नयतीत्यादौ गत्यवच्छिन्नव्यापारो वहिप्रभृतेरर्थस्तेन ग्रामकर्मकं यदजादिनिष्ठं गमनं तदनुकूलव्यापारवानित्येवं तत्र बोधस्तादृशव्यापारः प्रकृते गलरज्ज्वाकर्षणादिः। पुत्रं धर्ममनुशास्तीत्यादावनुशासनं देशनया प्रवर्त्तना तथाच पुत्रनिष्ठस्य देशनया प्रवर्त्तनस्यानुकूलव्यापारवानित्यर्थः। तथाविधो व्यापारः सन्ध्यां विधेहि समिधमाधेहीत्याद्युपदेशरूपः शाखां ग्राममाकर्षतीत्यत्र गतिहेतुविकर्षणं धात्वर्थस्तेन ग्रामकर्मकं यच्छाखागमनं तदनुकूलविकर्षणवानित्यर्थः। विकर्षणं नम्रीकरणम्। गामवरुणद्धि व्रजमित्यत्र गतिःप्रतिरोधहेत्वावरणमवरुधेरर्थस्तेन गोगतिप्रतिरोधस्यानुकूलं यद्व्रजस्यावरणं तत्कृतिमानित्यन्वयः। वृक्षं फलानि अवचिनोति इत्यत्र छिदाहेतुविघट्टनं चिनोतेरर्थस्तथाच फलकर्मकच्छिदानुकूलं यत् वृक्षस्य विघट्टनं चालनं तद्वानित्येवं तत्र बोधः। उत् क्षिपत्यादिकस्तु धातुः सफलक्रियाहेतुव्यापारवाच्यपि न दुहादिः। यदुक्तमभियुक्तैः दुहिवंदत्यर्थजिदण्डिमन्थिपृच्छार्थनार्थौ नयनार्थशास्। कृषीरुधिश्चिञ्च तथार्थवृत्तौ द्विकर्मकोऽयं कथितो दुहादिः। तथार्थवृत्तौ निरुक्ततत्तदर्थवृत्तौ।

गतिभोजनधीप्राप्तिशब्दार्थध्रौव्यधातुषु। कर्तृत्वं हेतुविहितस्यन्तेष्वेतेषु कर्मतेति शाब्दिकास्तेर्गोपान् गमयति द्विजान् भोजयति गुरूननुज्ञापयति शिष्यान् पाठयति सुतान्

गमयतीत्यादौ मुख्यधात्वर्थस्य कर्तृत्वलक्षणं गौणमेव कर्मत्व द्वितीयार्थः तथा च गोपकर्तृकगत्यनुकूलव्यापारवानित्याकारस्तत्र बोधः। पुत्रान् प्रीतिं प्रापयतीत्यादौ च प्रशिर्न गतिः चैत्रो ग्रामं भावयते ग्रामस्य भावक इत्यादौ प्राप्त्यर्थस्य भवतेः स्वार्थविहितखन्तस्य कर्तुः कर्मतानिरासाय णिचो हेतुविहितत्वमनुसृतं हिंसायामेव भुज्यर्थभक्षेरेवं वहेरपि। खन्तस्य कर्तुः कर्मत्वं क्रियया वाहनं यदीति स्मरणाद्भक्षयति मूषिकान् मार्जारं भक्षयति लतां छागमित्यादेरेव भक्षेः कर्त्तरि कर्मता न तु भक्षयत्योदनं भृत्येनेत्यादौ भक्षयति प्रजाः परिजनैः कुनृप इत्यादौ तु न भोजनं भक्षेरर्थः। वाहयति रथमश्वान् सारथिर्वाहयति गोणीं वृषभान् वाहिक इत्यादाविव वाहयति भारं भृत्येन धनिक इत्यादौ स्वचेष्टया वाहकोऽन धनिकादिः। हृक्रोस्तु कर्तुः कर्मत्वं खन्तत्वे स्याद्विभाषया। अभिवादिदृशोरेवमात्मनेपद इष्यते इत्यनुशिष्टेर्हारयति कारयति वा पटं कुविन्देनेत्यत्र इव कुविन्दमित्यतोऽपि कुविन्दस्य गौणकर्मत्वावगमः तथा अभ्यवहारयत्योदनं तनयं तनयेन वा जननी विकारयति चित्तं चित्तेन वा वसन्त इत्यपि प्रमाणम्। परन्तु पूर्वयोरप्राप्तावेतयोस्तु प्राप्तावेव कर्मत्वस्य वैकल्पिको विधिः। गुरुमभिवादयते सुतं सुतेन वा गृहस्थः ध्रुवं दर्शयते भार्य्यां भार्य्यया वा पतिरित्यादौ तु दृशेः प्राप्तावभिवादयतेस्त्वप्राप्तौ सः। अनात्मनेपदस्थले तु पन्थानं पथिकं दर्शयति पुत्रेण मित्रमभिवादयतीत्यादौ यथा प्राप्तमेव कर्मत्वादिकम्। ज्ञानेप्पार्थं निर्णाययति चैत्रेण मोदनं खादयति शङ्केन शब्दाययति दारैः क्रन्दयति पुत्रेण मित्रमाह्वाययतीत्यादौ तु नीप्रभृतेर्बुद्ध्यर्थकत्वेन तत्कर्तुः कर्मत्वं प्रसक्तमपि न नीखाद्यादिशब्दायक्रन्दिह्वयतिषु क्वचित्। हेतुखन्तेषु कर्तृत्वं कर्मता

स्यात्तिङादिष्विति भर्तृहरिवचनाद्विशिष्यते। अत्र च क्वचि-
त्तिङादिष्वितिकथनाच्चैत्रेणार्थं निर्वाप्यमाणस्तिष्ठति मैत्रेण
पूगं खाद्यमानो ब्रूते इत्यादौ कर्मविहितस्य शानजादेर्नानुप-
पत्तिरिति वदन्ति। सुखं प्राप्नोतीत्यादौ प्राप्तिरुत्पत्तिः पर-
म्परया तदाश्रयत्वञ्च तिङर्थः। घटं जानातीत्यत्र विषयत्वं
विषयिता वा द्वितीयार्थः।

दिवाकरस्तु संस्कारावच्छिन्नमेव ज्ञानं जानात्यर्थ इत्युक्त-
स्थले मुख्यमेव कर्मत्वं घटादेरित्याह तत् मन्दं ज्ञानमित्यादितः
संस्काराप्रतीतेर्लाघवेन ज्ञानत्वस्यैव जानात्यर्थतावच्छेदकत्वात्
घटस्योपेक्षात्मकज्ञाने निर्विकल्पके वा घटं जानातीतिप्रयोग-
स्याप्रसङ्गाच्च। अतएव प्राकट्यावच्छिन्नज्ञानमेव तत्र धात्वर्थ-
इति तस्यावच्छेदकीभूतज्ञाततावत्त्वादेव घटादेर्ज्ञानकर्मतेति
भट्टमतमप्यनादेयं ज्ञानविषयतातिरिक्तायां ज्ञाततायां माना-
भावादन्यथा ज्ञातताया इव कृततादेरप्यतिरिक्तायाः कल्पना-
पत्तेः। वह्निमनुमिनोम्यापादयामीत्यादौ विधेयतानामको
विषयताप्रभेद एव द्वितीयार्थः पर्वतो वह्निमानित्याद्यनु-
मितावापत्तौ वा पर्वतमनुमिनोमीत्याद्यप्रयोगात् विष-
यतावच्छेदकत्वभिन्नप्रकारत्वमेव तत्र द्वितीयार्थ इत्यपि वदन्ति।
घटं पश्यति शब्दं शृणोत्यनुभवतीत्यादौ दर्शनाद्यर्थकधातुयोगे
साक्षात्कारत्वनिरूपितमेव विषयत्वं कर्मत्वं घटादेरुपनीत-
चाक्षुषादौ तादृशाप्रयोगात् आकाशं न पश्यतीत्यादौ पुन-
रन्वयो वक्ष्यते। तण्डुलपाकं करोतीत्यत्र चिकीर्षाजन्यताव-
च्छेदकः क्रियायामुद्देश्यताख्यो विषयताविशेष एव द्वितीयार्थः
कृतौ भासते तेन तण्डुलपाकत्वप्रकारककृतेस्तण्डुलविषयत्वे-
ऽपि पाकदशायां तण्डुलं करोतीत्यादिको न प्रयोगः पाक-
दशायामोदनं करोतीत्यादौ च द्वितीयायामनुकूलत्वलक्षणा

तण्डुलादिक्रयणकृतिस्तु नौदनादिजनिका प्रमाणाभावात् । वर्द्धमानस्तु तत्स्थले धातुना तत्पत्त्यनुकूला कृतिरुच्यते इति तच्चौदनस्य मुख्यमेव कर्मत्वमतएव यत्र कृतिमात्रं धात्वर्थस्तत्र न द्वितीया यथा घटाय यतत इत्यादावित्याह तन्न कृत्यादिपदाद् यत्नमात्रप्रतीत्या यत्नत्वावच्छिन्नस्यैव करोत्यर्थत्वात् ।

मीमांसामञ्जर्यां तु पाककृतौ तण्डुलादेरुपादानविधयैव फलविधयौदनादेरपि विषयत्वमुक्तं यदाह वल्लेश्वरः सिद्धं साध्यं फलञ्चेति प्रवृत्ते र्विषयस्त्रिधा । तत्र सिद्धमुपादानं क्रियासाध्यं फलं सुखमिति तथाच तन्मते तण्डुलपक्तृत्वदशायामोदनं करोतीत्यादिप्रयोगे फलत्वेन विषयतैव द्वितीयार्थः । मासं जीवति क्रोशं स्वपिति गोदोहं तिष्ठति कुरून् क्रीडतीत्यादावधिकरणत्वं गौणमेव कर्मत्वं सुपानुभाव्यते कालानामध्वमानानां क्रियाणां नीवृतामपि । आधारता ध्रौव्यधातोः कर्मता स्याद्विभाषयेतिस्मृतेः । अतएव मासश्चैत्रेण जीव्यते जीवित इत्यादौ कर्मतार्थकतिङादयः तथाच मासाधिकरणताकजीवनवांश्चैत्रः चैत्रकर्तृकजीवनाधिकरणतावान् मास इत्यादि क्रमेण तत्र बोधः । सम्ध्यायां पचतीत्यादौ तु न ध्रौव्यस्य धातोरर्थेन योगः किन्तु सकर्मकस्य । दिवसं सुप्यते सुन्दरीभिः क्रोशं तत्र सेनया स्थितमित्यादौ तु द्वितीयया कालाध्वनोरभिव्याप्तिरेव बोध्यते नत्वधिकरणत्वं शय्यामधिशेते अध्यास्ते अधितिष्ठतीत्यादावप्यधिकरणत्वमेव कर्मत्वं द्वितीयार्थस्तथैव शय्याधिशय्यतेऽधिशयितेत्यादौ कर्मतार्थकयोराख्यातकृतोः सम्भवात् ध्रौव्याणामधिशीङ्स्थासानां कर्मत्वमेव तदितिस्मरणात् तदाधारत्वम् । अत्राधिष्ठानं कुर्वित्यादौ त्वधिष्ठानस्याधारत्वं नैतस्य भासते किन्तु कृतेः तज्ज्ञानस्थले त्वेतस्याधिष्ठानं कुर्वित्यादिकमेव प्रमाणं कामीमनुवसति काश्

भूयते इत्यादावप्यधिकरणत्वमेव द्वितीयादिभिः प्रत्याय्यते अनूपाध्याङो वसतेराधारस्य कर्मतातिदेशात्। गृहेऽनुवस्ते इत्यादौ तु वस्तिर्न वसतिः। ग्रामामुपवसतीत्यादौ तूपवसतेर्निवासार्थकत्व एव तदाधारस्य कर्मत्वं तत्रैव तदनुशासनादनशनार्थकत्वेऽधिकरणत्वमेव अतएव गृहेऽप्युपवसेद्द्विजः प्रान्तरेऽपि नृपः सुखीत्यादिकः प्रयोगः।

कर्तृत्वकारकं लक्षयति।

तिङा विकरणान्तस्य धातोरर्थस्तु यादृशः।
स्वार्थे यादृशि बोध्यस्तत् कर्तृत्वं तदिहोच्यते॥

सविकरणेन यदा तुनोपस्थाप्यो यादृशार्थस्तदुत्तरतिङा स्वोपस्थाप्ययादृशार्थेऽनुभावयितुं शक्यस्तदातूपस्थाप्यस्य तस्य तदेव कर्तृत्वं कारकमित्यर्थः। कर्मत्वादौ धातुनोपस्थाप्योऽर्थस्तिङानुभाव्योऽपि न विकरणान्तेनेति न तत्र प्रसङ्गः। पचति जानातीत्यादौ स्वोपस्थाप्यकृत्याश्रयत्वादौ धातूपस्थाप्यस्य पाकबुद्ध्यादेरन्वयः पचाद्युत्तरतिङा बोध्यत इति पाकस्य यत्नवत्त्वं ज्ञानस्याश्रयत्वमेवं नश्यतीत्यत्र नाशस्य प्रतियोगित्वं प्रतिबिम्बत इत्यत्र भ्रमात्मनः प्रतिबिम्बस्य प्रकारत्वमेव कर्तृत्वं कर्तृशब्दस्तु अवयववृत्तिलभ्ये कृत्याश्रये यौगिकएव न तु शक्यार्थः प्रकारान्तरालभ्यस्यैव शक्यत्वात् निरूढलक्षणया शक्त्यैव वाश्रयस्य तथा प्रत्यायनात् घटस्य कर्मेत्यादौ चानुकूलत्वं प्रत्ययार्थः फलस्य प्रायशः कृत्यविषयत्वात् घटाद्युपभोगानुकूलकृतिश्च न घटाद्यनुकूला प्रमाणाभावात् अतो न घटादिभोक्तुस्तत्कर्तृत्वप्रसङ्गः क्रियाश्रये कर्तृशब्दो रूढस्तेन रथादेर्गत्यादिकर्तृत्वमपि मुख्यमेवेति तु न युक्तम्। क्रिया हि नात्र स्पन्दस्तेनकृत्पाककर्तृत्वानुपपत्तेः प्रत्युत तण्डुलादेरेव तथात्वापत्तेः नापि

धात्वर्थमात्रम् अतएव नापि स्पन्दानुकूलव्यापारः चलनानुकूलो व्यापारवतः कारकमात्रस्य चलनकर्तृत्वापत्तेः।

अत्तिभुङ्क्तीत्यादावप्यदादेरुत्तरं लुप्तस्यैव विकरणस्य प्रतिसन्धाने भोजनकर्तृत्वादेरवगम इति तदप्रतिसन्धानेऽपीति मते त्वाह।

यगन्तभिन्नधात्वर्थवत्तया योऽनुभाव्यते।
लटा स्वार्थः स धात्वर्थः कर्तृता वा निगद्यते॥

यगन्तभिन्नधातूपस्थाप्ययादृशार्थप्रकारकयदर्थधर्मिकान्वयबोधं प्रति लटः सामर्थ्यं स एवार्थो धातूपस्थाप्यतदर्थस्य कर्तृत्वं पच्यत इत्यादौ धातोरर्थवत्तया स्वार्थकर्मत्वं लटानुभाव्यमपि न यगन्तभिन्नस्य पच्यते तण्डुल इत्यादौ तु तादृशस्य धातोरर्थवत्तया तिङैव स्वार्थः कर्मत्वमनुभाव्यते न तद्विशेषेण लटेति तद्व्युदासः।

अपादानत्वादिभेदेन षड्विधत्वमिवोक्तानुक्तत्वभेदेन कारकस्य द्वैविध्यमप्यस्तीति तदनुक्त्या न्यूनत्वमत आह।

धात्वर्थस्य धर्मितया तिङाद्यैरनुभाव्यते।
यत्तदुक्तं धर्मितया त्वनुक्तं कारकं भवेत्॥

धात्वर्थस्य विशेष्यतया तिङाद्यनुभाव्यत्वमेव कारकस्योक्तत्वं तद्विशेषणतया तदनुभाव्यत्वमेव चानुक्तत्वं न तु धातुसाकाङ्क्षप्रत्ययस्याभिधेयत्वमात्रमुक्तत्वं तण्डुलं पचति इत्यादावपि कर्मत्वादेरुक्तत्वापत्तेः पचति पच्यत इत्यादौ तिङा पाचकः पच्यमान इत्यादौ च कृता कर्तृत्वं कर्मत्वञ्च धात्वर्थविशेष्यत्वेनानुभाव्यते तथा पचनं काष्ठं दानीयो द्विजः भीमो गजः शयनं गृहमित्यादौ यथाक्रमं करणत्वादिव्युत्पत्तिवैचित्र्येण पदार्थैकदेशेऽपि कर्तृत्वादौ धात्वर्थस्य पाकादेरन्वयात् सेवितुं साम्प्रतं विनेशैः परुषवागपि विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतमित्यादौ निपातेन क्वचित् कर्मत्वकारकस्योक्तम्।

धातुभेदेन कर्मत्वकारकस्योक्ततायां नियममाह।

दुहादिभ्यः प्रत्ययेन मुख्यकर्मत्वमुच्यते।
णिजन्तेभ्यः कर्तृताख्यां तदसत्त्वेऽन्यकर्मता॥

दुहाद्युत्तरप्रत्ययेन मुख्यं साक्षाद्धात्वर्थतावच्छेदकं यत्कर्मत्वं तदेवोच्यते धात्वर्थविशेषणत्वेनानुभाव्यते तेन गौः पयो दुह्यते दुग्धा वेत्यत्र पयःकर्मकमोचनानुकूलव्यापारजन्यमोचनवती गौरित्येवं बोधः। तत्र मोचनावच्छिन्नव्यापारस्य धातुवाच्यतया मोचनस्यैव साक्षाद्धात्वर्थतावच्छेदकफलत्वात् वहिप्रभृतेर्गत्यवच्छिन्नव्यापारः कृषेश्च गत्यवच्छिन्नविकर्षणं वाच्यमतः साक्षात् तद्वाच्यतावच्छेदकं गतिमत्त्वमेव फलं न तु तद्घटकं संयोगादि। तथाच भारो भवनमुह्यते नीयत इत्यादौ शाखा ग्रामं कृष्यतइत्यादौ च यथाक्रमं भवनकर्मकगत्यनुकूलव्यापारजन्यगतिमान् भारः ग्रामकर्मकगत्यवच्छिन्नविकर्षणकर्मताश्रयः शाखेत्याकारकबोधयोरुत्पत्त्यैव सम्पत्तौ। दुहादेर्गौणकं कर्मनीवह्यादेः प्रधानकमित्याद्युक्तिभेदेन विधिद्वयं शाब्दिकानामनादेयम्। णिजन्तोत्तरं कर्मतावाचिप्रत्ययस्थले तु मूलधातोः कर्तृतायां कर्मतातिदेशसम्भवे तादृशमेव कर्मत्वं धात्वर्थस्य विशेष्यतया तिङाद्यैर्बोध्यते यथा चैत्रो ग्रामं गम्यते गमितो वेत्यादौ ग्रामकर्मकस्य व्यापारजन्यगमनस्य कर्त्ता चैत्र इत्यादि। यत्र तु न तदतिदेशस्तत्र मूलधातोः कर्मत्वमेव तदर्थविशेष्यतया तैरुच्यते यथा ओदनः पाच्यते खाद्यते वा भृत्येन भर्त्रेत्यादौ तत्र भर्तृकर्तृकव्यापारजन्यस्य भृत्यकर्तृकपाकादेः कर्मतयौदनादिरेव बुध्यते मैत्रेण पूगं खाद्यमानश्चैत्रो व्रजतीत्यादौ कर्मणि शानजादिप्रत्ययः प्राक् परिचिन्तितः।

अथ भिद्यते अभेदि वा कुशूलः स्वयमित्यादौ भिदाद्यनुकूलव्यापारवत्स्वरूपस्य तत्कर्तृत्वस्य कथं कुशूलादावन्वयः

भिदादेः परस्मैपदित्वेन तदर्थधर्मितया कर्तृत्वबोधने पदान्तरस्यासामर्थ्यात् यगिचोर्विगुणत्वाच्चेत्यत आह।

एकक्रियाधर्मितया कर्तृता कर्मतोभयोः।
बोधने कर्मताकाङ्क्षा वापिचोरुत्सर्गतो भवेत्॥

कर्मताकाङ्क्षा कर्मत्वान्वयस्यैवानुकूला आत्मनेपदयगादिसमभिव्याहाररूपाकाङ्क्षा व्युत्पत्तिवैचित्र्यादपेक्षणीया न तु कर्तृत्वान्वयस्य परस्मैपदविकरणादिसन्दंशरूपा यद्येवं तण्डुलश्चैत्रो पच्यते इत्यपि प्रयोगः स्यात् न स्यात् सामग्रीमिथो विरोधेन किंभिन्नधर्मावच्छिन्ने प्रत्ययानां युगपत्कर्तृताकर्मत्वयोरनुभावकत्वस्याव्युत्पन्नत्वात्। अतएव पचेलिमो मैत्रतण्डुलावित्यादिको न प्रयोगः। आत्मने भ्रौव्यधातूनां सनन्तण्यन्तयोः किरः। श्रन्थिग्रन्थ्योस्तथा ब्रूञः कर्तृकर्मत्वबोधने। यगिचौ न दुहेर्णौ यमजन्तस्य च तस्य च। इष् वा स्यादुक्तधातूनां नित्यं तत्रात्मनेपदमिति वृद्धस्मृतेः। स्वयं विकुरुते युवेत्यादौ स्वयं चिकीर्षते कट इत्यादौ स्वयं कटः कारयते गोवत्पुच्छयते चोरयते इत्यादौ स्वयमेव किरते करोत्यादौ स्वयं श्रथ्नीते ग्रथ्नीते वा मालिकेत्यादौ स्वयं ब्रूते कथेत्यादौ स्वयं दुग्धे गौरित्यादौ धात्वर्थकर्तृकर्मत्वयोर्युगपदन्वये कर्मत्वान्वयानुकूलस्य यको नापिचा तथा स्वयं व्यकृत युवा स्वयमचिकीर्षत कट इत्यादो इचोऽपि एवं स्वयमलावि अलविष्ट वा केदार इत्यादौ स्वरान्तस्य धातोः स्वयमदुग्ध अदोहि वा गौरित्यादौ दुहेस्तदर्थस्य तदुभयभानार्थमिचोऽनावश्यकत्वमत उक्तमुत्सर्गत इति। विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीरा इत्यादौ तु यको गतिश्चिन्त्या।

ननु शाकः पचता पश्यता वा भुज्यते इत्यादितः कृतः

पाकादौ शाकादिकर्मत्वावगमः सुबर्थस्यैव कर्मत्वस्य धात्वर्थे धर्मिणि साकाङ्क्षत्वादत आह।

स्वकर्मकैकधात्वर्थकर्तृकापरकर्मता।

यत्रान्वेत्यस्य कर्मत्वे प्रथमैवानुशिष्यते॥

स्वकर्मताकत्वविशिष्टैकधात्वर्थकर्तृकर्तृकस्यापरस्य धातुनिपातयोरन्यतरार्थस्य कर्मत्वं यत्र धर्मिणि अन्वेति तदीयत्वेनानुभाव्ये कर्मत्वे प्रथमैवानुशिष्यते न तु द्वितीयादिरपीष्यते येन शाकः स्वकर्मताकपाककर्तृकर्तृताकभोजनकर्मतावानित्याद्यन्वयधीस्तत्र न स्यात्। अतएव प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत् प्रकाशते इति पठन्ति। शक्तिः कारकमिति शाब्दिकाः। कर्मतामात्रन्तु न्यायः तेन हस्तेन पचता भुज्यते शाक इत्यादौ नाभिहिताधिकारीयप्रथमा शक्तिः।

ननु यत्र विशिष्टवैशिष्ट्यावगाहितानिरूपकत्वेन गौणप्रधानभावापन्ने क्रियाद्वये प्रकारीभूय एकविधस्यैव कर्मत्वादिकारकस्य भानं तत्र तन्न स्यात् यथा पक्वान्नस्य भोक्ता पश्यन्नन्नस्य दाता भोक्तुमन्नस्य पाचकः पुरस्य गत्वा गन्ता भुक्त्वा चैत्रस्य स्थितिः पक्वा सूदस्य गमनमित्यादौ क्त्वादेर्निष्ठादित्वेन तदन्तधात्वर्थे षष्ठ्याः कर्मत्वाद्यनुभावकत्वस्य निषिद्धत्वात् एवं यत्र तादृशक्रियाद्वये नानाविधं कर्मत्वसम्प्रदानत्वादि प्रकारस्तत्रापि तथा यथा ब्राह्मणायाहूय ददाति वृक्षात् आरुह्य पततीत्यादौ कर्मत्वादौ चतुर्थ्यादेरसामर्थ्यादत आह।

गौणप्रधानक्रिययोः प्रकारीभूतकारके।

एकस्मिन् वा विभिन्ने वा प्रधानापेक्षया स्थितिः।

यत्र गौणप्रधानतापन्नधात्वर्थद्वये प्रकारीभूयैकविधमनेकविधं वा यदीयत्वेन कारकं भासते तत्र प्रधानक्रियामपेक्ष्यैव स्थितिः कारकविभक्त्यर्व्यवस्थितिः नतु गौणक्रियां तथाच पक्वान्नस्य भोक्ता इत्यादौ अन्नकर्मताकपाकोत्तरान्नकर्मताक-

भोजनत्वादिना ब्राह्मणाय आहूय ददातीत्यादौ च ब्राह्मण-कर्मताकाह्वानोत्तरब्राह्मणसम्प्रदानताकदानत्वादिना बोधने व्युत्पत्तिवैचित्र्यादेव पचनाह्वानादिगौणक्रियायां षष्ठीचतुर्थ्यादिना कर्मत्वादेर्भानमिति भावः ।

ननु शत्रवे कुप्यतीत्यत्र शत्रोः प्रयुक्तत्वविषयित्वरूपाभ्यामपादानत्वसम्प्रदानत्वाभ्यां कोपे पुत्रेण ददातीत्यत्र पुत्रस्य सम्प्रदानत्वकरणत्वाभ्यां दाने पात्रां भुङ्क्ते इत्यत्र पात्र्याः करणत्वाधिकरणत्वाभ्यां भोजने ग्रामं गच्छतीत्यत्र ग्रामस्याधिकरणत्वकर्मत्वाभ्यां गमने चैत्रस्य चलनमित्यादौ च चैत्रादेरधिकरणत्वकर्तृत्वादिना चलनादौ युगपत्कथमन्वयधीरपादानत्वादिबोधने चतुर्थ्यादेरसामर्थ्यादत आह ।

एकस्यैकक्रियायान्तु कारकद्वयबोधने ।
यत्परं कारकं तत्र विहिता सुबपेक्षिता ॥

एकस्मिन् धात्वर्थे यत्रैकनामार्थनिरूपितयोः कारकद्वयोर्युगपद्बोधस्तत्र लक्षितक्रमेण यत् परं कारकं तत्र विहितानुशिष्टैव सुप् आकाङ्क्षानिर्वाहिका न तु पूर्वत्र व्युत्पत्तिवैचित्र्यादित्यर्थः । ब्राह्मणायाहूय ददातीत्यादावेकनिरूपितमपि नैकक्रियायां दण्डेन गामभ्याजेत्यादावेकक्रियायामपि नैकनिरूपितं कारकद्वयमन्वेति । अत्र अपादानसम्प्रदानकरणाधारकर्मणाम् । कर्त्तुश्चोभयसम्प्राप्तौ परमेकं प्रवर्त्तते इति भर्तृहरिवचनात् करणत्वाधारत्वयोरेकदा अन्वयस्थलेऽधिकरणत्वार्थिकैव विभक्तिरपेक्षितेति प्राञ्चः । करणत्वार्थिका एव तथेति नव्याः । तैराधारत्वं निरस्यैव करणत्वस्य निर्वचनादिति ध्येयम् ।

कर्तृत्वकर्मत्वयोरनुक्तविषयान्वयबोधोपयुक्तविभक्तीर्वक्तुमुपक्रमते ।

क्रियायां धातुलभ्यायां कर्तृत्वस्यावबोधिका।
तृतीया कर्मतायास्तु द्वितीयोत्सर्गतो भवेत्॥

धात्वर्थे कर्तृत्वस्यान्वयबुद्धौ नाम्नस्तृतीया कर्मत्वस्य च द्वितीया उत्सर्गतो हेतुः। सत्ता अस्ति शब्दो श्रूयते इत्यादौ नुगत्वा धात्वर्थेऽपि कर्तृत्वकर्मत्वाद्यन्वयो न धर्मिणो धातुशब्दामुपस्थितिमपेक्षते किन्तु नामजन्यामतस्तत्र न व्यभिचारः।

सामान्यविधिरुत्सर्गः सचापवादकं विशेषविधिं विना प्रवर्त्तते इति कर्मतायां द्वितीयाया वैकल्पिकं विशेषविधिं दर्शयति।

कर्मत्वस्य गतौ बोधे द्वितीयावच्चतुर्थ्यपि।
षष्ठे दयेशोः संज्ञस्य नाथ्यर्थाशंसने स्मृतौ॥
पणिव्यवहृदिव्यर्थक्रयाद्यर्थेषु षष्ठ्यपि।
कृञर्थप्रतियत्ने च हिंसने चाप्यपेक्षिता॥

ग्रामं गच्छतीत्यादित इव ग्रामाय गच्छतीत्यादितोऽपि गतौ ग्रामादिकर्मताकत्वस्यावगतेर्धात्वर्थगतौ कर्मत्वस्य बोधे द्वितीयावच्चतुर्थ्यपेक्षिता तथा दीनं दयते ईष्टे इत्यादित इव दीनस्य दयते ईष्टे संजानीते चिन्तयति स्मरतीत्यादितोऽपि दयादौ पुत्रस्य नाथते इत्यादित आशंसायां शतस्य पणायते व्यवहरतीति दीव्यतीत्यादितः पणत्वोपगमक्रयविक्रयादिव्यवहारेषु स्वर्णस्योपस्कुरुते इत्यादितोऽपि गुणान्तराधानरूपप्रतियत्ने चौरस्य हिनस्तीत्यादितो हिंसायाञ्च कर्मत्वस्यान्वयबोधे षष्ठ्यपि मैत्रं अनुनाथतीत्यादौ नाथ्यर्थोऽपि प्रार्थनादिर्नाशंसनं शम्भं पणायति बन्धुं व्यवहरति दिवं दीव्यतीत्यादौ पणादेरर्थोऽपि स्तुतितोषगत्यादयो न क्रयादिरूपाः।

धात्वर्थे कर्तृत्वकर्मत्वयोर्बोधने द्वितीया तृतीयादेर्नित्यापवादमाह।

निष्ठाद्यन्यकृदन्तार्थे कर्तृत्वस्यान्वयं प्रति।
कर्मत्वस्य च षष्ठ्येव हेतुर्बोधविधिं विना॥

निष्ठादिभिन्नं कृत्मात्रमन्ते यस्य न तु तदुत्तरं प्रत्ययान्तरं तादृशधातोरर्थे कर्तृत्वस्य कर्मत्वस्य वान्वये नाम्नः षष्ठ्येव तन्त्रं न तु तृतीयादिः यथा चैत्रस्य गतिः ग्रामस्य गमनमित्यादौ। चैत्रेण दृष्टचरस्तण्डुलं पाचकतर इत्यादौ तु धातोरुत्तरं न कृन्मात्रं अतएव निष्ठादिभिन्नयोरपि न जिनयोर्नित्यं तद्धितान्तत्वात् अङ्गानि व्यत्युचौ धनानि सांग्राहिणमित्यादौ कर्मतायां न षष्ठीप्रसङ्गः प्रापकाभावात् ग्रामस्य गन्तृमान् देशश्चैत्रस्य गतिमदगृहमित्यादौ तु गतिश्चिन्त्या तत्र गन्त्रादाविव षष्ठ्यर्थसम्बन्धो भासते न तु धात्वर्थे कर्मत्वादिरित्यपि कश्चित्। चैत्रेण भुक्तो मैत्रेण दत्त इत्यादौ सुकरः कटो मया दुष्करः पटस्त्वया इत्यादौ सुपानः सोमो मया दुष्पानः सोमस्त्वयेत्यादौ च कर्तृत्वस्य ग्रामं गतवानित्यादौ तण्डुलं पचन् पारायणमधीयन् उपनिषदं धारयन्नित्यादौ घटं विद्वान् तण्डुलं पेचिवान् इत्यादौ भक्ष्यम् भुञ्जानः इत्यादौ सोमं पिवमानः कवचमुद्वहन् इत्यादौ कटं चक्राण इत्यादौ दधि घटं चक्रिः कटमित्यादौ शत्रुं जिष्णुरित्यादौ स्त्रियमलङ्करिष्णुरित्यादौ कष्टं सहिष्णुरित्यादौ धनं गृध्नुः शरं क्षिप्नुरित्यादौ कटं चिकीर्षुः पुंयोगमाशंसुः तण्डुलं भिक्षुरित्यादौ शतं दायीत्यादौ ग्रामं गामी ग्राममागामीत्यादौ कटं कारको व्रजतीत्यादौ तण्डुलं पक्ता वर्त्तते इत्यादौ पयः पायं पायं व्रजतीत्यादौ पटं कर्त्तुं गच्छतीत्यादौ वदिता जनापवादमित्यादौ ग्रामं गामुकः सुखमभिलाषुक इत्यादौ च कर्मत्वस्य धात्वर्थे विनैव षष्ठीमन्वय इत्यत उक्तं निष्ठादिभिन्नेति॥

रैनिष्ठादिकं विवृणोति ।

सम्प्रत्याधारवाच्यस्य क्तः क्तवतुश्च शनुङ् ।
वस्वानः शानकानाः किः ष्णु मिथुक्रुकस्तथा ॥
खलर्थकर्मणिभविष्यदर्थकेन् वुण् तुमर्थकम् ।
खल खलर्थकयुःक्त्वा णम् तुमौ तृषु कत्रपि ॥
निष्ठादिः कथितः कृत्सु प्रत्ययानामयं गणः ।
कमेरुकञ् गणे नास्ति द्विषः शतुर्विभाषया ॥

वर्त्तमानत्वस्याधारत्वस्य च प्रत्यायको यः क्तस्तदन्तधात्वर्थे कर्त्तृकर्मत्वयोरन्वये षष्ठ्येव प्रमाणम् । यथा भीतं मृगाणां मतः साधूनाम् इष्टः प्रजानां पूजितो जनानामित्यादौ सुप्त-मरस्य पथिकानां गतं नभो नक्षत्राणां पीतं नगरं पयस इत्यादौ भुक्ता पात्री करस्तस्य मित्राणामित्यादौ च यत उक्तं सम्प्रत्याधारवाच्यस्य इति । धनस्य ग्राहीत्यादावावश्यर्थं न णिनिः ओदनस्य पाचक इत्यादौ च न तुमर्थे वुण् । स्त्रियाः कामुक इत्यादिदर्शनादत्र गणे कमेरुकञ् ग्राह्यः तथा द्विषः शतृङ्विभाषया चौरं द्विषन्नितिवच्चौरस्य द्विषन्नित्यपि प्रयोगादिति ।

कृदन्तधात्वर्थे कर्त्तृत्वस्य कर्मत्वस्य वान्वये षष्ठ्येव बाधकं विना तन्त्रमित्युक्तं बाधकमाह ।

स्त्र्यधिकारोक्तभावार्थकृदन्तस्यार्थधर्मिके ।
द्वयोर्बोधे कर्मतायामिव षष्ठी न कर्त्तरि ॥

स्त्र्यधिकारविहिताः ये भावप्रत्ययास्तदन्यकृदन्तस्य धातोरर्थे कर्त्तृत्वकर्मत्वयोर्युगपत्बोधने कर्मतायामिव षष्ठी तन्त्रं न तु कर्त्तृत्वे यथा ओदनस्य पाकश्चैत्रेण दोहः क्षीरस्य गवां गोपेन इत्यादौ स्त्र्यधिकारोक्तभावान्तस्य धातोरर्थे कर्त्तृकर्मत्व-योर्युगपदन्वये द्वयोरपि षष्ठ्येव यथा भिदा तमसामर्कस्य छिदा वृक्षाणां दात्रस्य इत्यादौ चिकीर्षा पुष्पाणां पुरुषस्य ईहा

धनानां दीनस्येत्यादौ मम भोजिका मधूनां तव शायिका रात्रीणामित्यादौ यथा वा तीर्थानां मतिरास्तिकस्य गुरूणां परिचर्या शिष्यस्य पितॄणामुपासना सन्तानस्य रजनीनां जागर्या चौरस्य पुण्यानामकरणिर्जाल्मस्य जन्तूनां हत्या व्याधस्य हानिरर्थानां विरक्तस्य। ह्लाच्याम्बाभ्यः स्त्र्यर्थे निः। इत्यादिसूत्राद्युत्तरन्तस्य धातोरर्थे कर्तृत्वकर्मत्वयो र्युगपद्बोधे कर्तृत्वांशे तृतीयाषष्ठ्योर्वैकल्पिकं कारकत्वमिति तु कौमाराः।

षष्ठ्येव तन्त्रमिति प्रागुक्ते बाधकं विशेषविध्यन्तरमाह।

कृत्यान्तधातोरर्थे तु कर्तृत्वस्यैव बोधने।
षष्ठी वा स्यात् द्वयोर्बोधे न द्वयोरपि सा भवेत्॥

कृत्यप्रत्ययान्तधातोरर्थे कर्तृत्वमात्रस्य बोधने षष्ठीवत् तृतीयापि तन्त्रं कर्त्तव्यः करणीयः कृत्यः कार्य्यः प्रदेयो वा पटश्चैत्रस्येति वत् चैत्रेणेत्यस्यापि साकाङ्क्षत्वात्। तादृशधात्वर्थे कर्तृत्वकर्मत्वयो र्द्वयो र्बोधने तु न द्वयोरपि षष्ठी यथा नेतव्यः प्रापणीयो वा ग्रामं गौ र्गोपेनेत्यादौ गन्तव्यं ग्राममनेनेत्यादौ च। तव्यानीयौ क्यप् च ण्यण्णौ पञ्चैते कृत्यसंज्ञकाः।

ननु स्थितं चैत्रस्येत्यादौ कर्तृत्वस्य गतं ग्रामस्येत्यादौ कर्मत्वस्य गतं ग्रामस्य चैत्रस्येत्यादौ च कर्तृत्वकर्मत्वयोः क्रियायां कथमन्वयः निष्ठाद्यन्य कृदन्तस्यैव धातोरर्थे कर्तृत्वाद्यन्वयं प्रति षष्ठ्यास्तन्त्रत्वादत आह।

द्वितीययैव कर्मत्वं कर्तृत्वं वा तृतीयया।
षष्ठ्यापि बोध्यते भावक्तान्तधात्वर्थधर्मिणि।

भावक्तान्तधातोरर्थे कर्मत्वस्य कर्तृत्वस्य वान्वये द्वितीयादिवत् षष्ठ्यपि तन्त्रम् उभयथैव प्रयोगात् सर्वत्रैव कार्य्यतावच्छेदकसङ्कोचाच्च व्यभिचारः।

करणत्वादेरनुमता प्रयोजकाः सुपः संक्षेपेणाह।

तृतीया च चतुर्थी च पञ्चमी सप्तमी तथा।
धात्वर्थे करणत्वादेर्बोधिकोत्सर्गतो मता।

शतेन शताय वा परिक्रीणीत इत्यादौ चतुर्थ्याः सर्पिषा सर्पिषो वा पूर्णः फलेन फलस्य वा तृप्त इत्यादौ च षष्ठ्याः करणत्वे दास्यै दास्या वा सम्प्रयच्छते। मात्रामित्यादौ च तृतीयायाः सम्प्रदानत्वे विधानादुक्तमुत्सर्गत इति।

कारकार्थां सुपं निरूप्य तदन्यार्थां निर्वक्ति।

यत्सुपो यादृशार्थो न प्रकारीभूय भासते।
धात्वर्थे तादृगर्थे सा कारकान्यार्थसुप् भवेत्॥

प्रथमादीनां सप्तानां विभक्तीनामेकत्वाद्यर्थो न धात्वर्थे प्रकारीभूय भासन्ते परन्तु प्रकृत्यर्थे पाक इत्यादावपि सुबर्थसंख्या न धात्वर्थे प्रकारः परन्तु पचनादिस्वरूपे नामार्थ इत्युक्तप्रायं समासनिविष्टस्य धातोरर्थे इति वा वक्तव्यं नहि ग्रामगत इत्यादौ धात्वर्थे कर्मत्वादिरिवैकत्वादिरपि सुबर्थः प्रकारः अतएव प्रासादात् प्रेक्षते इत्यादौ ल्यबर्थस्य धात्वर्थे प्रकारत्वेऽपि तदर्थकपञ्चम्यां नाव्याप्तिः प्रासादप्रेक्षक इत्यादौ समासनिविष्टस्य धातोरर्थे ल्यबर्थस्यारोहणोत्तरत्वादेरप्रकारत्वात् शलाकापरीत्यादौ समासनिविष्टस्य नाम्नोऽर्थे प्रकारीभूतमप्येकत्वादिकं न धातोरर्थे। न च कारकविभक्तेरपि तदन्यार्थकत्वादतिप्रसक्तिः उपधेयसङ्करेऽप्युपाधेरसाङ्कर्यात्। चैत्र व्रजेत्यादौ एकत्वादिसंख्यावत् सम्बोध्यत्वमपि प्रथमार्थः तच्च क्रियाकरणाय वक्त्रभिप्रेतत्वं वक्तृनिष्ठविलक्षणबोधविशेष्यत्वं वा तथाच तादृशसम्बोध्यत्ववांस्त्वोऽनुमतव्रजनवानित्याकारस्तत्र बोधः संख्यातिरिक्तसुबर्थस्य प्रकृत्यर्थविशेष्यत्वानियमात्। कश्चित् तुष्टो व्रजेत्यादौ तु कश्चिदेव तुष्टस्याभेदो भासते न तु तुष्टे

कश्चित्: प्रकृत्यर्थमुख्यविशेष्यक एव स्वार्थसम्बोध्यत्वस्यान्वये सम्बुद्धिसुपः सामर्थ्यात् अन्यथा छत्री दण्डीत्यत्रेव क्वचिन् दण्डिन्नित्यत्रापि क्वचिद्दण्डिनोरभेदबोधापत्तेः तदुपयुक्तस्य नाम्नोः समानविभक्तिकत्वस्याविशिष्टत्वात् छत्री तुष्टो व्रजतु इतिवत् क्वचिन् दण्डी व्रजतु इत्यपि प्रयोगापाताच्च । हे चैत्रेत्यादौ तु सम्बोधनान्यतरवैयर्थ्यम् । सुमित्रामात नैतत्ते विचित्रं चित्रयोधिन इत्यादौ सम्बोध्यत्वमिव प्रशंस्यत्वमपि सम्बुद्धिसुपामर्थः तत्रैव मातृकस्य ऋकारादेरकारादेशात् । स्तुतिः स्वाहेत्यादौ प्रथमादेश्चतुर्थ्यादेशे तस्या एव उद्देश्यत्वमर्थः ।

दक्षिणेन ग्राममुत्तरेण पन्थानमित्यादौ एनप्रत्ययान्तस्य योगे ग्रामस्यादूरदक्षिणादिशीत्याद्याकारिका धीः दक्षिणोत्तराभ्यामदूरे एनोऽपञ्चम्या इत्यनुशासनात् तत्रागारं धनपतिगृहादुत्तरेणास्मदीयमित्यादौ तु क्वचिदपवादविषयेऽप्युत्सर्ग इति न्यायात् दिगर्थयोगित्वात् पञ्चम्यपि । वृक्षमभि प्रति पर्यनु वा द्योतते विद्युदित्यादावभ्यादेः कर्मप्रवचनीयस्य लक्षणत्वमर्थः तेन वृक्षं लक्षणत्वाश्रित्य प्रकाशते विद्युदित्येवं वाक्यार्थं इत्याश्रितत्वान्वयि निरूपितत्वमेव तत्र द्वितीयया बोध्यते । अभ्यादेर्लक्षणाद्यर्थे वृक्षादेरन्वयधिय इत्येव वा तदर्थकपदोत्तरं द्वितीयापेक्षिता ग्रामं प्रतिभोऽस्यमर्थः ग्रामं प्रतिभाय वर्त्तते इत्यादौ प्रतिभादेस्तत्र वा स्फुरणमर्थः न तु प्रतेर्लक्षीकरणं उपसर्गत्वातो क्त्वो ल्यप विधानानुपपत्तेः परन्तु प्रतिभादेर्योगे षष्ठ्येव द्वितीययापि तदर्थः सम्बन्धोऽनुभाव्यते षष्ठ्यर्थे द्वितीया वा प्रतिभादेरित्यनुशिष्टेः तेन ग्रामस्य या प्रतिमा झटितिस्फूर्त्तिस्तद्विषयतावानयमर्थ इत्येवं तत्र बोधः । वृक्षं वृक्षमभि परि प्रत्यनु वा वायसा इति वीप्सास्थलेऽपि प्रतिवृक्षं वृक्षयोः वायसा इत्यर्थः ।

भितस्तमभि परि प्रत्यनु वा चैव इत्यत्र इत्यम्भूतार्थकैरभ्यादिभिः पितरौत्यम्भूतश्च त्व इत्यन्वयबोधः। यन्मां प्रति परि वा तद्देहीत्यादौ प्रतिपरिभ्यामुपस्थिते भागे मत्सम्बन्धो द्वितीयया बोध्यते तेन यो मदीयो भागस्तं देहीत्येवं तत्र बोधः। कारीरीमनुवृष्टिरित्यत्रानुशब्दस्य हेतुतावाचित्वात्। कारीरीनिष्ठहेतुताका वृष्टिरित्यर्थः। कारीरी यज्ञविशेषः शूरमनुयुध्यते दरिद्रमनुयाचते इत्यादौ च तस्य सहार्थत्वात् शूरेण सह युध्यते इत्यादिरर्थः। उपार्जुनं क्षत्रियाः अनु देवं दानवा इत्यादावुपानुभ्यां हीनबलस्याभिधानात् क्षत्रिया अर्जुनाद्धीनबला इत्याकारकस्तत्र बोधः। तदुक्तमभियुक्तैः। लक्षणवीप्सेत्थम्भावेष्वभिर्भागे परिप्रती अनुरेषु सहार्थे च हीने उपस्य कथ्यते। नरमधि गुणदोषयो श्चिन्ता निशाद्वं वा पूजा समयमधि वा यस्तु पठतीत्यादिप्रयोगात् सम्बन्धत्वार्थकस्याधिशब्दस्यापि योगे द्वितीयामिच्छन्ति। समया निकषा चाव्ययं सामीप्यार्थकं तेन तद्योगे समया ग्राममित्यादौ ग्रामस्य समीपमित्यन्वये ग्रामावधिकत्वं तत्प्रतियोगिकत्वं वा द्वितीयया बोध्यते। विद्यामृतेऽन्तरेणान्तरा विना वा नरः शोच्य इत्यादौ ऋते प्रभृत्यव्ययानामत्यन्ताभावस्तद्दृश्यं वार्थं इति विद्यात्यन्ताभाववान्नरः शोच्य इत्यन्वयेऽत्यन्ताभावेऽन्वितं प्रतियोगित्वम्। गगनमृते द्रव्यं न शब्दवदित्यादौ तूक्ताव्ययानां भेदोऽप्यर्थः तेन गगनभिन्नं द्रव्यं न शब्दवदित्याकारकस्तत्र बोधः। हा पुत्रमित्यत्र हाव्ययस्यार्थे कष्टे द्वितीयान्तेन पुत्रसमवेतत्वं बोध्यते, धिक् पुत्रमित्यत्र धिगर्थगर्हायां पुत्रविषयित्वम्। हा पितः क्वासि हे सुभ्रु बह्वेवं विललाप स इत्यादौ स्वगतमेव कष्टं हाशब्देन बोध्यते न तु पित्रादिगतं पुत्रस्य धिक्कार इत्यादौ तु न धिगित्यस्यार्थे पुत्राद्यन्वयः किन्तु धिक्कारादिपदस्य। एवं

पुत्रेण विनाकृतस्तेन इत्यादौ न विनेत्यस्यार्थे परन्तु विनाकृतपदस्य। विनाव्ययस्य योगे द्वितीयामिव तृतीयापञ्चम्यावपीच्छन्ति घटेन विना घटाद्विना इत्यपि प्रयुक्तेः। उपर्युपरि गृहं पताकेत्यत्र द्विरुक्तस्योपरि निपातस्य सन्निकृष्टोर्द्ध्वभागार्थकत्वेन गृहस्य सन्निकृष्टोर्द्ध्वभागे पताकेत्यर्थः। अधोऽधो मेघमध्यः अध्यधि शिखरं वन इत्यत्राप्युक्तदिशैवान्वयः द्विरुपर्य्यधोऽधीनां सामीप्यवाचितायां तद्योगे द्वितीयानुशिष्टेः। सर्वेषां मध्यमध्यानामुपर्य्युपरि वर्त्तते। अदाता शरणं यातं यात्यधोऽधश्च दुर्गतिरित्यादौ द्विरुक्तस्योपर्य्यादेर्न सामीप्यमर्थः परन्त्वतिशयः। गृहमभितः पुरतरुणा इत्यत्र अभितःशब्दस्य खण्डशो वृत्त्या सर्व्वावच्छेदेनेत्यर्थः तदेकदेशे च सर्वस्मिन् गृहावयवत्वं द्वितीययानुभाव्यते। गृहं परितः सर्वत उभयतो वा इत्यत्राप्युक्तरीत्यैवान्वयः। नदीं यावन्मम पुरं गृहं यावद्वनं तवेत्यत्र यावदित्यव्ययस्य मर्य्यादा अभिविधिश्च क्रमेणार्थस्तेन नदीपर्य्यन्तं मत्पुरं गृहाभिव्याप्तवनमित्याकारस्तत्र बोधः तत्पर्य्यन्तत्वञ्च तदवधिकविप्रकर्षशून्यत्वे सति तत्सन्निकृष्टत्वं तदभिव्याप्तत्वमपि प्रकृते तदारम्भकयावदवयवावच्छेदेन तत्संयुक्तत्वम्। मासं सुप्यते क्रोशं गम्यते इत्यादौ कालाध्वनोरत्यन्तसंयोगे इत्यनुशिष्टेर्द्वितीयया अभिव्याप्तिरुच्यते न मासाभिव्याप्तः स्वापः क्रोशाभिव्याप्तमतेः कर्मत्वमित्यादिकस्तत्र बोधः तत्र मासादेरभिव्याप्तिर्मासवृत्त्यधिकरणतावच्छेदकीभूतयावत्त्वपर्य्याप्त्यधिकरणकालवृत्तित्वं तथाविधयत्किञ्चिद्यावत्त्वव्यापकत्वं वा क्रोशादेस्तु क्रोशगम्यदेशवृत्त्यधिकरणतावच्छेदकीभूतयावत्त्वपर्य्याप्त्यधिकरणदेशवृत्तित्वं तथाविधयत्किञ्चिद्यावत्त्वव्यापकं वेति मन्तव्यम्।

चक्षुषा काण इत्यत्र चक्षुःशून्यगोलकवत्त्वे सति सचक्षु-

गोलकवान् काण: प्रसन्नान्धस्य काणत्वाभावात् गोलकार्थकाक्षिपदोत्तरतृतीयायास्तु विकृतत्वं वृत्तिमत्त्वञ्चार्थ: तत्राद्यं सम्बोध्यत्वमिव प्रकृत्यर्थे विशेषणविधयान्वितं काणत्वैकदेशे च चक्षु:शून्यत्वे प्रकृत्यर्थं निरूपितं चरमं तथाच विकृतगोलकवृत्तित्वविशिष्टं यच्चक्षु:शून्यत्वं तद्वद्गोलकवान् सचक्षुष्क इत्याकारस्तत्र बोध:। पाणिनेरपि येनाङ्गविकार इति सूत्रस्योक्तार्थ एव तात्पर्य्यात्। विकृतत्वन्तु निरूपत्वमयथासंस्थानवत्त्वपर्य्यवसितं कुत्सितेऽङ्गे इति कलापस्यैकवाक्यत्वात्। यद्वा स्वाधिष्ठानवृत्तित्वसम्बन्धेन चक्षु:शून्यो यच्चक्षुर्विनाशस्तद्वान् सचक्षुष्क: काणपदस्यार्थस्तादृशे विनाशे अक्षिपदस्यार्थस्य गोलकस्य विकारप्रयुक्तत्वं तृतीयया बोध्यते तथाच गोलकविकारप्रयुक्तस्य निरुक्तसम्बन्धेन चक्षु:शून्यस्य चक्षुर्नाशस्याश्रय: सचक्षुष्क इत्याकारस्तत्र बोध: विकारस्तु कनीनिकाद्यपगमरूपो ग्राह्य:। पादेन खञ्ज इत्यत्र सहजसंस्थानशून्यचरणवान् खञ्जस्तथाच तत्राप्युक्तरीत्या विकृतपादवृत्तित्वविशिष्टं यत्सहजसंस्थानशून्यत्वं तद्वच्चरणवान् चरणविकारप्रयुक्तस्य यथोचितसंस्थानवैधुर्य्यस्याश्रयोभूतचरणवानिति वा तत्र बोध:। श्रोत्रेण वधिर: कायेन वामन इत्यादावप्युक्तैव रीति: अङ्गपदस्य प्रयत्नावच्छेदकोपलक्षकत्वादिति वदन्ति। मुखेन त्रिलोचन: कायेन दशवक्त्र इत्यादौ तु यदि लोचनत्रयादिमत्तया मुखादिवैकृत्यमवबुध्यते तदा विकार एव तृतीया नो चेद्वैशिष्ट्यमात्रे जटाभिस्तापस इत्यादितो जटाविशिष्टस्तापस इत्याद्यनुभवेन विशेषणेऽनुशिष्टतृतीयायावैशिष्ट्यवाचितायां पर्य्यवसिते:। वैशिष्ट्यञ्चात्र नाधिकरणत्वं सम्बन्धितामात्रं वा मेयत्वेन घट इत्यपि प्रयोगापत्ते: परन्वतद्व्याप्तत्वं तथाच सजटव्याप्तिमांस्तापस इत्याकारस्तत्र फलितार्थ:। इदन्तु

बोध्यं प्रकृत्यर्थस्य नियतवैशिष्ट्यं यदि वर्त्तमानतया प्रत्याय्यते तदैवं विशेषणत्वेन यदि चावर्त्तमानत्वेन तदोपलक्षणत्वेन व्यपदिश्यते यथा शिखया परिव्राजको वर्त्तते इत्यादौ यथा वा गुरुणा टीका कृतवा चैत्रमित्यादौ ।

पुत्रेण सहागतः सूपेन सार्द्धं भुक्तः चक्रेण शाकं दण्डेन जनितः पुत्रेण समं मित्राय दानमित्यादौ स्वान्वयितत्कर्तृत्वादिकारकावच्छिन्नायाः समभिव्याहृतक्रियायाः समानकालीनत्वरूपं साहित्यं सहाद्यव्ययस्यार्थः तदेकदेशे च कर्तृत्वादिकारके स्वप्रकृत्यर्थस्याधेयत्वं तृतीयया बोध्यते तेन पुत्रवृत्तिकर्तृताकगतिकालीनगतिकर्तृतावान् सूपनिष्ठकर्मताकभोजनकालीनभोजनकर्मतावान् चक्रनिष्ठकरणताकोत्पत्तिकालीनदण्डनिष्ठकरणताकोत्पत्तिमान् पुत्रसम्प्रदानताकदानकालीनं मित्रसम्प्रदानताकं दानमित्याकारस्तत्र बोधः। तुल्यवदेकक्रियान्वयित्वं साहित्यमिति प्रवादस्याप्येककारकान्वयित्वेन तुल्ययोरेकजातीयक्रिययोरन्वयित्वं समानकालीनत्वमित्यत्र तात्पर्य्यात् पुत्रेण सहागत इत्यत्र समभिव्याहृतापि गतिक्रिया न कर्मत्वादिमान्वयिनी किन्तु निष्ठार्थकर्तृत्वेनेति पुत्रकर्मत्वाद्यवच्छिन्नगतिकालीनत्वस्य न तत्रावगमः। पुत्रेण सह गतं चैत्रेणेत्यादावपि तृतीयार्थ एव कर्तृत्वे गतिक्रियान्विता। यत्तु पुत्रेण सहागत इत्यत्र समभिव्याहृतगत्यादिक्रियाकालीनत्वमेव सहाद्यव्ययस्यार्थस्तन्निविष्टगतौ पुत्रादिपदोत्तरतृतीयायाः सम्बन्धः पुत्रनिष्ठकर्तृत्वस्यान्वयादेव पुत्रकर्तृकगतेर्लाभादिति तन्न, तृतीयार्थकर्तृत्वस्य धात्वर्थ एव साकाङ्क्षत्वेन सहाद्यर्थे तदन्वयस्याव्युत्पन्नत्वात् । पुत्रेण समं मित्रं प्राप्तश्चैत्र इत्यादौ तु तात्पर्य्यवशात् पुत्रकर्तृकप्राप्तिकालीनमित्रप्राप्तिकर्तृत्वं कदाचित्तु पुत्रकर्मकप्राप्तिकालीनमित्रकर्मकप्राप्ति-

कर्तृत्वं चैत्रस्य बुध्यते: समभिव्याहृतायाः प्राप्त्यादिक्रियायाः कर्तृत्व इव कर्मत्वेऽप्यन्वयितया तत्प्रत्येकावच्छिन्नप्राप्त्यादिकालीनत्वबोधने सहाद्यव्ययस्य सामर्थ्यप्रचयवात्। नचान्यकर्तृकधनप्राप्तिदशायां ग्रामप्राप्तिमित्यपि मैत्रे धनेन सहायं ग्रामं प्राप्त इति प्रयोगापत्तिस्तस्य धनकर्मकप्राप्तिकालीनग्रामकर्मकप्राप्तिमत्त्वानपायादितिवाच्यं घटत्वेन सह घटमवगाहते बुद्धिरित्यादौ क्वचित् कर्तृत्वावच्छिन्नायाः समानकर्मकत्वस्येव सर्वत्र कर्मत्वावच्छिन्नायाः समभिव्याहृतक्रियायाः समानकालीनत्वस्येव समानकर्तृकत्वस्यापि सहार्थे निवेश्यत्वात्। यत्तु स्वान्वयि कर्मत्वाद्यवच्छिन्ना समभिव्याहृतक्रियैव सर्वत्र सहाद्यव्ययस्यार्थस्तस्याश्च समानकालीनत्वैककर्तृत्वोभयसम्बन्धेनैव समभिव्याहृतक्रियायामन्वयान्नोक्तदोष इति तत्तुच्छं शाकस्य भोजनं न सुधया सहेत्यादिवाक्यानां समानकर्तृकत्वादिसम्बन्धेन सुधाकर्मकभोजनाद्यभावस्य बोधकतायामप्रामाण्यापत्तेः वृत्त्यनियामकसम्बन्धावच्छेद्यप्रतियोगित्वाप्रसिद्धेः।

घटः पटत्वेन सह भासते इत्यादौ पटत्वनिष्ठविषयतायाः समानकालीनत्वमिव समानप्रतियोगिकत्वमप्यर्थः विभिन्नज्ञानीयविषयतायां तादृशाप्रयोगात् पुत्रेण सह गतिरित्यादौ कर्तृत्वाद्यन्वयिक्रियासमभिव्याहारविरहेण शक्त्या पुत्रकर्तृकगतिकालीनत्वादेर्बोधयितुमशक्यत्वादनन्यगत्या सहादेस्तादृशार्थे निरूढलक्षणा पुत्रेण सह स्थूल इत्यादावपि समभिव्याहृतनामार्थतावच्छेदकीभूतस्थौल्यादिकालीनत्वे तथाच पुत्रवृत्तिस्थौल्यकालीनस्थौल्यवानित्याकारस्तत्र बोधः पत्न्या सहाग्निमादध्यादित्यादौ पत्नीकर्तृकस्याग्न्याधानस्यालीकत्वेन तत्समानकालीनत्वस्य प्रमापयितुमशक्यत्वात् सामानाधिकरण्यपर्यवसितं सहभावमात्रं तत्र सहस्यार्थः यथा घटेन सह पट-

वक्तृत्वमित्यादौ । एतेन यत्कर्त्तव्यं तदनया सहेत्यादिको विधिरपि व्याख्यातः । पुत्रेणागत इत्यादौ विनापि सहादिप्रयोगं तदर्थस्य प्रतीतेस्तृतीयाया एव तत्र कर्तृत्वाद्यवच्छिन्नगतिकालीनत्वादिकमर्थस्तन्निविष्टे च कर्तृत्वादौ प्रकृत्यर्थस्य पुत्रादेराधेयत्वेनान्वयः ।

धनेन कुलं दण्डेन घट इत्यादौ व्यापारगर्भस्य करणत्वस्याप्रतीतावपि हेतुत्वप्रत्ययादभिघातेन क्रियेत्यादौ करणत्वस्य बाधाच्च तत्र जनकत्वरूपं हेतुत्वमेव तृतीयार्थस्तथा च धननिष्ठहेतुताकं कुलमित्याकारस्तत्र बोधः । न च गोत्वं न धनेनेतिवत् कुलं न धनेनेत्यपि स्यात् निरूपकत्वादेः सम्बन्धस्य वृत्त्यनियामकतया तदवच्छिन्नाभावस्य प्रत्येतुमशक्यत्वादिति वाच्यं कुले धनस्य हेतुत्वं गवि द्विजस्य सम्प्रदानत्वं पतने वृक्षस्यापादानत्वं वह्नौ धूमस्य ज्ञापकत्वं धने चैत्रस्य स्वामित्वं घटे भूतलस्याधिकरणत्वमित्यादिप्रतीत्या निरूपकत्वस्यापि सम्बन्धस्य क्वचिद्वृत्तिनियामकत्वात् न हि कुलादिनिरूपितं हेतुत्वादिकमेव धनादिनिष्ठत्वेन तासु भासते । धनादिनिष्ठहेतुत्वादेः सम्बन्धविशेषेण कुलादिवृत्तिताया अप्यनुभावकत्वेनैकशेषस्य दुष्करत्वात् वृत्त्यनियामकसम्बन्धस्य प्रतियोगितानवच्छेदकत्वे पतनमिदं वृक्षान्नतु गृहात् गमनमिदं ग्रामस्य नतु गृहस्येत्यादौ पञ्चम्याद्यर्थस्य विभागादेरनुकूलत्वसम्बन्धावच्छिन्नाभावस्य प्रत्ययायोगाच्च तत्र पञ्चम्यादिलक्षितस्य विभागाद्यनुकूलत्वस्यैव नञा विरहबोधने गोत्वं न धनेनेत्यादावपि तृतीयादिलक्षणालब्धस्य धनादिनिष्ठहेतुतानिरूपकत्वादेरभावस्य नञा बोधसम्भवात् अस्तु वा हेतुत्वादिविहिततृतीयादेर्जन्यत्वसम्प्रदेयत्वादिकमेवार्थस्तथाच कुलं धनजन्यतावदित्याकार एवास्तु तत्र बोधः । धूमेन वह्निरनु-

त्वेन द्रव्यत्वमित्यादौ तु वह्न्यादेर्धूमाद्यजन्यत्वेन धूमादि-
निष्ठजनकत्वानिरूपकत्वादनायत्या व्यापकत्वलक्षणं गौणमेव
हेतुत्वं तत्र तृतीयार्थस्तेन धूमनिष्ठं यज्ज्ञापकत्वं तद्वान् वह्नि-
रित्याकारस्तत्र बोधस्तद्धेतुत्वस्य स्वप्रतियोगिविषयत्वसम्बन्धेन
ग्राह्यम्। न च धूमादेर्वह्न्यादिज्ञानजनकत्वं बाधितं लिङ्ग-
स्यानुमितावहेतुत्वादिति वाच्यं वह्न्याद्यवगाहिनि स्वसाक्षात्कारे
विषयविधया स्वनिष्ठत्वेनाभावप्रत्यक्षे च सन्निकर्षघटकतया
धूमादेर्जनकत्वसम्भवात् धूमेनेत्यत्र धूमपदस्य धूमज्ञानेऽणुत्वे-
नेत्यादौ च त्वादिप्रत्ययस्य स्वार्थज्ञाने लक्षणया तन्निष्ठत्वेन
ज्ञापकत्वमुक्तस्थले तृतीयया बोध्यते इति तु चिन्तामणिकृतः।
यद्यप्युक्तदिशा व्याप्तिभ्रमेण च वह्न्यादेरपि धूमादिज्ञापकत्व-
मस्त्यतो वह्निना धूमवानित्यादेरपि प्रामाण्यापत्तिस्तथापि तत्त-
दर्थकपदोत्तरतृतीयायास्तत्तदर्थव्यापकनिष्ठेनैव स्वप्रतियोगि-
विषयत्वादिसम्बन्धेन तत्तदर्थनिष्ठज्ञापकत्वादेरन्वयबोधं प्रति
हेतुत्वात् धूमादेश्च वह्न्याद्यव्यापकत्वात् न तथा न च धूमादे-
रपि द्रव्यत्वादिरूपेण वह्न्यादिव्यापकत्वादुक्तदोषतादवस्थ्यं धूम-
त्वावच्छिन्नस्य वह्निव्यापकत्वस्य संसर्गत्वे च धूमो न वह्निनेत्यादेर-
प्रामाण्यापत्तिर्निरुक्तसंसर्गस्याप्रसिद्ध्या तेन वह्निनिष्ठज्ञापक-
त्वाभावस्य नञा बोधयितुमशक्यत्वादिति वाच्यं धूमत्वादि-
विशिष्टे तृतीयार्थस्य वह्न्यादिज्ञापकत्वस्य बोधने विशिष्ट-
प्रतियोग्यनधिकरणवह्न्यादिमन्निष्ठाभावीयधूमत्वान्यधूमवृत्तिध-
र्मानवच्छिन्नप्रतियोगित्वस्य धूमत्वावच्छिन्नप्रतियोगित्वस्य च
द्वित्वावच्छिन्नाभावरूपाया एव वह्न्यादिव्यापकतायाः संसर्ग-
त्वेन घटादावेव तादृशव्यापकतायाः सुप्रसिद्धत्वान्निरुक्तप्रति-
योगिताद्वयोरभावस्य साध्यताघटकसम्बन्धावच्छिन्नप्रतियोगिता-
निरूपितेनैव स्वरूपसम्बन्धेन ग्राह्यः तेन व्यधिकरणसम्बन्ध-

इयावच्छिन्नयोर्वह्नित्वावच्छिन्नप्रतियोगित्वयोर्वह्नौ सत्त्वेऽपि वह्नि-धूमेनेत्यादे र्नायोग्यत्वमिति युक्तमुत्पश्यामः। यत्तु वह्न्यादि-पदोत्तरयोः तृतीयापञ्चम्योर्वह्न्यादिव्यापकतावच्छेदकरूपाव-च्छिन्नं वह्न्यादिव्याप्यत्वमेवार्थस्तस्य च धूमत्वादिविशिष्टे धूम-त्वाद्यवच्छिन्नप्रकारतानिरूपितस्वरूपसम्बन्धेनैव साकाङ्क्षत्वात् वह्निना धूम इत्यादिको न योग्यः किन्तु वह्निना न धूम इत्यादिरेव वह्न्यादिव्यापकतावच्छेदकीभूतरूपावच्छिन्नस्य वह्न्यादिजन्यज्ञानविषयत्वस्य धूमत्वादिविशिष्टे धूमत्वाद्यव-च्छिन्नप्रकारतानिरूपितस्वरूपसम्बन्धेनासत्त्वात् इति तच्चिन्त्यं वह्निना न धूम इत्यादौ वह्न्यादिव्यापकत्वस्य प्रकारतया भानेऽनुभवविरोधादिति दिक्।

धूमादिनिष्ठपञ्चम्यर्थव्यापकत्वादिविशिष्टस्य च वह्न्यादेर्धू-मादिमदनुयोगिकेनैव तद्व्यापकताघटकसंयोगादिसम्बन्धेन मतुबाद्यर्थे साकाङ्क्षत्वादयःपिण्डं धूमेन वह्निमदित्यादिको न प्रयोगः। दण्डाद्घटो धूमाद्वह्निरित्यादौ च हेतुतार्थिकायाः पञ्चम्या अप्युक्तदिशैवान्वयो द्रष्टव्यः। घटेन शून्यो विधुरो रहित इत्यादौ घटत्वाद्यवच्छिन्नं प्रतियोगित्वमेव शून्यत्वान्वयि तृतीयार्थः। प्रकृत्या कृपणः स्वभावेन सरल इत्यादौ प्रकृ-त्यादिपदं यावदाश्रयभाविधर्मपरं तृतीयार्थश्चाभेदस्तादात्म्यं वा प्रकृत्यादिभ्यश्चेति सूत्रेण तत्रैव तद्विधानदेवञ्च स्वाश्रया-धिकरणयावत्कालवृत्तिकार्पण्यवानित्याकारस्तत्र बोधः। सुरथो नाम राजेत्यत्र सुरथः सुरथशब्दवाच्यस्तदेकदेशे च शब्दे लुप्त-तृतीयाकेन संज्ञार्थकनामेत्यव्ययेन प्राप्तस्य संज्ञातादात्म्यस्या-न्वयस्तेन संज्ञातादात्म्यवत् सुरथशब्दवाच्यो राजेत्यर्थः। नामेत्य-व्ययार्थः सम्भाव्यत्वं तच्च सुरथेऽन्वितमिति कश्चित्। नाम्ना चन्द्रमुखीत्यादौ अनव्ययेनापि नामपदेनोक्तदिशैवान्वयः।

धान्येन धनं घटत्वेन साजात्यं वाजपेयेन यजनमित्यादावपि धनाद्यन्वयो धान्यादेरभेद एव तृतीयार्थस्तत्र धूमेन वह्निरित्यादाविव ज्ञापकत्वं तथेत्यपि वदन्ति। जात्या ब्राह्मण इत्यादौ ब्राह्मणपदस्याहष्टविशेषप्रयोज्यधर्मवत्परतया तादृशधर्म एव जात्यभेदस्यान्वयः स्वरूपत उपस्थिते ब्राह्मण्ये तदन्वयायोगात्। घटत्वेन जन्यत्वं प्रकारत्वमित्यादौ अवच्छेदकत्वमवच्छेद्यत्वं वा तृतीयार्थः। चैत्रेण चैत्रस्य वा तुल्य इत्यादौ भिन्नत्वे सति धर्मवत्त्वं तुल्यता तन्निविष्टे च भेदे तृतीयाद्यर्थस्य प्रतियोगित्वस्य धर्मे चाधेयत्वस्यान्वयात् चैत्रत्वावच्छिन्नान्यत्वे सति चैत्रवृत्तिधर्मवानित्यर्थः। चैत्रेण चैत्रस्य वा सादृश्यमित्यादावपि तथैवान्वयः। तुलोपमयोर्योगे तृतीया नेष्यत इति पाणिनीयाः। तुलामधारिण शरह्ननेन केनोपमा भवतु तेऽस्य पराक्रमस्य इत्यादिकस्तु दृश्यते प्रयोगः। गजेन तुल्यगमनो वृषस्य सदृशेक्षणः इत्यादौ तु गत्यादिकं तृतीयार्थः तेन गजगतितुल्यगतिमान् वृषेक्षणतुल्येक्षणवानित्याकारस्तत्र बोधः। भोगेषु प्रसितः उत्सुकः इत्यादौ सप्तम्या इव भोगैः प्रसितः उत्सुकः इत्यादौ तृतीयाया अपि विषयत्वलक्षणं गौणमधिकरणत्वमर्थस्तेन भोगेष्वनुरक्त इत्येवं तत्र बोधः। पुष्ये स्नायादित्यादौ पुष्यादितः कालार्थकतद्धितस्य लुकि ततः सप्तमीवत् पुष्येण स्नायादित्यादावपि तादृशार्थकतृतीयया अधिकरणत्वं बोध्यते तथा च पुष्ययुक्तकाले स्नायादित्येवं बोधः। पुष्ये रूपमित्यादौ रूपादेः पुष्यवृत्तित्वं प्रतीयते न तु तद्युक्तकालवृत्तित्वम् अतः पुष्येण रूपमित्यादिको न प्रयोगः।

मन्यते कर्मणो यस्मादयुक्तैवापकृष्टता। नञ्बोध्यास्मात् द्वितीयावच्चतुर्थी प्राणिवर्जितात् इति भाष्यस्मृतेर्मन्यतेरनुक्तकर्मणि यदवधिकापकृष्टत्वं नञा बोध्यं तत्र द्वितीयावच्चतु-

ष्यं पि प्रमाणं तेन न त्वा तृणं मन्ये इत्यादाविव न त्वा तृणाय मन्ये इत्यादावपि त्वां तृणादपकृष्टं मन्ये इत्यर्थः। द्रोणि-मर्य्यादया हीनो ब्राह्मणो नैव दुर्मतिरित्यादावसमस्तस्यापि नञोऽपकर्षप्रत्यायकत्वात्। न त्वं कीटोमतो मयेत्यादौ मन्यतेः कर्मापि त्वदादिकं नानुक्तम्। जारजं न द्विजं मन्ये इत्यादौ जारजादेर्द्विजात्यपकृष्टत्वं नायुक्तमबाधितत्वात्। न नावं मन्यते योऽश्वं न काकं मन्यते शुकम्। नावं स मन्यते सर्पिणं शृगालं स मानुषमित्यादौ तु नावाद्याः प्राणिन एव नौकाकाकशृगालानां प्राणित्वं शाब्दिकस्मृतेः। न तृणाय युवां मन्ये न त्वा तृणाभ्यां मन्ये इत्यादिकस्तु न प्रयोगः। भेदस्येवापकर्षस्याप्यसमस्तनञा बोधने प्रतियोग्यनुयोगिनोः समानवचनस्य तन्त्रत्वात्। सदृशत्वं तृणादीनां मन्यकर्मत्वमनुक्तके। द्वितीयावच्चतुर्थ्यापि बोध्यते बाधितं यदीत्यपिशलेर्मतं तेन तृणाय त्वा मन्यते इत्यादेस्तृणसदृशं त्वां मन्यते इत्यर्थः। तन्मत एव तृणाय मत्वा रघुनन्दनोऽथ बाणेन रक्षः प्रधनान्निरास्थदिति भट्टिः। प्रधनं युद्धम्।

पुष्पमिदं विष्णवे नम इत्यस्य विष्णूद्देश्यकमन्त्रकरणत्यागस्य कर्मेदं पुष्पमित्यर्थस्तत्र चतुर्थ्या प्रीत्युद्देश्यकत्वं तदिच्छाधीनत्वरूपं नमः पदार्थे मन्त्रकरणकत्यागे बोध्यते प्रकृत्यर्थस्य च विष्ण्वादेः प्रीतौ तदिच्छायां वान्वयः ब्राह्मणाद्युद्देश्यकस्य च गवादित्यागस्य मन्त्रकरणत्वे प्रमाणाभावात् गौर्ब्राह्मणाय नम इत्यादिको न प्रयोगः। ब्राह्मणेभ्यो नमो नित्यमित्यादौ तु नमःपदार्थो नतिरेवेति तत्र विषयत्वं चतुर्थ्या बोध्यते। पुष्पमिदं परमात्मने नम इत्यादौ परमात्मनः प्रीत्यसत्त्वेऽपि तत्प्रीतित्वप्रकारकेच्छासम्भवान्न तत्प्रीत्युद्देश्यकत्वाप्रसिद्धिः। स्वत्वकरणको हविस्त्यागः स्वधास्वाहयोरर्थः

तेनेदं पित्रे स्वधा अग्नये स्वाहेत्यादौ पितृदेश्यकस्य स्वधापद-करणकस्य हविस्त्यागस्य कर्मेदमित्याकारकः तत्र पैतृके त्यागे स्वाहादैविके च स्वधानदेनं करणत्वं तत्र्याहकप्रमाणाभावादतः पित्रे स्वाहा अग्नये स्वधेत्यादिको न प्रयोगः। वषडिन्द्रायेत्यत्रा-प्युक्तादिशैवान्वयः। स्वस्ति प्रजाभ्य इत्यादेः प्रजानिष्ठं कुशल-मित्यर्थः स्वस्तिशब्दस्य कुशलवाचित्वात् कुशलस्याशंसास्थले तु स्वस्त्यस्तु प्रजाभ्य इतिवत् स्वस्त्यस्तु प्रजानामित्यपि प्रमाणम् आशासेर्धनकुशलायुष्यार्थैर्योगे चतुर्थी वेति भागुरिस्मृतेरित्यपि वदन्ति। चैत्रस्य सुखं मैत्रस्य हितमित्यादित इव चैत्राय सुखं मैत्राय हितमित्यादितोऽपि चैत्रादिनिष्ठत्वे न सुखादे र्बोधास्तत्रा-प्याधेयत्वं चतुर्थ्यर्थः। सुखायालं समर्थं योग्यं वा भोजनमि-त्यादावलमादिपदार्थैकदेशे सामर्थ्ये सुखादिनिरूपितत्वं चतुर्थ्या बोध्यते अलमनेनेत्यादौ वैफल्यमेवालंपदस्यार्थो न तु साम-र्थ्यम्। यूपाय दारु रन्धनाय स्थालीत्यादौ तु यूपाद्यनुकूलत्व-रूपं तादर्थ्यमेव दार्वादौ पाकाय व्रजतीत्यादावपि पाकाद्यु-देश्यकत्वं तदिच्छाधीनत्वरूपं व्रजनादौ भावप्रत्ययान्तात् तुमर्थे चतुर्थ्यनुशिष्टेः। अतएव परपाकार्थं गच्छत्यपि पुरुषे पक्तुं व्रजतीत्यादिक इव पाकाय व्रजतीत्यादिको न प्रयोगः। समानकर्तृकत्वस्यापि तुमर्थेऽन्तर्भावात् पटाय व्रजतीत्यादौ च पटादेर्भावप्रत्ययान्तानुपस्थाप्यत्वान्न तदिच्छाधीनत्वादेरनन्वयादव-गमः तुम इव तदर्थकचतुर्थ्या अपि धात्वर्थ एव स्वार्थे साकाङ्क्ष-त्वाच्च पाकाय स्थालीत्यादितो न पाकेच्छाधीनत्वादेः स्थाल्यादौ फलेभ्यो व्रजतीत्यादेः फलान्याहर्तुं व्रजतीत्यादिसमानार्थ-कत्वानुरोधात्तत्र फलकर्मकाहरणेच्छाद्यधीनत्वं फलाद्युत्तर-चतुर्थ्या व्रजनादौ बोध्यते रीतिरत्रैव।

पूर्वो ग्रामादित्यत्रोदयाचलसन्निकृष्टरूपस्य पूर्वपदार्थस्यैक-

देशे तादृशसन्निकृष्टत्वे ग्रामाद्यवधिकत्वं पञ्चम्या बोध्यते । ग्रामादुत्तरो दक्षिण इत्यादावपि कैलाससन्निकृष्टत्वादिपर्य्यवसितोत्तरत्वादौ । ग्रीष्मात् पूर्वो वसन्तः कृष्णात् पूर्वो हलायुध इत्यादौ तु प्रागभावप्रतियोग्युत्पन्नत्वादिपर्य्यवसन्नस्य पूर्वत्वादेर्घटके प्रागभावादौ ग्रीष्मादिनिष्ठप्रतियोगिताकत्वम् । घटादन्यो भिन्नः पृथगित्यादौ घटत्वाद्यवच्छिन्नमवधित्वं प्रतियोगित्वं वा निरूपकत्वसंसर्गेण तेन घटनिष्ठघटत्वावच्छिन्नावधिताकभेदवानित्याकारकस्तत्र बोधः । गृहाद्गङ्गा मम परा काश्याः सैवापरा मम इत्यादौ विप्रकृष्टत्वसन्निकृष्टत्वरूपयोर्दैशिकपरत्वापरत्वयोरन्वितं गृहकाश्यादिसापेक्षत्वं पञ्चम्यर्थः तच्च स्वरूपसम्बन्धः पदार्थान्तरं वा तेन गृहापेक्षया मद्विप्रकर्षवती गङ्गा काश्यपेक्षया मत्सन्निकर्षवती गङ्गेत्याकारबोधः । परिगृहादृगतः अपगृहादभुक्त इत्यादौ पर्य्यपयोः परित्यज्येत्यर्थः । स च धात्वर्थ एव साकाङ्क्षस्तेन गृहात्परि चैत्र इत्यादिको न प्रयोगः । आदेहादस्त्रं आगृहादुद्यानमित्यत्राभिव्याप्तत्वं मर्य्यादा वाङोऽर्थस्तेन देहव्याप्तं वासो गृहमर्य्यादाकमुद्यानमित्याकारस्तत्र बोधस्तदुभयञ्च निरुक्तं प्राक् । वैश्येभ्यः क्षत्रियाः शूराः शूद्रेभ्यो धनिनो विप्रा इत्यत्र वैश्यशौर्य्यादधिकशौर्य्यवन्तः क्षत्रियाः शूद्रधनाधिकधनवन्तो वैश्या इत्यर्थः सजातीयाधिक्यरूपे व्यतिरेकेऽपि पञ्चम्या अनुशिष्टेः शौर्य्यादेर्वैश्यशौर्य्याद्यधिकत्वञ्च वैश्यशौर्य्यादिमात्रवृत्तिसंख्यासामान्यनिष्ठभेदप्रतियोगितावच्छेदकीभूत जातिमत्त्वंव्यापर्य्याप्त्यधिकरणत्वं तच्छौर्य्यपर्य्याप्तसंख्यासामान्यनिष्ठभेदप्रतियोगितावच्छेदकीभूतजातिमद्बहुत्ववत्त्वन्तु न तथा यस्यैकमेव शौर्य्यं यस्य च शौर्य्यद्वयमेव ततः स शूर इत्यादेरयोग्यतापत्तेः तदुभयशौर्य्ययोः पर्य्याप्तसंख्याबहुत्वयोरप्रसिद्धेः । इदन्तु बोध्यं निरुक्तवैश्यादिशौर्य्याद्यधिकत्वे

वैश्यादेः प्रकृतिसम्बन्धत्वादितरभागः खण्डशो वृत्त्या षष्ठ्या प्रतिपाद्यत इति चैत्रस्य धनं वृक्षस्य शाखा स्फटिकस्य लौहित्यमित्यादौ स्वत्वस्य समवेतत्वादिकं प्रातिस्विकरूपेणैव षष्ठ्यर्थः सम्बन्धत्वेन तथात्वे चैत्रस्य परधने नेदं चैत्रस्येत्यादेरयोग्यतापत्तेः सम्बन्धत्वस्याननुगतस्य दुर्वचत्वाच्च।

विशेषस्य स्वेतरसामान्यव्यावृत्तधर्मवत्त्वं निर्धारणं तच्च समुदितं न षष्ठ्यर्थः सामान्यतन्निष्ठधर्मयोः स्वपदोपात्तत्वात् किन्तु विशेषान्यत्वं व्यावृत्तं च विशेषस्तत्समभिव्याहृतक्षत्रियादिविशेष्यग्राह्यः व्यावृत्तत्वञ्च भेदप्रतियोगित्वं तथाच नराणां क्षत्रियः शूरतम इत्यत्र क्षत्रियस्य नरविशेषतया षष्ठ्यर्थे न क्षत्रियान्यत्वेन विशिष्टस्य तत् प्रकृत्यर्थस्य नरस्य तादृशनरत्वावच्छिन्नाधेयत्वसंसर्गेण भेदेऽन्वयलब्धस्य क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वस्य शूरतमे शूरतमस्य च क्षत्रिये तादात्म्येनान्वय इति क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वच्छूरतमाभिन्नः क्षत्रिय इत्याकारकस्तत्र बोधः क्षत्रियान्यनरस्याधेयतामात्रेण भेदेऽन्वये नराणां क्षत्रियः सुन्दर इत्यपि प्रयोगापत्तेः क्षत्रियान्यकुरूपनरनिष्ठभेदप्रतियोगित्वस्य सुन्दरे सत्त्वात् एवञ्च नरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वस्य शूरतमे बाधादुक्तवाक्यस्यायोग्यतापत्तिरतः षष्ठ्यर्थे न क्षत्रियान्यत्वेन तत्प्रकृत्यर्थो नरो विशेषितः। न च घटानां क्षत्रियः शूर इत्यपि स्यात् क्षत्रियान्यघटत्वावच्छेदेन शूरभेदस्य सत्त्वादिति वाच्यं राहोः शिर इत्यादाविव प्रकृते क्षत्रियान्वयिनः स्वप्रकृत्यर्थतादात्म्यस्य षष्ठ्या बोध्यत्वात्। न च संख्यान्यसुबर्थस्य प्रकृत्यर्थविशेष्यत्वनियमात् क्षत्रियान्यत्वरूपस्य षष्ठ्यर्थस्य प्रकृत्यर्थनरे प्रकारत्वायोग इति वाच्यं सम्बोध्यत्वादौ व्यभिचारेण तादृशव्याप्तेः प्रायिकत्वस्य प्रागुक्तत्वात्। न च

नराणां क्षत्रियो द्रव्यमित्यपि स्यात् क्षत्रियान्यनरत्वावच्छेदे द्वित्वाद्यवच्छिन्नद्रव्यप्रतियोगिताकभेदसत्त्वादिति वाच्यं द्रव्यत्वादिविशिष्टे धर्मिणि द्रव्यत्वाद्यवच्छिन्नस्यैव भेदप्रतियोगित्वस्य बोधने निर्द्धारणषष्ठ्याः समर्थत्वात् यद्यपि भेदः प्रतियोगित्वञ्च स्वयमेव निर्द्धारणषष्ठ्यर्थः क्षत्रियशब्देनैवोपस्थापितस्य क्षत्रियस्य षष्ठ्यर्थभेदे तस्य च नरे नरस्य च पुनर्भेदे पुनर्भेदभेदस्य प्रतियोगित्वेऽन्वयादेव क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वस्य शूरतमेऽन्वयसम्भवात् तथापि क्षत्रियादिनामोपस्थाप्यस्य क्षत्रियादेस्तादृशनामोत्तरविभक्त्यर्थ एव भेदेनान्वयस्य व्युत्पन्नत्वात् नरपदोत्तरषष्ठ्यर्थे तदन्वयासम्भवात् क्षत्रियान्यत्वं विशिष्टमेव षष्ठ्यर्थो नत्वन्यतामात्रं न च नरस्य क्षत्रियः शूर इत्यपि स्यात् पाणिपादस्य पाणिः पवित्र इत्यत्रेवान्यत्रापि एकवचनस्य निर्द्धारणार्थकत्वे क्षत्यभावात् अतएव द्वन्द्वः सामासिकस्य चेति गीतापि सङ्गच्छते एकवचन भिन्नयोरेव षष्ठी सप्तम्योरुक्तनिर्द्धारणबोधकत्वव्युत्पत्तिस्वीकाराद्दा। ननु पाथः पृथिव्योर्जलं स्नेहवदित्यादौ जलभिन्नयोः पाथःपृथिव्योरप्रसिद्ध्या पाथःपृथिव्युभयवृत्तिभेदप्रतियोगित्वस्य स्नेहवति बाधेन च जलान्यपाथःपृथिव्युभयत्वावच्छिन्नवृत्तिकभेदप्रतियोगिनः स्नेहवतो बोधासम्भवः। न च द्विपदद्वन्द्वोत्तरनिर्द्धारणषष्ठ्या अन्यतरवृत्तिभेदप्रयोगित्वमेवार्थः तन्निविष्टे चान्यतरस्मिन्नेकपदोपात्तत्वेन जलान्यत्वादेः षष्ठ्यर्थान्तरस्यान्वयः तथाच जलान्यो यः पाथःपृथिव्योरन्यतरस्तन्निष्ठस्य भेदस्य प्रतियोगित्वं स्नेहवति वर्तत एवेति वाच्यं तावतापि पाथःपृथिव्युभयतादात्म्यस्य जले बाधादुक्तवाक्यस्य योग्यतातादवस्थ्यात् पाथः पृथिव्योस्तेज उष्णमित्याद्ययोगेन निर्द्धारणषष्ठ्यास्तादात्म्यवाचिताध्रौव्यात् घटतद्भिन्नयोर्घटः कम्बुग्रीवादिमानित्यादौ

घटतद्भिन्नान्यतरत्वाप्रसिद्धा ताट्टशान्यतरवृत्तिभेदस्य बोधयितुमशक्यत्वाच्चेति चेन्न इन्द्रोत्तर निर्द्धारण षष्ठा: पर्य्याप्तसंख्याश्रयेऽपि शक्तत्वेन तस्मिन्नेवैकपदोपात्तत्वेन षष्ठार्थस्य जलाद्यन्यत्वरूपनिर्द्धार्य्यभेदस्यान्वयेन सर्वसामञ्जस्यात् पाथः पृथिव्योर्जलं स्नेहवदित्यादौ जलभिन्नो यः पाथः पृथिवीपर्य्याप्तसंख्याश्रयस्तत्त्वावच्छिन्नवृत्तिकभेदप्रतियोगित्वस्य ह्यभिन्नं पाथः पृथिवीपर्य्याप्तसंख्याश्रयो जलमित्यन्वये बाधकाभावात्। पटघटमठानां घटः कम्बुग्रीवादिमानित्यादावप्युक्तरीत्यैवान्वयधीः। इदन्तु बोध्यं यत्रोद्देश्यविधेययोस्तादात्म्येनान्वयबोधसामग्रीतत्रैव निर्द्धारणषष्ठ्याभेदप्रतियोगित्वमर्थः यत्र तु सम्बन्धान्तरेण तत्रात्यन्ताभावप्रतियोगित्वमतो नराणां क्षत्रिये शौर्य्यमित्यादौ क्षत्रियान्यनरत्वावच्छिन्नवृत्तिकस्यात्यन्ताभावस्यैव प्रतियोगित्वं शौर्य्यादौ प्रतीयते न तु ताट्टशभेदस्य नराणां क्षत्रिये रूपमित्यपि प्रयोगापत्तेः। नराणां मध्ये क्षत्रियः शूर इत्यादौ तु निर्द्धारणवाचिनो मध्ये इत्यव्ययस्य तदर्थकषष्ठ्या सह सम्भेदे हे चैत्रेत्यादाविव नान्यतरवैयर्थ्यम्। नरेषु क्षत्रियः शूर इत्यादौ निर्द्धारणसप्तमीस्थलेऽप्युक्तदिशैवान्वयो द्रष्टव्यः। यत्तु नराणां क्षत्रियः शूरतम इत्यादौ राहोः शिर इत्यत्रेवाभेदएव षष्ठार्थस्तादात्म्यं वा तथा च नराभिन्नक्षत्रियत्वावच्छेदेन शूरतमस्याभेदस्तत्र वाक्यार्थस्तेन नराणां क्षत्रियोऽर्जुन इत्यादिको न प्रयोगः नरभिन्नक्षत्रियत्वावच्छेदेनार्जुनाभेदस्यासत्त्वात् न वा नराणां वानरः पशुरित्यादिकः, कीशे पश्वभेदसत्त्वेऽपि मानुषाभेदस्य विरहादिति तत्तुच्छं नराणां क्षत्रियः प्राणी क्षत्रियाणां नरः शूर इत्यादिवाक्यस्य दुर्वारतापत्तेः। केचित्तु नराणां क्षत्रियः शूर इत्यादौ क्षत्रियान्यो नरः

शूरभिन्नो नराभिन्नः क्षत्रियश्च शूर इत्येवमन्वयितावच्छेदक-धर्मावच्छेदेन धियमुरीकुर्वन् भेदमभेदञ्च निर्धारणवाचिषष्ठी-सप्तम्योरर्थमाहुस्तच्चिन्त्यं नामार्थमुख्यविशेषकान्वयबोधे नाम-प्रथमान्तत्वापेक्षाया: परित्यागापत्तेः स्वप्रकृत्यर्थावच्छिन्नस्यैव संख्यायुन्यसुबर्थस्य शब्दान्तरार्थेन सहान्वयस्य व्युत्पन्नत्वेन षष्ठार्थे केवलभेदे शूरादेरन्वयायोगाच्चेत्यास्तां विस्तरः।

भूतले घटस्तन्तुषु पटः स्फटिके लौहित्यमित्यादौ दैशिक-सम्बन्धावच्छिन्नमेवाधेयत्वं कालिकादिसंसर्गवाचिशब्दासमभि-व्याहृतसप्तम्या बोध्यते तथैव तस्याः साकाङ्क्षत्वात् अन्यथा क्रियायां मूर्त्तान्यद्रव्ये वा पटत्वमित्यपि प्रयोगापत्तेः क्रियादावपि कालिकादिसम्बन्धेन पटत्वादेर्वृत्तिमत्त्वात् घटे कालिकेन दिक्कृतेन वा सम्बन्धेन पटत्वमित्यादौ तादृशसम्बन्धवाचिश-ब्देन समभिव्याहृतैव सप्तमी। एवञ्च कालत्वान्तर्भावेन शक्ति-मन्ता: शरदादिशब्देभ्य: सप्तम्या: कालिकसम्बन्धावच्छिन्नाधेय-त्वस्य बोधनाय "कालभावयो: सप्तमी" इति विध्यन्तरमपि सङ्गच्छते अधिकरणसप्तम्या तदनिर्वाहात् तथा च शरदि पुष्पन्ति सप्तच्छदा इत्यत्र शरत्कालवृत्तिर्य: पुष्पोत्पादस्तद्वन्त: सप्तच्छदा इत्यर्थ:। पुष्पतेरुत्पादरूपस्यैव कर्तृत्वस्य तिङोप-स्थापनात् तत्रैव तिङर्थे व्युत्पत्तिवैचित्र्येण सुबर्थस्याधेयत्वस्या-न्वयादतएव पलाशादे: शरत्कालीनपुष्पस्य वसन्ताद्यवच्छेदेनो-त्पत्तिमत्त्वेऽपि शरदि पुष्पन्ति पलाशा इत्यादिको न प्रयोग:। शरदि पुष्पन्ति पद्मिन्य इत्यादिकस्त्विष्यतएव। शरदि सुन्दर-श्चन्द्रमा इत्यादावपि शरदादिकालवृत्तित्वबोधिका सप्तमी कालसप्तम्येव। शरदि पुष्पन्तीत्यत्र कालसप्तम्या उत्पत्तिरर्थ-स्तिङस्त्वारम्भकत्वं तथाच शरदुत्पत्तिकस्य पुष्पस्यारम्भका: सप्तच्छदा इत्याकारस्तत्र बोध इति तु प्राञ्चस्तच्चिन्त्यम्।

गोषु दुह्यमानासु आगत इत्यत्र गवाद्यभेदान्वयसाकाङ्क्षकालार्थककृदन्तं यन्नाम तदुत्तरभावसप्तम्यास्तादृशकृदन्त नामप्रवृत्तिनिमित्तीभूतं वर्त्तमानकालवृत्तित्वमर्थः पाचकत्वमित्यादाविव प्रकृतेऽपि शब्दबोध्यतावच्छेदकत्वेन तस्य भावत्वात् तथाच गवाभिन्नानां वर्त्तमानदोहनकर्मणां सम्बन्धिनि वर्त्तमानकाले आगत इत्याकारस्तत्र बोधः गवां तत्कालवृत्तिदोहनकर्मणां सम्बन्धिनि तत्काले आगत इति तु फलितार्थः सर्वसाधारणस्य वर्त्तमानत्वस्यासत्त्वात् गोषु दुग्धास्वागत इत्यत्र गवाभिन्नानां वर्त्तमानध्वंसप्रतियोगिदोहनकर्मणां सम्बन्धिनि तत्तत्काले, गोषु दोग्धव्यासु आगत इत्यत्र गवां विद्यमानप्रागभावप्रतियोगिदोहनकर्मणां सम्बन्धिनि तादृशकाले आगत इत्याकारः। नष्टेषु गोषु आगत इत्यादौ वर्त्तमानकालस्य नष्टाधिकरणत्वाभावेऽपि यथाकथञ्चित् सम्बन्धित्वमवतमेव। "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे"। "भुक्तवत्सु च विप्रेषु पिण्डान् दर्भेषु निर्वपेत्" इत्यादावप्युक्तदिशैव भावसप्तम्यर्थो बोध्यः। पाचकादिकं कृदन्तमपि न कालार्थककृदन्तं कालार्थकप्रत्ययान्तदृष्टचरादिकं न तदर्थककृदन्तमतश्चैत्रेषु पाचकेषु व्रजति। मैत्रेषु दृष्टचरेषु पश्यतीत्यादिको न प्रयोगः। स्तोकं मैत्रस्य गते तिष्ठतीत्यादौ स्तोकाद्यभिन्नस्य मैत्रीयातीतगत्यादेः काले तिष्ठतीत्येवमन्वयस्यावोधे कारककृदन्तबोध्यतावच्छेदक एव वर्त्तमानकालो भावपदार्थो वाच्यः। निरुक्तश्चायं भावसप्तम्यर्थो धात्वर्थ एवान्वेति न तु नामाद्यर्थे तथैव साकाङ्क्षत्वात् अतएव घटादेर्दुह्यमानगवाधिकरणवर्त्तमानकालवृत्तित्वेऽपि गोषु दुह्यमानासु घट इत्यादिको न प्रयोगः यत्तु गोषु दुह्यमानासु आगत इत्यादौ पूर्वस्याः सप्तम्याः कर्मत्वं परस्यास्तु कालवृत्तित्वं शानजादिकृताञ्च भावविहितत्वादकर्त्त-

मानादिकालमात्रं तादृश्येणार्थस्तेन गोकर्मकवर्त्तमानदोह कालवृत्त्या गतिमानित्याकारस्तत्र बोध इति तत्तुच्छं गोदु मानयोरभेदबोधस्यापलापापत्तेः भावक्तान्तनाम्नो नपुंसक नियमात् गोषु दुग्धासु इत्यादौ स्त्रीलिङ्गाद्यनुपपत्तेः गोषु चैत्रे दुग्धास्वागत इति वद्गोषु चैत्रस्य दुग्धासु आगत इत्यपि प्रयोग पत्तेर्भावक्तान्तस्य कर्त्तरि तृतीयावत् षष्ठ्या अग्रे व्युत्पाद्यत सप्तम्याः कर्मादिवाचितायामनुशिष्टेरसत्त्वेन प्रमाणाभाव गोषु यान्तीषु गच्छतीत्यादौ कर्त्तर्य्येवानुशिष्टस्य शतृप्रभृते भ विधानायोगाच्चेति दिक्।

"हन्तेः कर्मण्युपष्टम्भात् प्राप्तुमर्थे तु सप्तमी। चतुर्थी बाधिकामाहुरृषिभागुरिवामभटाः" स इति भर्त्तृहरिलेखात् चर्मणि द्वीपिनं हन्तीत्यत्र चर्म प्राप्तुं द्वीपिनं हन्तीत्यर्थः चर्मणि द्वीपिनं बध्नाति छिनत्तीत्यादौ द्वीपिप्रभृतिकं न हन्तेः कर्म वित्ताय विप्रं हन्तीत्यादौ हन्तेः कर्मणि विप्रादौ संयुक्तम वित्तादिकं न तदुपष्टब्धं, दन्तकेशत्वगादिष्वेव प्राणिनामुपष्ट भात्यसंयोगस्योपगमादतएव हस्तं प्राप्तुमित्यर्थे हस्ते हरि हन्तीत्यादिको न प्रयोगः समवायिना सम द्रव्यस्य तदभावात् "मुक्ताफलाय करिणं हरिणं पलाय सिंहं निहन्ति भुजविक्रम सूचनाय। का नीतिरीतिरियती रघुवंशवीर। प्राणार्थ जरति यस्तव वाणमोचः" इत्यादौ तु करिण्युपष्टम्भमा मुक्ताफलं प्राप्तुमिति नार्थः किन्त्वाहर्त्तुमित्यादि।

उपरागे स्नानं विवाहे श्राद्धमित्यादौ स्नानादावुपरागादि जन्येष्टजनकत्वलक्षणमुपरागादिनिमित्तकत्वं सप्तम्या बोध गोवधे प्रायश्चित्तमित्यादौ तु दुरितनाशकत्वेन विहित रूपस्य प्रायश्चित्तत्वस्यैकदेशे दुरितादौ गोवधादिजन्यत्वलक्ष तन्निमित्तकत्वम्।

तदेवं सामान्यतो विशेषतश्च सुपं निरूप्य क्रमप्राप्तां तिङं
वयति विभजते च।

स्वेतरप्रथमान्तस्य नाम्नोऽर्थे बोधनक्षमाः।
प्रत्ययाः स्वार्थसंख्याया लिङो दशविधाश्च ताः॥

स्वभिन्नप्रथमान्तस्य नाम्नोऽर्थे स्वार्थसंख्याबोधं प्रति समर्थाः
प्रत्यास्तिङ उच्यन्ते प्रथमा तु प्रथमान्तस्य नाम्नोऽर्थं संख्या-
भिधापि न स्वेतरप्रथमान्तस्येति तद्व्युदासः चैत्रस्तथेत्यादौ
र्थैकत्वबोधकोऽपि तथादिनिपातो न प्रत्ययः। ताश्च
ङो लड्लोड्लिङ्लङ्लुङलिङ्लुङाशीर्लिङ्लृङ्लृङ्भेदेन
शविधाः।

ननु चैत्रः पचतीत्यादौ प्रथमयैवान्यत्र कर्तृसमभिव्याहृतया
त्रादेरेकत्वाद्यवगमादाख्यातस्य संख्यावाचित्वे मानाभावः
तो मैत्रश्च गच्छत इत्यादावपि चेनेव निपातेनोपस्थितस्य
त्वादेश्चैत्रमैत्रादावनुभवात्। न च तथाद्युपस्थाप्यधात्वर्था-
च्छिन्नकर्तृत्वादेर्विशेष्यविधयान्वयबोधं प्रत्यवश्यं तसादिसमान-
वनप्रथमान्तनामोपस्थाप्यत्वं तन्त्रमन्यथा पचतः पचन्ति
चैत्र इत्यादितोऽपि चैत्रादौ पाककर्तृत्वादेरन्वयबोधापत्तेः
था चोक्तस्थले तिङर्थसंख्याया अन्वयधीरेव न भावनाविशेष्य
न तिङः स्वार्थसंख्याबोधकत्वस्य वाच्यत्वादिति वाच्यं द्वित्वाद्य-
वच्छिन्न एव नामार्थे तसादिना धात्वर्थविशिष्टस्वार्थान्वय-
धने तत्समानवचनान्तनामोपस्थाप्यत्वस्य तन्त्रत्वात्तदव-
च्छिन्ननामार्थे तु तसादिना तादृशस्वार्थबोधने प्रथमान्तनामो-
स्थाप्यतामात्रस्य तन्त्रत्वादत एव स च त्वञ्च गच्छथः स च
त्वाहञ्च गच्छाम इत्यादौ युगपन्नानापुरुषेषु अपि एकक्रिया-
न्वयस्थले सुबाख्यातयोर्न वचनैक्यादरः। अस्तु वाख्यातस्य द्विव-
नादेर्द्वित्वादिवाचकत्वं तथापि तदेकवचनस्य नैकत्ववाचित्वं

मानाभावात् सुपामेकत्वाशक्तत्वपक्षदशायां तिपा चैत्रादावेक-त्वानुभवस्य सन्दिग्धत्वादन्यथा तिङः कर्तृत्वाद्यशक्तत्वबोधदशा-यामपि चैत्रः पचतीत्यादितः पाककर्तृत्वादेश्चैत्रादावन्वयानु-भवानुरोधेनाभिहिताधिकारीयप्रथमायाः शपादेर्वा कर्तृत्वादि-वाचितापत्तेः न चाख्यातैकवचनान्येकत्वशक्तान्येकवचनत्वादि-त्येवमनुमानं मानमप्रयोजकत्वात् स्वमटादिसमान्यतमत्वं सुत्वामत्वादिसमानां प्रत्येकं वा धर्ममपेक्षातिगुरोः स्वादिति-वादिसमषष्ठान्यतमत्वरूपस्यैकत्वशक्ततानवच्छेदकत्वात् सुत्वादि-प्रत्येकरूपेण ज्ञातादुपस्थिताया एवैकत्वादिसंख्यायाः शाब्द-मतावनुप्रवेशाच्च । यत्तु केवलादपि पचतीत्यतः पक्त्रेकत्वबो-धानुभवादाख्यातैकवचनस्यापि संख्यावाचित्वं शक्त्या निरूढ-लक्षणया वा तिपा कर्तृरूपस्थापनादिति तत्तुच्छम् आख्या-तस्यैकत्वशक्तिवादिनामपि धात्वर्थान्वितस्वार्थान्वयिन्येव स्वार्थ-संख्याबोधकत्वव्युत्पत्तेर्वक्तव्यत्वात् अन्यथा चैत्रः पचतीत्यादौ सुपा चैत्रादौ तिपा च पक्तर्य्येकत्वबोधनेऽनुभवबाधितस्य द्विविधैकत्वभानस्य दुर्वारतापत्तेः ।

अस्तु वा तत्र यथा तथा, तथापि मत्स्यण्डी फाणितं खण्डविकारौ, देवो ब्रह्म विबुधावित्यादौ स्वप्रकृत्यर्थभिन्नेऽपि मत्स्यण्डीप्रभृतौ सुपो द्वित्वादिबोधकत्वात् । तस्यामति-व्याप्तिरेवातो निरुक्तयन्तरमाह ।

स्वेतरार्थयुतस्वार्थावच्छिन्नार्थविशेष्यके ।
शाब्दे स्वरूपायोग्यो वा प्रत्ययस्तिङिति स्मृतः ॥

तिवाद्याः साधोतिशतं पदार्थान्तरविशिष्टस्वार्थावच्छिन्नाव-गाहिताकं शाब्दं प्रति स्वरूपायोग्याः पचंश्चैत्रो गच्छतीत्या-दित इव पचति चैत्रो गच्छतीत्यादितो जातमपि प्रकृत्वाद्यव-

च्छिन्नधर्मिकान्वयमतेरनुत्पादात् धात्वर्थावच्छिन्नस्वार्थविधेयतांशे तत्तुल्ययोगक्षेम एव चान्वयबोधे तिङः स्वरूपयोग्यत्वादत एव चैत्रः पचतीत्यत्रेव चैत्रो न पचति पचत्येव पचतीत्यादौ निपातार्थे निषेधादौ विधेयतावच्छेदकत्वेन तिङर्थस्य कृत्यादेर्बोधो न तु सर्वत्र चैत्रः पचति पुरुष इत्यादितस्त्वादौ पचत्पुरुषादेरबोधात् सुबाद्यास्तु प्रत्ययाः पीतः पाराशर्थ्यः पाचकः पिपक्षुर्वा पुरुषस्तिष्ठतीत्यादौ प्रकृत्यर्थविशिष्टे स्वाद्याश्रयत्वादिस्वार्थैरवच्छिन्नपुरुषादिधर्मिताके एव शाब्दे स्वरूपयोग्यास्वादयस्तु निपाताः पदार्थान्तरविशिष्टस्वार्थावच्छिन्नविषयताकबोधं प्रति असमर्था अपि न प्रत्ययाः।

"यो यः शूद्रस्य पचति द्विजोऽन्नं सोऽतिनिन्दित" इत्यादौ वीप्सादिसमभिव्याहारात् यदि शूद्रान्नपक्तृद्विजत्वाद्यवच्छेदेन निन्दितत्वादेरन्वयस्तदोक्तनियमस्याव्यभिचारत आह।

धात्वर्थेन विशिष्टस्य विधेयत्वेन बोधने।
समर्थः स्वार्थयत्नस्य शब्दो वाख्यातमुच्यते॥

धात्वर्थावच्छिन्नस्वार्थयत्नविधेयताकान्वयबोधसमर्थः शब्दो वाख्यातं तदेव च तिङित्यर्थाल्लभ्यते तिङाख्यातयोः पर्य्यायत्वात्। पाकश्चैत्रस्येत्यादौ नामार्थेनेव विशिष्टस्य स्वार्थकर्तृत्वस्याभिधायकः षष्ठ्यादिको न तु धात्वर्थेन विशिष्टस्य। चैत्रः पचतीत्यादौ धात्वर्थावच्छिन्नस्य यत्नस्य विधेयतया बोधकावपि नामधातू न स्वार्थस्य। चैत्रः पाचक इत्यादौ तु धात्वर्थविशेषितस्य यत्नस्य न विधेयत्वं किन्तु कर्त्तुरेव। कृतां धर्मिशक्तत्वादन्यथा पाचको भुङ्क्ते इत्यादिकमयोग्यं स्यात् स्याच्च गुणः पाचक इत्यादिकं योग्यमिति प्रातिपदिकार्थयोः पक्तृत्वचैत्रयोर्भेदेनान्वयस्याव्युत्पन्नतया कृदर्थकृतेश्चैत्रादावन्वयायोगाच्च। अयं पक्तुं काल इत्यादौ तुमादिना धात्वर्था-

वच्छिन्नोऽनुकूलत्वादिः इयं चिकीर्षेत्यादौ च श्रमादिनेच्छादिरेव विधेयत्वेनानुभाव्यते इति न तेषु अतिप्रसङ्गः। अत्रेदं तत्त्वम्। जीवनयोन्यादिनिखिलयत्नगतं यत्नत्वमेव तिङः शक्यतावच्छेदकं न तु चेष्टाया जनकत्वस्य चिकीर्षाया वा जन्यत्वस्यावच्छेदकतया सिद्धं प्रवृत्तित्वं चैत्रो निःश्वसितीत्यादितोऽपि श्वासाद्यनुकूलप्रयत्नस्य प्रतीतेः तिङर्थकृतौ च धात्वर्थस्य तं करोमीति प्रतीतिनियामकः साध्यत्वाख्यविशेष्यताप्रभेदस्तद्विशिष्टं फलोपधायकत्वलक्षणमनुकूलत्वं वा संसर्गमर्य्यादया भासते तथैव साकाङ्क्षत्वादतो गत्यादिगोचरनिवृत्तिदशायां गच्छतीत्यादिको न प्रयोगः तत्र निःश्वासवत्त्वमात्रप्रतीतावपि प्रयत्नत्वमेव तिङः शक्यतावच्छेदकं न तु प्रवृत्तित्वं पचतीत्यतः पाककृतिमानिति प्रतीतेः न हि प्रवृत्तित्वमेव कृतित्वं पाके निवृत्तोऽस्मीत्यस्येव पाके प्रवृत्तोऽस्मीत्यस्याप्यनुभवस्य पाकं करोमीत्यतो विषयवैलक्षण्यस्य सर्वसिद्धत्वात्। नित्यकृतौ रागप्रयोज्यस्य प्रवृत्तित्वस्य बाधादीश्वरः करोतीत्यादिवाक्यस्य योग्यतापाताच्च निविड़निखातस्थस्तु पुरुषः समुत्थानगोचरप्रयत्नवानपि न तदुपधायकप्रयत्नवान् अतस्तत्रायमुत्तिष्ठतीत्यादिको न प्रयोगः। नचैवमीश्वरः पचतीत्यपि स्यात् तस्यापि पाकानुकूलप्रयत्नवत्त्वादिति वाच्यं तिङर्थकृतेरवच्छेदकत्वेनैव संसर्गेण नामार्थेऽन्वयस्य व्युत्पन्नत्वादङ्गुलौ पचतीत्यादिप्रयोगस्येष्टत्वादन्यावयविनिष्ठावच्छेदकत्वस्यैव तादृशतिङर्थकृतेः संसर्गत्वे क्षत्यभावाच्च। नित्यप्रयत्नव्यावृत्तस्यैवानुकूलत्वविशेषस्य तिङर्थकृतौ धात्वर्थस्य संसर्गत्वमित्यप्याहुः। ईश्वरो जानातीच्छति रथो गच्छतीत्यादौ च ज्ञानादिमत्त्वमात्रप्रतीतेः समवायित्वे, चैत्रो जानातीत्यादाववच्छेदकत्वे, वह्निरवगाहते घटोभासत इत्यादौ दैशिकाश्रयत्वे, नश्यतीत्यादौ च प्रतियोगित्वे,

तिङो निरूढलक्षणाकृतित्ववदाश्रयतात्वादेरखण्डत्वे तदवच्छिन्नेऽपि तिङः शक्तिरेव। इत्यादिकस्त्वेषयवः प्रयत्नस्यैवावच्छेदको न तु ज्ञानेच्छादेरपि प्रमाणाभावादतः करो जानातीत्यादिको न प्रयोगः। प्रागुक्तैव वा रीतिरत्रापि। पयः पतति स्यन्दते इत्यादावपि पतनादेः समवायित्वमेव तिङानुभाव्यते न तु तदनुकूलगुरुत्वद्रव्यत्वादि येन कृतितुल्यशरीरेषु तेष्वपि तिङः शक्तिरापद्यते। पटानां शतं पततीत्यादौ च शतपदार्थस्यैकदेश एव शतत्वसंख्यायां षष्ठ्यर्थपर्थ्याप्तेरन्वयात् संख्यायाः पतनादिसमवायित्वविरहेऽपि न क्षतिः पटानां शतं संख्येत्याद्यनुरोधेनैव शतादेर्गुणवाचित्वसम्भवात्।

ननु कृत्यादिकं नाख्यातस्यार्थः किन्तु कालः संख्या च तयोः प्रकारान्तरालभ्यत्वात् चैत्रः पचति रथो गच्छतीत्यादौ धात्वर्थस्यैव पाकगत्यादेः कृतिमत्त्वाश्रयत्वादिसम्बन्धेन चैत्रादौ प्रकारत्वात् मैत्रः पच्यत इत्यादितो मैत्रादेः कर्तृत्वादिना तण्डुलः पचतीत्यादौ तण्डुलादेः कर्मत्वादिना संसर्गेण पाकादावनन्वयेन धात्वर्थ एव धर्मिणि नामार्थस्य भेदेनान्वयोऽव्युत्पन्नो न तु नामार्थेऽपि धात्वर्थस्य। नचैवं ज्ञानं चैत्र इत्यादितोऽपि बोधरूपस्य धात्वर्थस्याश्रयत्वसम्बन्धेन चैत्रे धर्मिण्यन्वयप्रसङ्गस्तत्र ज्ञानादिपदस्य बुद्ध्यर्थकनामतया तदर्थस्य नामान्तरार्थे भेदेनान्वयस्याव्युत्पन्नत्वादेव तदसम्भवात् इति प्राभाकराः। तदसत् धात्वर्थान्वयिस्वार्थकर्तृतायामेव लडादेः स्वोपस्थाप्यवर्त्तमानत्वाद्यनुभावकत्वव्युत्पत्तेः कृत्यादेस्तिङर्थत्वं विना तदनुपपत्तेः अन्यथातिप्रसङ्गात्। न च प्रकृत्यर्थ एव तिङां स्वार्थवर्त्तमानत्वाद्यनुभावकत्वनियमः पाकं निष्पाद्य क्रियान्तरव्यासक्तेऽपि पुरुषे पचतीति प्रयोगापत्तेः तदानीमपि पाकस्यानुवर्त्तमानत्वात् तिबाद्यन्तधात्वर्थस्य पाकादेर्वर्त्तमान-

कृत्यादिसम्बन्धेनैव प्रथमान्तस्य नाम्नोऽर्थे साकाङ्क्षत्वात् नैवमिति चेत् किं कालस्यापि तिबर्थत्वप्रत्याशया संसर्गविधयैव तस्य लब्धत्वात् पचतीत्यादितो वर्त्तमानत्वादिप्रकारकप्रतीतेरानुभविकत्वाच्च। किञ्च धात्वर्थस्यैव कृत्यादिसम्बन्धेन चैत्रादावन्वये पचत्यपि चैत्रे नायं पचतीति प्रयोगप्रसङ्गः संयोगादिसम्बन्धेन पाकाद्यभावस्य तत्र सत्त्वात् कर्त्तृत्वादेर्वृत्त्यनियामकतया तत्सम्बन्धावच्छिन्नपाकाद्यभावस्यालीकत्वेन प्रत्येतुमशक्यत्वात्। एतेन मण्डनमते फलस्य धात्वर्थत्वात् तदनुकूलक्रियैवाख्यातेन चैत्रादावनुभाव्यत इति कृतेस्तदर्थत्वाभावादुक्तलक्षणमसम्भवीत्यपि प्रत्युक्तं फलस्य धात्वर्थत्वे संयोगो गुण इतिवत् गतिर्गुणोऽनेकाश्रितेत्यादिप्रयोगापत्तेश्च न हि भावकृतामपि क्रियार्थः प्रमाणाभावात्। ननु यदि स्वार्थकर्त्तृत्व एव लड़ादिना वर्त्तमानत्वमनुभाव्यते इति नियमः कथं तर्हि केवलात् पच्यत इत्यादितः पाकादौ वर्त्तमानत्वधीरिति चेत् क एवमाह तत्राप्येकपदोपात्तत्वेन कर्माख्यातोपस्थापिते कर्त्तृत्व एव वर्त्तमानत्वस्यान्वयात्। इयान् परं विशेषो यत् कर्त्तृविहितेन लटा धात्वर्थस्य विशेष्यत्वेन, कर्मविहितेन तु तस्य विशेषणत्वेन, स्वार्थकर्त्तृत्वमनुभाव्यते तथैव साकाङ्क्षत्वात्। एतेन चैत्रेण पक्कमित्यादाविव चैत्रेण पच्यते इत्यत्रापि तृतीययैव कर्त्तृत्वमनुभाव्यते न त्वाख्यातेन तिङर्थकृतेर्धात्वर्थविशेष्यत्वनियमादिति दीधितिकृन्मतमप्यनादेयम् एकपदोपात्तत्वेन स्वार्थएव कर्त्तृत्वे शतृशानजादेरिव लड़ादेर्वर्त्तमानत्वबोधकतया सुबर्थकृतौ तदन्वयासम्भवात् सुबर्थे तिङर्थान्वयस्यादृष्टचरत्वाच्चेति।

शाब्दिकास्तु चैत्रः पचतीत्यादितः पाकादिकृतिमत्तयैव तत्कर्म भेदेनापि चैत्रादेरन्वयस्यानुभविकत्वात् कृतिरिव

कर्त्तापि तिङर्थः कृतित्वमपेक्ष्य कर्तृत्वस्य गुरुत्वान्न तदाख्यातस्य शक्यतावच्छेदकमिति तु रिक्तं वचः लक्ष्यतावच्छेदके लक्षणाया इव शक्यतावच्छेदकेऽपि शक्तेरसत्त्वमते तद्गुरुत्वस्याकिञ्चित्करत्वात् एकैकात्मनिष्ठानामनन्तकृतीनां शक्यत्वमपेक्ष्य निखिलात्मनामेव कर्तृत्वेन शक्यतायां विपरीतलाघवाच्च। न च कर्त्रनुभवजनकतया सङ्केतितत्वरूपं कर्तृशक्तत्वमेव तिङामसिद्धं कर्त्रन्वयानुभवजनकतासत्त्वे तत्प्रकारकेश्वरसङ्केतस्य तत्रावश्यम्भावादीश्वरेच्छायाः सदर्थावगाहित्वनियमादन्यथा कर्त्रनुभवस्वरूपायोग्यत्वादेव तिङां कर्त्तर्यशक्तत्वसम्भवे कृत्यपेक्षया कर्त्तरि गुरुत्वोपन्यासस्योन्मत्तप्रलपितत्वापत्तेः। अथैवं पटपदस्यापि लक्षणादिना घटाद्यन्वयानुभावकत्वात् तत्प्रकारकनित्यसङ्केतवत्त्वेन तदपि घटशक्तं स्यात् न स्यात् पटपदं घटे न शक्तमित्यादिव्यवहारस्य प्रामाणिकत्वेन घटादिपदनिष्ठस्यैव घटानुभावकतया नित्यसङ्केतितत्वस्य घटशक्तित्वात् इत्याख्यातं न कर्तृशक्तमित्येवं व्यवहारस्यासत्त्वात् प्रत्युत पाणिन्यादिप्रामाणिकैस्तिङः कर्तृशक्तत्वेन व्यवहृतत्वात्। एतेन गुणवचनस्य नीलादेर्गुणशक्तत्वमपि व्याख्यातम्। यत्तु यस्य नाम्नोऽर्थे विशेषणत्वेन तिङा स्वार्थः कर्त्तानुभाव्यते तस्योक्तार्थत्वात् प्रथमान्तत्वमपेक्षितं यस्य च नाम्नोऽर्थे विशेष्यविधया तस्यानुक्तार्थत्वात् तृतीयान्तत्वमित्युक्तानुक्तत्वलीयसुपो व्यवस्थार्थमवश्यं कर्त्तुराख्यातवाच्यता इति तन्न यस्य नाम्नोऽर्थे तिङा स्वार्थः कृतिरुक्तादिशानुभाव्यते तत्रैव प्रथमातृतीययोरपेक्षत्येवमभिहिताधिकारीयसुपां व्यवस्थासम्भवादिति प्राहुरित्यास्तां विस्तरः।

तिङ्सु लटं लक्षयति विभजते च।

अयोगाभावतः स्वार्थातीतत्वानवबोधिका ।
बहियं पदभेदेन द्विविधान्या अपीदृशः ॥

यादृशतिङः स्मशब्दोपसन्धानाभावप्रयुक्तः स्वार्थातीतत्वबोधकत्वाभावस्तादृशो तिङ् लङुच्यते । इयञ्च परस्मैपदात्मनेपदभेदेन द्विविधा । अन्या लोड़ाद्या अपि तिङः ईदृशो द्विविधाः इत्यवान्तरभेदः संक्षेपार्थमेकग्रन्थेनोक्तः । जानाति जानीते पचति पचते इत्यादौ तिवादीनामष्टादशानामपि स्मशब्दोपसन्धानाभावप्रयुक्तो ज्ञानादिधर्मिकातीतत्वबोधस्योपधायकत्वाभावस्तदुपसन्धाने जानाति स्मेत्यादितस्तथानुभवात् । जानीयादित्यादौ लिङादेर्लक्षणादिना स्वोपस्थाप्यस्यातीतत्वस्यानुभावकत्वाभावो न स्मशब्दसन्दंशाभावप्रयुक्तः सत्यपि तत्सान्निध्ये जानीयात् स्मेत्यादितस्तादृशबोधानुत्पत्तेः । द्विरुक्तधात्वनाकाङ्क्षत्वेन प्रकृत्यर्थे परोक्षत्वनिराकाङ्क्षत्वेन वा विशेषणीयं नातो बुभुजे बुभुजाते इत्यादिस्थलीयलिट्यतिप्रसङ्गः । आख्यातसामान्यस्य च वर्त्तमानत्वमर्थः तद्धि पचतीत्यादौ धात्वर्थे तदनुकूल स्वार्थकृत्यादौ वा लड़ादिनानुभाव्यते अपचत् पक्ष्यतीत्यादौ तु लङ् लृडादिभिः स्वार्थयोरेव ध्वंसप्रागभावप्रतियोगित्वयोरेकदेशे ध्वंसादौ अन्यथा वर्त्तमानध्वंसाद्यन्तर्भावेन तासु शक्त्यन्तरकल्पने महागौरवापत्तेः । सम्प्रति पचतीत्यादौ सम्प्रतिलटोः समभेदान्नैकतरवैयर्थ्यम् । इदन्तु बोध्यं वर्त्तमानत्वमत्र न कालवृत्तित्वं कृतपाकेऽप्ययं पचतीति प्रयोगापत्तेः परन्तु तत्तत्कालवृत्तित्वमनन्तमेव गौरवस्य प्रामाणिकत्वादित्यञ्च प्रागुक्तस्य पश्चादुच्चार्य्यस्य च पचतीत्यस्य भूतभावितत्तत्कालवृत्तित्वेन पाकादेरनुभावकत्वानुरोधाल्लटः तत्र शक्तेरावश्यकत्वादिदानीमुच्चरितस्यापि पचतीत्यस्य भूतभावितत्तत्कालवृत्तित्वेन पाकाद्यनुभावकत्वापत्तिरतस्तत्तदाख्यात-

जन्यायां तत्तत्कालवृत्तित्वेन क्रियाद्यन्वयबुद्धौ तत्तदाख्यातस्य तत्तत्कालोच्चरितत्वं तत्तदाख्यातधर्मिकतत्तत्कालवृत्तित्वज्ञानं वा नियामकं वाच्यम् अतएव श्रूयमाणाख्यातव्यक्तेरेवातीतादि-कालोच्चरितभ्रमदशायामिदानीन्तनादपि पचतीति प्रयोगा-दतीतादितत्तत्कालवृत्तित्वेन पाकादेः सर्व्वजनसिद्धो बोधः सङ्गच्छते। न च पचत्यपि चैत्रे नायं पचतीति प्रयोगः स्याद्वर्त्तमानायाः पाककृतेरभावस्य समयान्तरावच्छेदेन चैत्रे सत्त्वादिति वाच्यं तत्र नञर्थएव लडर्थ वर्त्तमानत्वस्यान्वयेन वर्त्तमानकालावच्छेद्यस्य पाककृत्यभाववत्त्वस्य चैत्रे बाधेन तदसम्भवात् गुरुमते न कलञ्जं भक्षयेदित्यादावस्मन्मतेऽप्यति रात्रे षोड़शिनं न गृह्णाति इत्यादौ नञर्थेऽपि तिङर्थान्वयस्य व्युत्पन्नत्वात्। एतेन भाविदिने चैत्रो नापाक्षीदतीतदिने चैत्रो न पक्ष्यतीत्यपि स्याद्भाविदिनादौ चैत्रेऽतीतपाककृत्यादेर-भावसत्त्वादित्यपि समाहितं तत्राप्यतीतादिकालस्य नञर्थ एवान्वयेनातीतादिकालावच्छेद्यत्वविशिष्टस्य पाककृत्यभावस्य भाव्यादिदिनावच्छेदेन चैत्रादावसत्त्वादेव तादृशाप्रयोगात्। अतएव च निष्पन्नं न पक्ष्यतीत्यादौ निष्पन्नान्नकर्म्मकभावि-कृतेरप्रसिद्धावपि न क्षतिः भविष्यत्कालावच्छेदेन तादृशान्न-कर्म्मकपाककृतेरभावस्यैव तत्र बोध्यत्वादिति युक्तमुत्पश्यामः। क्वचिद्वर्त्तमानसामीप्यमपि लटोऽर्थः तच्च द्विविधं वर्त्तमान-क्षणोत्तरकालावच्छेद्यत्वं तादृशक्षणाव्यवहितप्राक्कालाव-च्छेद्यत्वञ्च तेन चैत्रः कदा गमिष्यतीति जिज्ञासायामेष गच्छ-तीत्युत्तरस्य वर्त्तमानक्षणोत्तरकालावच्छेद्यगतिमांश्चैत्र इत्यर्थः। चैत्रः कदा समागत इति जिज्ञासायामेष आगच्छतीत्युत्तरस्य वर्त्तमानक्षणाव्यवहितप्राक्कालावच्छेद्यागमनवान् इति न प्रश्नोत्तरभावासङ्गतिः।

लडादेः पदभेदेनोद्दिष्टं द्वैविध्यं निर्वक्ति ।

धातोरर्थस्य कर्तृत्वबोधकं स्वजयङन्तयोः ।
परस्मैपदमाख्यातमात्मनेपदमेव च ।

क्यजन्तधातोरर्थस्य स्वार्थे कर्तृत्वेऽन्वयबोधनक्षमं यादृशमाख्यातं तत्परस्मैपदं पुत्रीयतीत्यादावेव पुत्रादीच्छाकर्तृत्वमाश्रयत्वलक्षणं बोध्यते न तु पुत्रीयते इत्यादौ इच्छार्थस्य क्यचो निवेशात् चिकीर्षते इत्यादौ आत्मनेपदेऽतिप्रसङ्गः समपद्यत घातिता घातितारावित्यादावात्मनेपदानां निरुक्ताख्यातत्वेऽपि तदन्यत्वेन विशेषणान्न प्रसङ्गः। यङन्तस्य धातोरर्थस्य स्वार्थकर्तृत्वबोधनक्षममाख्यातमात्मनेपदं चैत्रः पापच्यते इत्यादिकमेव पौनः पुन्यविशिष्टस्य पाकादेः कर्तृत्वं बोधयति न तु पापच्यतीत्यादिकं बोभवीतीत्यादौ तु यङो लुकि धातोर्न तदन्तत्वं श्रुतिगर्भत्वादिहान्तत्वस्य पचतामित्यादौ परस्मैपदस्य वारणं पूर्ववत्। अत्रोभयपदिधातूनां यत्र क्रियाफलं कर्तृनिष्ठं तत्रात्मनेपदं यत्र च कर्तृभिन्ननिष्ठं तत्र परस्मैपदं साधु स्वरितञितः कर्त्रभिप्राये क्रियाफले इति सूत्रेण कर्तारमभिप्रैति सम्बध्नातीति व्युत्पत्त्या कर्तृसम्बन्धे क्रियाफल एवात्मनेपदस्य विधानात्। अतएव स्वरितञित्ण्यन्तधातूनां कर्तृनिष्ठे क्रियाफले। आत्मनेपदमुद्दिष्टं तदनिष्ठे पदान्तरमित्यापिशलीयाः पठन्ति। तदनुसृत्यैव दानादिस्थले स्वगते फले दत्ते इत्येवं परगते तु ददातीत्येववाक्यं प्रयुञ्जते वृद्धाः। स्वर्गकामो यजेत इत्यादौ च सामान्यतः श्रुतमपि फलं कर्तृनिष्ठमेव शास्त्रदेशितं फलमनुष्ठातरीति मीमांसयोत्सर्गतस्तया कल्पनादिति प्राञ्चः। चिन्तामणिकृतस्तु यत्र क्रियाफले कर्तुरभिप्राय इच्छा तत्रैवात्मनेपदमिति सूत्रार्थस्तेन याजकाद्यैर्दक्षिणादिलाभेच्छयैव यागादिकरणे

यजन्ति याजकाः पठन्ति पाठकाः इति परस्मैपदं परगतस्यापि ग्रामादिफलस्येच्छया तत्करणे तु यजन्ते याजका इत्यादिकः साधुरेव प्रयोगोऽत एव पितृस्वर्गकामः पुष्करिण्या यजेत इत्यादावप्यात्मनेपदं धनकामो गणपतिं मोक्षकामोऽर्च्चयेद्धरिमित्यादौ च परस्मैपदं सङ्गच्छते इत्याहुः।

लोटं लक्षयति।

> स्ववक्तृनुमतत्वस्य धात्वर्थेऽन्वयबोधने।
> अनुकूला यादृशी तिङ् स्य व लोट परिभाष्यते।

करोतु कुरुतां कुर्वन्तु इत्यादौ तुप् ताम्प्रभृतयश्चैत्राद्युक्तत्वधी सहकृताः क्रत्यादौ प्रकृत्यर्थे चैत्राद्यनुमतत्वं बोधयन्ति न तु तिवाद्याः अर्थापत्तिर्गुरूणामित्यादौ षष्ठ्यानुमतत्वं न धात्वर्थेऽनुभाव्यते किन्तु कृदर्थे नवा स्ववक्तृत्वेन ज्ञातस्य। पचतो पचत्वित्यादौ अनुज्ञैव लोटोऽर्थः सा च कर्त्तुरिष्टत्वे सति वक्त्रनुमतत्वं तेन चैत्रवक्तृकताद्दृशवाक्यात् चैत्रानुमतत्वेष्टस्य पाकस्य कर्त्री पत्नीत्येवं बोधः। शूलं विश विषं भुंक्ष्वेत्यादिराजवाक्यस्थले तु नानुज्ञा प्रत्ययार्थः शूलप्रवेशादौ कर्त्तुरिष्टत्वाभावात् किन्त्वाज्ञैव सा च वक्त्रनुमतत्वे सति कर्त्तुरनिष्टहेतुत्वं तथाच राजानुमतस्वानिष्टहेतुशूलप्रवेशकर्तृतावांस्त्वमित्याकारस्तत्र बोधः। पर्वतमप्युत्पाटयानि समुद्रमपि शोषयाणीत्यादौ लोटः समर्थना अर्थः सा च पराशक्यधर्मिकस्वशक्यत्वाध्यवसायः तथा च स्वेतराशक्यं यत् पर्वतोत्पाटनं तद्धर्मिकस्वशक्यत्वाध्यवसायवान् इत्येवं तत्रान्वयबोधः। स्वीयैकार्थविशिष्टप्रकृत्यर्थान्वयिस्वार्थान्तरबोधकत्वञ्च प्रत्ययस्य नाव्युत्पन्नमिति वक्ष्यते। अस्तु वा निपातस्येवापिधात्वर्थान्वितं पराशक्यत्वमर्थः तिङस्तु स्वशक्यताध्यवसायमात्रम् अध्यवसायावधारणं क्वचिदक्काशंसनमपि लोडर्थस्तेन चैत्रोक्ता-

जीवतु भवानिति वाक्यात् चैत्राशंसाविषयवर्त्तमानजीवनवां मित्येवं तत्र बोधः। घटो नीलो भवतु भवान् सुखी भव इत्यादौ तु धातुनैव लक्षणयोपस्थापितायां नीलाद्युत्प तिक्रिया आशंसनीयत्वं प्रतीयते नामार्थस्य नीलादेर्धात्वर्थोत्प भेदेनान्वयस्याव्युत्पन्नत्वात् एवञ्चाशंसाविषयवर्त्तमाननीलो पत्तिमान्नीलो घट इत्यादिकस्तत्र बोधः। अस्तु वा नीलादि- पदसमभिव्याहारवशान्नीलादिविशिष्टस्यैव स्वस्याधिकरणसमयध्वंसा- नधिकरणसमयसम्बन्धरूपोत्पत्तिस्तत्र धात्वर्थः।

लिङं लक्षयति।

> लोड् लड्न्या विधेर्बोधसमर्था तिङ् लिङुच्यते।
> प्रवर्त्तकचिकीर्षाया हेतुधीविषयो विधिः॥

विध्यन्वयबोधः प्रति समर्थाल्लटोलोटश्च भिन्ना तिङ् लिङुच्यते। विधिस्तु नेह कृत्यात्मकं विधानमाख्यातमात्रस्यात- द्बोधसमर्थत्वात् किन्तु प्रवर्त्तकचिकीर्षायां यत्प्रकारकज्ञानस्य हेतुत्वं स तथा तादृशञ्च कृतिसाध्यत्वमिष्टसाधनत्वं बलवद- निष्टाननुबन्धित्वञ्च प्रत्येकमेव यागपाकादिधर्मिकतद्विषया- देव यागादिधर्मिकचिकीर्षोत्पत्त्या तत्र प्रवृत्तेरेवञ्च यजेत पचेतेत्यादौ यागः कृतिसाध्य इष्टसाधनं बलवदनिष्टाननुबन्धी च इत्याकारको बोधः पटमानय इत्यादौ सप्तमं पदं दद्याती- त्यादौ च विधिं बोधयन्त्यावपि लोट्लटौ न ताभ्यां भिन्ने यष्टव्यं देयमित्यादौ तु तव्यादिकं कार्य्यत्वादिकं बोधयदपि न तिङ्भावित्वाद्यप्रत्ययकत्वेन विशेषणाच्च पच्यादित्यादावाशी- र्लिङि न प्रसङ्गः। यद्यपीदानीन्तनस्वकृतिसाध्यताज्ञानस्यैव प्रवर्त्तकत्वमन्यथा स्वस्यैव कालान्तरीणायाः परस्य चेदानीन्तन्याः कृतेः साध्यताग्रहादपि प्रवृत्त्यापत्तेः तथाच इदानीन्तनस्वकृत- त्वाभावेनापि लिङः शक्त्यापत्तिरतः प्रवर्त्तकज्ञानप्रकारत्वं तदा-

योजकं तथापि पङ्गुः समुद्रं न तरेदित्यादौ नञादिना समुद्र-
रणादेः पङ्गुप्रभृतिकृतिसाध्यत्वनिषेधबोधानुरोधादवश्यं कृति-
ाध्यत्वं लिङर्थः तथा तृप्तिकामो जलं न ताडयेदित्यादौ
ृप्तिकामेष्टसाधनत्वस्य न कलञ्जं भुञ्जीतेत्यादौ च कलञ्जभक्ष-
ादेः बलवदनिष्टाजनकत्वस्य निषेधानुपपत्त्या इष्टसाधनत्वादि-
कमपि। नचाहोरात्रावच्छेद्यभोजननिवृत्तिरूपस्योपवासस्य
ृत्यसाध्यत्वादष्टम्यामुपवसेदिति विधेर्बाधः कृत्यधीनसमय-
म्बन्धरूपस्य चैमिककृतिसाध्यत्वस्य नित्येऽत्यनपायात्
ादृशप्रयोगे भोजनादिप्रतिकूलव्यापारस्यैव वा धात्वर्थत्वात्
पाकं कुर्यादित्यत्र कृतिसाध्यत्वस्य जलं ताडयेदित्यत्रेष्ट-
साधनत्वस्य श्येनेन यजेत इत्यादौ च बलवदनिष्टाजनकत्वस्य
धात्वर्थे बाधात्तत्र यथायोगमिष्टसाधनत्वादिकमेव लिङा प्रमा-
प्यते तदप्रामाण्यव्यवहारस्तु इष्टसाधनत्वादिभ्रमहेतुत्वप्रयुक्तः।
यत्तु कृतिसाध्यत्वबलवदनिष्टाजनकत्वाभ्यां विशिष्टमेवेष्ट-
साधनत्वं लिङर्थं इति तद्बोधकतया जलं ताडयेदित्यादेर-
प्रामाण्यमेव तत्र कृतिसाध्यत्वादेर्विशेष्यविशेषणभावव्यत्यासेन
गुरुतरशक्तिषट्कापत्तेः श्येनेनाभिचरन् यजेतेत्यादिश्रुतेरप्रामा-
ण्यापत्तेश्च श्येनस्य वैरिवधकामकर्त्तव्यत्वेन बलवदनिष्टस्य दुरि-
तस्यानुबन्धित्वात् न च तत्रेष्टसाधनत्वमात्रे लक्षणा तन्मतेऽपि
अगम्यां गच्छेदित्यादेः प्रामाण्यस्य दुर्वारत्वापत्तेः न विधौ
परः शब्दार्थ इत्यस्य व्याकोपापत्तेश्च। ननु बलवदनिष्टाजन-
कत्वविशिष्टेऽपीष्टसाधनत्वे लिङः शक्तिग्रहादिष्टसाधनता-
मात्रस्य श्येनादावनुभावकत्वसम्भवात् न तत्र लिङो लक्षणा
यद्रूपेणान्वयधीस्तन्मात्रप्रकारकशक्तिज्ञानत्वापेक्षया लघुत्वेन
तत्प्रकारकशक्तिज्ञानत्वेनैव तत्र हेतुत्वादत एव श्रोतव्यः
श्रुतिवाक्येभ्यः इत्यत्र स्मृत्यादिभिन्नप्रमाणशब्दत्वेन शक्तमपि

श्रुतिपदं प्रमाणशब्दत्वेन श्रुतिस्मृती बोधयन् लाक्षणिकम् अन्यथा श्रुतिपदस्य वेदमात्रपरत्वे तज्जन्यशाब्दत्वेन मुक्तिहेतुत्वे नियमादृष्टकल्पनापत्तेरिति पक्षधर्ममिश्रैरप्युक्तमिति चेन्न पङ्काद्रिपदस्यापि लाङ्गूलादिमत्तया मूषिकादिबोधने मुख्यत्वापत्तेः । स्यादेतत् इष्टसाधनत्वं यदि विध्यर्थस्तदा स्वर्गकामः पचेतेत्यादेरपि प्रमाणतापत्तेः स्वर्गकामकृतिसाध्यस्य पाकादेरोदनादिरूपेष्टसाधनत्वादिति चेन्न स्वर्गकामादिसमभिव्याहृतविधिप्रत्ययस्य स्वर्गादिरूपेष्टसाधनत्वान्वयबोधं प्रत्येव साकाङ्क्षत्वेनेष्टान्तरसाधनत्वे शक्तिसत्त्वेऽप्युक्तविधेस्तद्बोधकत्वासम्भवात् इयांस्तु विशेषो यदिष्टस्य स्वर्गत्वाद्यवान्तररूपेणैव यदि विधिवाक्याद्बोधस्तदा तादृशावान्तररूपेणैवेष्टं विधेः शक्यतावच्छेदकं नोचेदिष्टत्वेनैव अतएव विश्वजिता यजेतेत्यादौ इष्टसामान्यसाधनत्वस्यैव विधिना बोधनात् प्रवर्त्तकस्येष्टविशेषसाधनत्वावगाहिज्ञानस्य सम्पत्तये प्राच्यैः स्वर्गः फलं कल्प्यते । यत्तु साधनत्वमात्रं विध्यर्थः स्वर्गादिफलसाधनत्वन्तु स्वर्गकामादिपदसमभिव्याहारलभ्यमिति तत्तुच्छं पदानुपस्थितस्य स्वर्गादेर्विध्यर्थसाधनत्वेऽन्वयायोगात् स्वर्गकामादिवृत्तिशब्दैकदेशार्थस्य स्वर्गादेस्तत्रान्वये निराकाङ्क्षत्वात् फलाव्यवहितनियतपूर्ववर्त्तित्वविशेषात्मनः कारणत्वस्य फलगर्भतया तदनन्तर्भाव्य साधनत्वशक्तेरशक्यवचनत्वाच्च । नन्वेवं स्वर्गत्वावच्छिन्ना यावती व्यक्तिस्तत्प्रत्येकाधिकरणावच्छेदेन तत् प्रत्येकाव्यवहितप्राक्काले यद्धर्मावच्छिन्नस्य यादृशः सम्बन्धोऽन्यथा सिद्ध्यनिरूपकस्तद्धर्म एव तादृशसम्बन्धेन स्वर्गत्वाद्यवच्छिन्नं प्रति साधनत्वं वाच्यं तच्च यागादौ वाधितमप्रसिद्धं वा यागत्वादेर्निरुक्तस्वर्गाव्यवहितपूर्ववर्त्तितानवच्छेदकत्वात् दानादितोऽपि स्वर्गाद्युत्पत्तेः सत्त्वगुणत्वादेश्च तादृश

स्वर्गत्वाद्यवच्छिन्नं प्रति अन्यथासिद्ध्यनिरूपकत्वादतः कथमिष्टसाधनत्वं विधेः शक्यमिति चेत् सत्यं स्वर्गवृत्तियत्किञ्चिद्धर्मावच्छिन्नं प्रति साधनत्वस्यैव विध्यर्थत्वात् तस्य च स्वर्गवृत्तिवैजात्यविशेषावच्छिन्ना यावन्तस्तत्प्रत्येकाव्यवहितप्राक्कालवृत्तितावच्छेदकीभूतमश्वमेधत्वादिकमादायैव यागादौ सत्त्वात्। न चैवं वैध एव बोधे स्वर्गमतवैजात्यस्य भानादग्रे कल्पात्वव्याकोपः। स्वर्गवृत्ति यत्किञ्चिद्धर्मत्वेन गृहीतस्यापि वैजात्यस्य यागविशेषजन्यतावच्छेदकजातित्वादिना कल्पनस्यौदौच्यत्वात् यदि च जातित्वसामान्यलक्षणया निखिलजात्युपस्थित्यनन्तरं जातिमत्त्वप्रत्यासत्त्या जातित्वेन सकलजातिविशिष्टस्यानुभवे सत्युत्तरकाले शुद्धतत्तद्वैजात्येन विशिष्टस्य स्वर्गादेः स्मृतौ बाधकाभावः संस्कारसत्त्वेऽपि जातित्वांशस्योद्बोधकाभावेनाग्रहणसम्भवात् समानप्रकारत्वेनैव हि स्मृतावनुभवस्य हेतुत्वं न तु समानप्रकारतावच्छेदकत्वेन गौरवात् यदि वा तत्तद्वैजात्यावच्छिन्नस्वर्गादिनिरूपितसमवायेन सुखादिमत्ताज्ञानानन्तरं तादृशवैजात्यावच्छिन्नसुखस्य उपनीतभानं प्रामाणिकं संसर्गतासाधारणविशेषणविषयताकज्ञानस्यैव विशिष्टधीहेतुत्वात् इत्थमेव च शुद्धमनस्त्वादिविशिष्टस्योपस्थितौ तत्र मनःपदादेः शक्तिग्रह इति विभाव्यते तदा तत्तद्वैजात्यावच्छिन्नस्यैव स्वर्गस्य निरुक्तसाधनत्वं विधेः शक्यं शक्यग्रहमिति तदेव यागादौ लिङाद्यैरनुभाव्यतां अनुभाव्यतां वा स्वर्गप्रतियोगिकाभावप्रयोजकाभावप्रतियोगित्वलक्षणमेव स्वर्गसाधनत्वं तच्च वैजात्यावच्छिन्नप्रतियोगिताकस्यैव स्वर्गाभावस्य प्रयोजकीभूतो योऽश्वमेधत्वाद्यवच्छिन्नाभावस्तत्प्रतियोगित्वेन यागादेः सुघटमेव कारणाभावस्यैव कार्य्याभावप्रयोजकत्वात्। साधनतायाः पदार्थान्तरत्वमतेऽपि तथाकस्य

न लिङर्थत्वं जलं न ताडयेदित्यादौ तस्य निषेधविधेरप्रामा-
ण्यापत्तेः परन्तु स्वर्गादिनिरूपितस्येति सम्प्रदायविदः। रत्नकोष-
कृतस्तु पाकादिकृतित्वावच्छिन्नोद्देश्यताकेच्छाया एव पाकादि-
चिकीर्षात्वात् सैव पाकादौ प्रवर्त्तिकेति तस्यां पाकादिकृतित्वा-
वच्छिन्नधर्मिकेष्टसाधनताज्ञानत्वेन हेतुत्वात् कृतिगतमेवेष्ट-
साधनत्वं लिङर्थः तादृशचिकीर्षायां क्रियाधर्मिकायाः कृति-
साध्यत्वस्येष्टसाधनत्वस्य वा धियः कारणत्वाभावेन क्रियागतयो-
स्तयोरविध्यर्थत्वात् पाको मत्कृत्या साध्यतां इतीच्छायाः
प्रवर्त्तकत्वेऽपि न तस्यां पाकधर्मिककृतिसाध्यताज्ञानत्वेन
हेतुत्वं मानाभावात् किन्तु मत्कृतिसाध्यपाकत्वावच्छिन्नधर्मि-
केष्टसाधनताज्ञानत्वेनैव इष्टस्य तादृप्येण इच्छां प्रति तदव-
च्छिन्नधर्मिकेष्टसाधनत्वधियः कारणत्वस्य कॢप्तत्वादन्यथा गृह-
वृत्तित्वादिविशिष्टपाकत्वप्रकारकेच्छां प्रति पाकधर्मि-
कस्वगृहवृत्तित्वाद्यनन्तधर्मप्रकारकज्ञानत्वेनाप्यनन्तहेतुतापत्तेः
एवञ्च स्वर्गकामो यजेतेत्यादाविष्टसाधनीभूतयागकृतिमान्
स्वर्गकाम इत्याकार एव बोध इति भावना विशेष्य एव स्वर्ग-
कामादौ लिङादिना स्वार्थः संख्यानुभाव्यते अन्यथा यागः
स्वर्गकामस्य कृतिसाध्य इति अन्वये प्रथमायाः प्रकृत्यर्थमुख्य-
विशेष्यकान्वयबोधकत्वभङ्गप्रसङ्गः स्वर्गकामो यजेतेत्यपि प्रयो-
गापत्तिश्च स्वार्थभावनाविशेष्य एव तिङः सङ्ख्याभिधायित्वेन
स्वर्गकामस्यातथात्वे तत्र तिङर्थसङ्ख्याया उदासीनत्वात् बल-
वदनिष्टाजनकत्वन्तु लिङर्थः स्वार्थकृताविव धात्वर्थेऽपि विशे-
षणत्वेनान्वेतुमर्हति प्रत्ययानामेकस्वार्थान्वयिपदान्तरार्थान्वयि-
त्वेन स्वार्थान्तराबोधकत्वनियमस्य जानातीत्यादावेव व्यभि-
चारादित्यस्य पङ्गुः समुद्रं न तरेदित्यादाविष्टसाधनीभूतायाः
समुद्रतरणकृतेरभाववान् पङ्गुरिति तृप्तिकामो जलं न ताड-

गेदित्यादावपि दृष्टसानत्वशून्याया जलताडनकृतेराश्रयस्तृ मि-काम इति परदारान्न गच्छेदास्तिक इत्यादौ बलवदनिष्टाजनक-शून्यायाः परदारगमनकृतेराश्रय आस्तिक इत्यर्थः इत्याहुः।

इदन्तु बोध्यं बलवदनिष्टाजनकत्वमत्र न तीव्रदुःखाजन-कत्वं बह्वायाससाध्ययागादौ तस्य बाधात् नापि बलवद्-द्वेषविषयदुःखाजनकत्वं दुःखमात्रस्य विरक्तानां बलवद्द्वेष-विषयत्वेनाव्यावर्तकतापत्तेः तज्ज्ञानस्याप्रवर्त्तकतया तस्य विधित्वायोगाच्च यत्र बलवान् द्वेषस्तज्जनकताज्ञानत्वेन बलवद्द्वेषविषयत्वेन वा प्रवृत्तिसामान्यं प्रति प्रतिबन्धकत्वात् परन्तु नरकाजनकत्वं पापाजनकत्वं वा तद्विरहस्यैव कलञ्ज-भक्षणादौ नञा बोधनात्। ज्वरार्त्तो नान्नमश्नीयात् इत्यादि लौकिकविधौ तु ज्वरादिप्रयोज्यतत्तद्विजातीयदुःखाजनकत्वे लिङो लक्षणा। तथा अष्टमचन्द्रे न गच्छेदित्यादावपि धातो-र्गतिहेतु दुरिते तेनाष्टमचन्द्रकालीनगतिहेतु दुरितं तत्तदनिष्टा-जनकं नेत्येवं तत्र बोधः अन्यथा तथाविधगतेःपापजनकत्वे तद्-द्वारा कालान्तरभाविदुःखजनकत्वे वा प्रमाणाभावेनासङ्गत्या-पत्तेः। गोचरे वा विलग्ने वा ये ग्रहा रिष्टसूचका इत्यादि-वचनेभ्यो ग्रहाणां शुभाशुभसूचकत्वोपगमात् एतेन सपापस्तुलां नारोहेदित्यादिपरीक्षाविधयोऽपि व्याख्याताः तत्रापि धातोरारो-हणहेत्वदृष्टलक्षकत्वादत एव जयेतरनिमित्तस्य वृत्तिलाभाय केवलम्। परीक्ष्यसमवेतस्य परीक्षाविधयो मता इत्याचार्य्यैरप्यु-क्तमिति वदन्ति। परे तु साध्यताविशिष्टमेव विध्यर्थः तत्राप्येव-कारस्थल इव नियतोत्तरवर्तितावच्छेदकधर्मवत्तालक्षणसाध्यता-घटकप्रत्येकवस्तुन्येव लिङादेः शक्तिः विशिष्टन्तु वाक्यार्थमर्य्या-दया लभ्यं अतः सामान्यतो नियतोत्तरवर्तित्वस्य दुर्वचत्वेऽपि न क्षतिः एतञ्च स्वर्गकामो यागानुकूलकृतिमान् यागसाध्येष्टवांश्च

इत्याकारक एव स्वर्गकामो यजेतेत्यादौ बोधः तेन भावनायाः प्रथमान्तार्थान्वयित्वनियमः सम्पद्यते सम्पद्यते च शास्त्रदर्शितं फलमनुष्ठातरीत्यादिकः प्रवादः यागादौ स्वर्गादिसाधनत्वस्य विधिबोध्यत्वे तु तदुभयमेव व्याकुलीभवेत् फलं प्रति कर्त्तुरौदासीन्याद्भावनाविरहाच्च । धात्वर्थावच्छिन्नतिङर्थस्यैव तथात्वादिति । नचैवं पितृस्वर्गकामो गयायां पिण्डं दद्यादित्यादिविधेर्बोधः न व स्वाश्रयपितृकत्वादिपरम्परासम्बन्धेनैव पिण्डदानजन्येष्टस्य कर्तर्य्यन्वयात् इतरगतत्वे प्रमाणाभावस्थल एव साक्षात्सम्बन्धेन कर्त्तरि तदन्वयस्य व्युत्पन्नत्वात् यद्यपीष्टं परित्यज्य साध्यमात्रं विध्यर्थोऽस्तु स्वर्गकामादिसमभिव्याहारादेव यागसाध्यत्वेन स्वर्गादेर्भानसम्भवात् विश्वजिता यजेत राजन्य इत्यत्रापि विश्वजिद्यागसाध्यवान् क्षत्रियः इत्यन्वयबोधोत्तरं साध्यविशेषाकाङ्क्षयैव स्वर्गस्य तथात्वेन कल्प्यत्वात् तथापि तृप्तिकामो जलं न ताड़येदित्यादौ तृप्तिकामादेर्जलताड़नसाध्यसामान्याभावस्य बोधने वाधादिष्टत्वेन तद्वान्तरस्वर्गत्वादिना वान्वयबोधस्यानुभविकत्वाच्च तादृप्येण शक्तिरन्वयेष्टमात्रं शक्यं स्वसाध्यत्वसंसर्गेण धात्वर्थस्य तत्रान्वयात् विशिष्टार्थलाभ इत्येव किं न रोचयेः अतएव इष्टत्वेन फलस्य शक्यत्वे श्रेयत्वादिप्रकारेणापि तथात्वापत्तिर्विनिगमकाभावादित्यपि प्रत्युक्तमिति प्राहुः। प्राभाकरास्तु स्वर्गकामो यजेतेत्यादौ यागः स्वर्गकामस्य कृतिसाध्यतावान् इत्याकारकः प्रथमं न बोधः तत्कामकार्य्यत्वस्यान्वये प्रयोजकस्य तत्साधनतया ज्ञानत्वस्य तत्साधनत्वस्य वा पूर्वं यागेऽगृहीतत्वात् साक्षात् स्वर्गसाधनत्वस्य तत्रासत्त्वात् स्वर्गपर्य्यन्तस्थायिस्वव्यापारवत्त्वस्य तादृशव्यापारानुपस्थित्या ग्रहासम्भवात् स्वर्गकामः यजेतेत्यादाबप्रामाण्यानुरोधेन उक्तरीत्या योग्यताधियः कारणत्वस्यावश्यकत्वात् नित्यस्य कार्य्य

फलाभावेन प्रत्यहं शुचिः सन्ध्यामुपासीतेत्यादिविधेरप्रामाण्य-भिया इष्टसाधनत्वस्य विध्यर्थत्वाभावात अतएव स्वर्गकाम-नियोज्यताको नियोज्यतासम्बन्धेन स्वर्गकामीयो वा यागः कार्य्यतावान् इत्यपि नादिमो बोधः स्वर्गकामस्य नियोज्यत्वं हि न तत्कृतिसाध्यत्वं स्वर्गकामकार्य्यताविशिष्टे यागे लिङर्थकार्य्यत्वस्यान्वये निराकाङ्क्षत्वापत्तेः नापि तदीय-कृतिसाध्यत्वधीविशेष्यत्वं स्वर्गकामः पचेतेत्यादेः प्रमाणतापत्तेः परन्तु स्वर्गकामनिष्ठस्य स्वर्गसाधनताधीजन्यकार्य्यताज्ञानस्य विशेष्यत्वं तदन्वयप्रयोजकञ्च स्वर्गसाधनत्वं साक्षादसाधनस्य यागादेः स्वर्गपर्य्यन्तस्थायिव्यापारानुपस्थित्या परम्परासम्बन्धेन साधनत्वाग्रहेण प्रथमं दुर्ग्रहमेवेति तस्मात् कार्य्ये एव लिङः शक्तिरतस्तत्रैव धात्वर्थयागस्य स्वर्गकामनियोज्यकत्वस्य च युगपदन्वयात् यागस्य कार्य्यं स्वर्गकामनियोज्यताकं स्वर्ग-कामकृतिसाध्यं वेत्याकारक एव प्रथमं बोधः। स्वर्गकाम-नियोज्यताद्यन्वयप्रयोजकस्य साक्षात्स्वर्गसाधनत्वस्यैव शची-सम्पर्कादिके कार्य्ये पूर्वं गृहीतत्वात् उत्तरकालन्तु यागकार्य्यस्य स्वर्गकामकृतिसाध्यत्वं स्वर्गकामनियोज्यताकत्वं वा यागस्य तथात्वं विनानुपपन्नमित्यनुपपत्तिधीसहकृतादुक्तवाक्यात् यागः स्वर्गकामस्य कृतिसाध्य इत्याकारकः स्वर्गकामनियोज्यताको यागः कृतिसाध्य इत्याकारको वा प्रवृत्त्यौपयिक औपादानिको बोधः स्वर्गाव्यवहितप्राक्कालवृत्तिस्वव्यापारस्य पूर्वमुपस्थित्या स्वर्गकामनियोज्यत्वाद्यन्वयप्रयोजकस्य स्वर्गसाधनत्वस्य यागे सुग्रहत्वात् न च तृप्तिकामो भुञ्जीतेत्यादि लौकिकस्थले लघुनि कार्य्यत्वे शक्तस्य लिङादेः स्वर्गकामो यजेतेत्याद्यलौकिक-स्थले कार्य्यत्वविशिष्टे लक्षणैवास्तु तावतैव स्वर्गकामनियो-ज्यतान्वययोग्यतासम्पत्तेरिति वाच्यं तथा सति अपूर्वस्य दूता-

र्य्येण विध्यनुभाव्यत्वानुपपत्तेः कार्य्यत्वावच्छिन्नशक्तत्वेन पदस्थानस्य तदवच्छिन्नानुभावकत्वात् । नचैवं गङ्गायां घोषो दृश्यतामित्यादौ लक्ष्यस्य तीरादेरन्वयधीविषयत्वं न स्यादिष्टत्वात् । शक्तपदान्तरस्यैव तत्रोपस्थिततीरादिसाकाङ्क्षशक्यार्थानुभावकत्वात् पाकं करोतीत्यादिप्रत्यक्षे पाकादेरिव तत्रापि तीरादेस्तटस्थज्ञानविषयत्वेनैव विशेषणत्वात् अतएव न तावद्विशिष्टधीविषयस्यैव विशेषणत्वं क्वचित्तदभिनिवेशस्तु सामग्रीवशादित्याचार्य्यैरप्युक्तं लौकिकलिङः क्रियायां कार्य्यत्वानुभावकत्वे तु तादृशलिङ्त्वावच्छेदेन कार्य्यत्वे शक्त्यन्तरं वाच्यं नो चेत्तत्रापि उक्तैव गतिः अतएव लोके लिङ् लाक्षणिकीति गुरूणां सिद्धान्तः सङ्गच्छते इत्याहुः तच्चिन्त्यं इष्टसाधनत्वस्य विध्यर्थत्वादेव स्वर्गकामः पचेतेत्यादेरप्रामाण्यसम्प्रत्तावुक्तक्रमेण यागादौ स्वर्गकामकृतिसाध्यत्वस्य तत्कामनियोज्यताकत्वस्य वान्वये स्वर्गसाधनत्वादेः प्रयोजकत्वे मानाभावात् प्रत्यहं सन्ध्यामुपासीतेत्यादिनित्यविधेरपि सन्ध्यामुपासते येतु इत्यर्थवादेनोपस्थितब्रह्मलोकप्राप्त्यादिसाधनतावाचित्वात् विधिशेषीभूतार्थवादस्य गुरुणापि प्रामाण्योपगमात् न च नित्यकर्मणां काम्यत्वे नित्यत्वविरोधः न हि फलकामनां विना क्रियमाणत्वं नित्यत्वमप्रसिद्धेः प्रवृत्तिसामान्यं प्रत्येव काम्यसाधनताधियः कारणत्वात् किन्तु यदकरणात् प्रत्यवायस्तत्त्वं तच्च काम्यत्वेऽप्यविरुद्धं नियोज्यान्वयस्य प्रामाणिकत्वेऽपि साक्षात्परम्परासाधारणस्वर्गसाधनतामात्रस्य तद्योग्यताविधया प्रागेव यागादौ सुग्रहत्वाच्च स्वर्गादिनियतपूर्ववर्त्तित्वावच्छिन्नसम्बन्धवत्ताकान्यथासिद्धनिरूपकधर्मवत्तारूपस्यातिरिक्तरूपस्य वा सामान्यतः स्वर्गसाधनत्वस्य व्यापारत्वाघटितत्वेन तद्ग्रहे बाधकाभावादित्येषा दिक् ।

श्राद्धे भुञ्जीत भवान् इह भुञ्जीथास्त्वमित्यादौ श्राद्धे भोजनाय निमन्त्रितो भवानित्यनुभवात् निमन्त्रितत्वमेव तत्र लिङर्थः। तच्च स्वकर्त्तृत्वप्रकारकभोजनकवाक्यप्रतिपाद्यत्वं तदेकदेश एव च कर्त्तव्यत्वबोधे धात्वर्थो विशेष्यत्वेनान्वेति तथा च श्राद्धभोजनधर्म्मिकस्वकर्त्तव्यत्वधीजनकवाक्यप्रतिपाद्यो भवानित्याकारस्तत्र बोधः तादृशधीजनकस्य भवतात्र भोक्तव्यमित्यादिवाक्यस्य निमन्त्रणरूपतया भवदादेस्तत्प्रतिपाद्यत्वात् त्वपदस्य निरुक्त प्रतिपाद्यत्वाभिमतभवदादिपरत्वात् तत्र च यस्य प्रत्याख्याने प्रत्यवायस्तन्निमन्त्रणमिति वृद्धस्मरणात् निरुक्तधीजनकवाक्यमप्रत्याख्येयत्वेन विशेषणीयं तच्च प्रत्यवायजनकप्रत्याख्यानकत्वं श्राद्धमुपक्रम्य अनिन्दितेनामन्त्रितो नापगच्छेदिति श्रुतेः एवञ्च पुत्रोत्सवे भवान् भुञ्जीतेत्यादौ न निमन्त्रितत्वं लिङर्थः तत्प्रत्याख्याने प्रत्यवायाश्रुतेः किन्त्वामन्त्रितत्वमेव तच्च स्वकर्त्तव्यत्वप्रकारकधीजनकप्रत्याख्यानार्हवाक्यप्रतिपाद्यत्वं प्रत्याख्यानार्हत्वञ्च प्रत्यवायाजनकप्रत्याख्यानकत्वं यत्प्रत्याख्याने कामचारस्तदामन्त्रणमिति स्मृतेः बालं युद्धात्तारयेस्त्वं जलाद्विप्रं समुद्धरेरित्यादावप्युक्तरीत्यैवान्वयो द्रष्टव्यः। धेनुं दद्यास्त्वमस्मभ्यमित्यत्र प्रार्थना लिङर्थः तच्च स्वसम्प्रदानकदानधर्म्मिकसम्बोध्यकर्त्तव्यत्वप्रकारकवक्तृच्छाविषयत्वं तेन चैत्रवक्तृकतादृशवाक्यस्थले धेनुकर्म्मकचैत्रसम्प्रदानकदानत्वावच्छिन्नधर्म्मिका या युष्मत्कर्त्तव्यत्वप्रकारिका चैत्रेच्छा तद्विशेष्यीभूतस्य दानस्यानुकूलकृतिमां त्वमित्याकारकस्तत्र बोधः। भिक्षां देहि त्वमर्थिभ्य इत्यादौ क्वचिल्लोटोऽपि निरुक्तप्रार्थनार्थः तत्र च भिक्षा भिक्षणीयं कृद्विहित इति न्यायात्। कदो यदि धूमवान् स्यादित्यादौ धातोर्निरूढलक्षणया भेदोऽर्थस्तदुत्तरलिङश्चाश्रयत्वं यदि शब्दस्तु लक्षणाया निरूढत्वसम्पत्तये तेन

धूमवद्भेदाश्रयतावान् ह्रद इत्यर्थः धूमवान्नेत्यत्र निपातार्थ इव धात्वर्थेऽपि भेदे प्रतियोगित्वसम्बन्धेन नामार्थस्य धूमवदादेः क्वचित् व्युत्पत्तिवैचित्र्येणान्वये क्षत्यभावात् ह्रदो यदि धूमवानित्यादौ तु यद्यादिनिपातस्यैव भेदादिरर्थः इत्यस्य ह्रदो यदि धूमवान् स्यात् वह्निमान् स्यात् इत्यत्रापि धूमवह्निमो ह्रदो धूमव्यापकवह्निमद्भेदवानित्याकारकस्तत्र बोधः स वह्निमान् यो धूमवानित्यादौ यो धूमवान् स वह्निमानित्यादौ च यद्योगप्राथम्यादिवशादिव प्रकृतेऽपि स्याद्योगप्राथम्यादिवशात् धूमादिव्यापकतया वह्न्यादेर्भानसम्भवात् अतएव ह्रदो यदि धूमवान् स्यात् घटवान् स्यादित्यादिको न प्रयोगः घटादेर्धूमाद्यव्यापकत्वात् ह्रदो यदि धूमवान् स्यात् यदि घटवान् स्यादित्याद्यर्थे तु तादृशप्रयोगो योग्य एव धूमस्योद्देश्यकुक्षावनिक्षेपात्। यद्योगप्राथम्यञ्च प्रत्येकमेव व्यापकताग्रहे तन्त्रं न तु यद्योगस्य प्राथम्यम्। स शूरः स च विक्रान्तो यस्त्वया देवि वीक्षित इत्यादौ न षट्पदोऽसौ न जुगुञ्ज यः कलम् इत्यादौ च विनापि यद्योगप्राथम्यं तन्मात्रादेव शौर्य्यादौ लक्ष्मीवीक्षितत्वादिव्यापकत्वग्रहात् गुणत्वं यदि घटे स्यात् द्रव्ये स्यादित्यादौ तु धातोरत्यन्ताभाव एवार्थः तदुत्तरलिङस्तु पूर्ववदाश्रयत्वं तथाच घटवृत्तित्वाभाववद्गुणत्वं घटवृत्तित्वव्यापकीभूतस्य द्रव्यवृत्तित्वस्याभाववदित्येवं तत्र बोधः। परे तु ह्रदो यदि धूमवान् स्यात् वह्निमान् स्यादित्यादौ तु प्रथमस्य स्याच्छब्दस्यापादकत्वं द्वितीयस्य चापत्तिरर्थः तेन धूमवत्तापादकताकवह्निमत्तापत्तिविशेष्यो ह्रद इत्याकारकस्तत्र बोधः। यदि शब्दस्तु तादृशार्थतात्पर्य्यग्राहकः। यद्ययं धूमवान् वह्निमानपि स्यादित्यादौ तु यदि शब्दस्यैवापादकत्वमर्थः इत्याहुः। यो ब्राह्म-

गायावगुरेत् तं शतेन यातयादित्यादौ च हेतुहेतुमतोर्लिङ् इत्यनुशासनात् यः शतयातनाहेतुब्राह्मणावगोरणवान् तदीयशतयातनं ब्राह्मणावगोरणजन्यम् इत्याकारको बोधः ब्राह्मणावगोरणं हन्तुमुद्यमः पौर्वापर्य्यमात्रं तत्र लिङर्थः न हेतुहेतुमद्भावः पश्चात्तस्य कल्पनात् अन्यथा दुरितापूर्वस्य वाच्यत्वापत्तेरिति तु प्राभाकराः । यस्तान्त्वा पातयेत् पिण्डं तं नयेद् ब्रह्म शाश्वतमित्यादावप्युक्तरीत्याऽन्वयः ।

ऋतौ स्वदारानुपेयादित्यादौ च स्मृतौ न स्वदारगमनादेरिष्टसाधनत्वे विधेस्तात्पर्य्यं दारगमनादि लौकिकप्रमाणावगतेष्टसाधनताकत्वेन विधेयत्वात् प्रमाणान्तराप्राप्तप्रापकस्यैव श्रौतविधित्वात् किन्त्वयोगव्यवच्छेदपर्य्यवसिते नियमे स च प्रत्यवायजनकीभूताभावप्रतियोगित्वरूपस्तदेकदेश एवाभावे ऋत्वादिकालस्यावच्छेदकत्वेनान्वयात् ऋतुकालावच्छेद्यत्वविशिष्टस्य प्रत्यवायजनकीभूताभावस्य प्रतियोगिस्वदारगमनमित्याकारकस्तत्र बोधः । यद्वा प्रत्यवायहेतुत्वमभावस्य इयं तत्र लिङर्थस्तेन प्रतियोगिविधया धात्वर्थस्यावच्छेद्यत्वेन च कालस्यान्वयिनि अभावे लिङा प्रत्यवायहेतुत्वस्य बोधनात् ऋतुकालावच्छेद्यः स्वदारगमनाभावः प्रत्यवायहेतुरित्याकार एव तत्र बोधः । न च येषां दाराणां गमनमलीकं तेषामृतावगमने प्रत्यवायो न स्यात् उक्तवाक्यादलाभादिति वाच्यं स्वदारपदस्य स्वदारभिन्नो यः स्वसमानकालीनस्तदन्यस्त्रीपरतया उक्तस्मृत्यैव तत्र स्वदारऋतुकालावच्छेद्यस्य स्वदारभिन्नस्वसमानकालीनेतरस्त्रीगमनाभावस्य प्रत्यवायहेतुत्वबोधनात् स्वासमानकालीनस्त्रीगमन एव तादृशगमनत्वस्य सुप्रसिद्धत्वात् एतेन श्राद्धदिने पितृशेषं भुञ्जीतेत्यादिकोऽपि नियमविधिः व्याख्यातः । पञ्च पञ्चनखान् भुञ्जीतेत्यादि लिङोऽपि नेष्टसाध-

नत्वे तात्पर्यं भोजनस्य रागप्राप्तत्वेनाविधेयत्वात् नापि प्राशुक्त-नियमे पञ्चनखानां पञ्चानामभोजनस्य प्रत्यवायहेतुत्वे माना-भावात् ऋतावुपेयात् स्वां भार्य्यामन्यथा भ्रूणहा भवेदित्यादि-निन्दार्थवादबलात् ऋतौ स्वदारगमनाद्यभावस्य दुरितहेतुत्व-व्यवस्थित्यैव तद्विधेर्नियमपरत्वकल्पनात् किन्त्वन्ययोगव्यवच्छेद-पर्य्यवसन्नायां परिसंख्यायां सा च यद्यपि न शशादिपञ्चविधान् पञ्चनखानेव भुञ्जीतेत्याकारापञ्च नखभिन्नस्य ओदनादेर्भोजनस्य निषिद्धत्वे प्रमाणाभावात्तथापि पञ्चैव पञ्चनखान् भुञ्जीतेत्याकारा तेन शशादिपञ्चभिन्नानां पञ्चनखानां भोजनं प्रत्यवायहेतुरित्येव तत्र वाक्यार्थ इति तत्रत्यलिङा प्रत्यवायहेतुत्वमात्रं प्रत्याय्यते प्राथमिकपञ्चपदस्य लक्षणया शशादिपञ्चभिन्नार्थकत्वात्। ननूक्तलिङः परिसंख्यया पञ्चविधान्यपञ्चनखानां भोजनस्य प्रत्यवायहेतुत्वबोधने पञ्चपदस्य लक्षणापत्तिरतः शशादिपञ्च-पञ्चनखानां भोजनाभावस्यैव प्रत्यवायहेतुत्वं बोधयन्नियम-विधिरेवायमुचितः भोजनतदभावयोरेकस्यापि प्रमाणान्तरेण प्रत्यवायहेतुत्वस्याक्लृप्तत्वादिति चेन्न प्रोक्तविधेर्नियमपरत्वे पञ्चनखपदस्य व्यर्थत्वापत्तेः शशादिपञ्च भुञ्जीत इत्यत एव पञ्चभोजनाभावस्य प्रत्यवायहेतुत्वस्यावगतेः सम्भवात्। श्वाविधं शल्लकं गोधां खड्गकूर्मशशांस्तथा। भक्ष्यात् पञ्चनखेष्वाहु-रनुष्ट्रांश्चैकतो दतः इति मनुवचने पञ्चनखेष्विति निर्द्धारण-सप्तम्या शल्लकादिपञ्चभिन्नपञ्चनखानां भक्षणस्य प्रत्यवायहेतु-तायाः क्लृप्तत्वाच्च श्वाविधमित्यस्य शल्लकविशेषणत्वात् एवञ्च याजनाध्यापनप्रतिग्रहैर्द्विजो धनमर्जयेदित्यादावपि लिङः परि-संख्यैवार्थस्तेन याजनादिभिन्नैर्ब्राह्मणस्य धनार्जनं प्रत्यवाय-हेतुरिति वाक्यार्थः न कृष्याद्यैरनापन्नो ब्राह्मणो धनमर्जये-दित्यादिवचनैरुपायान्तरेण विप्राणां धनार्जनस्य प्रत्यवायहेतु-

त्वस्य स्फुटत्वात् न तु याजनाद्येः ब्राह्मणो धनमर्जयेदेव इति नियमविधिर्याजनादिना धनानर्जने ब्राह्मणस्य प्रत्यवायाश्रुतेः।

लङ् लक्षयति।

> या स्मयोगं विना धातोः शपन्तस्यार्थधर्मिके।
> अतीतत्वग्रहे हेतुस्तादृशी तिङ् लङुच्यते।

स्मशब्दस्य योगं विना शपन्तस्य धातोरर्थेऽतीतत्वस्यान्वयधीहेतुर्यादृशी तिङ् तादृशी तिङ् लङ् उच्यते शिवादिभ्यस्त्वणेव स्यादित्यतेव नञो द्विरुक्तेरनित्यत्वं लङोच्यते इति वा पाठः तिवादिश्च स्मशब्दोपसन्धानं विना धातोरर्थे नातीतत्वं बोधयति पपाचेत्यादौ लिङादिर्बोधयन्नपि न शपन्तस्यापचदित्यादौ तु विनापि स्मशब्दयोगं लङस्तथात्वम् अदीव्यदित्यादौ शपन्तस्य धातोरर्थे स्वार्थमबोधयन्नपि दिवादिस्तत्सजातीय एव तण्डुलमपचत् इत्यादावमी निरुक्तसजातीयत्वेऽपि न तिङ्त्वमतस्तद्व्युदासः प्रकृत्यर्थेऽनुमतत्वाद्यतनत्वाद्यनाकाङ्क्षितत्वेन विशेषणाच्च पच्यतां पच्येतां पचतामित्यादावपाक्तां अपच्चातां आपाक्तामित्यादौ च लोटो लङ् लुङस्तामातां प्रभृतौ न प्रसङ्गः। अत्रापचदित्यादौ लङोऽतीतः काल इव तन्निष्ठं ह्यस्तनत्वमप्यर्थः तच्च पूर्वदिनवृत्तित्वमिति कौमाराः ह्यस्तनत्वं लङो नार्थः किन्त्वद्यतनभिन्नत्वं अनद्यतने लङिति पाणिन्यनुशिष्टेरित्यपरे। तथा च वर्त्तमानध्वंसप्रतियोगिपूर्वदिनवृत्तिपाककृतिमान् तादृशप्रतियोग्यनद्यतनकालवृत्तिपाककृतिमान् इति वा तत्र बोधः। प्रायिकञ्चेदं तेन ह्यस्तनत्वादिशून्येऽपि काले क्वचिल्लङादेः प्रयोगः। ह्योऽपचदित्यादौ ह्यःपदाख्याताभ्यामेकमेव निरुक्तं ह्यस्तनत्वं बोध्यते समभेदन्यायात् अन्यथा पक्ता पचतीत्यत्रेव निराकाङ्क्षतापत्तेः।

लुङं लक्षयति।

हन्तेः कृतवधेरर्थे यातीतत्वस्य बोधिका।
सिजन्तस्याथवा धातोस्ताहशी तिङ् लुङोच्यते॥

कृतवधादेशस्य हन्तेरर्थे किंवा सिजन्तस्य धातोरर्थे याती तत्वस्य बोधिका ताहशी तिङ् लुङ् लुङ्शब्देनोच्यते। जघान हन्तिस्म इत्यादौ लिङ् लङादिको हन्तेरर्थेऽतीतत्वस्य बोधको ऽपि न कृतवधादेशस्य न वा सिजन्तस्य अवधीत् अवधिष्टां अवधिषुरित्यादौ तु लुङ् मात्रं तथा वध्यात् वध्यास्तां वध्यासुरीत्यादौ कृतवधादेशस्य तस्यार्थे स्वार्थानुभाविकापि आशीर्नातीतत्वस्य बोधिका। अत्राप्यनुमतत्वस्यास्तनत्वाद्यना काङ्क्षितत्वेन विशेषणात् पच्यतां अपचत् अपचतामित्यादौ लोड़ाद्यतिप्रसङ्गः अत्रापाचीदित्यादौ अतीतः काल इव तन्निष्ठमद्यतनत्वमपि लुङामर्थस्तेन वर्त्तमानध्वंसप्रतियोग्य द्यतनपाककृतिमान् इत्येवं तत्र बोधः। रीतिरुक्तैव।

लिटं लक्षयति।

द्विरुक्तभिन्नधात्वर्थे स्वार्थस्यान्वयबोधने।
या न योग्या ताहशी तिङ् लिट्पदेनाभिधीयते॥

अभिश्रियत् अदुद्रुवदित्यादौ द्विरुक्तस्यैव अपाचीदित्यादौ तदन्यस्यापि धातोरर्थे स्वार्थान्वयं लुङादयो बोधयन्ति लिट जघान जघ्नतुरित्यादौ द्विरुक्तस्यैव धातोरर्थे पिपक्षति पापच्य इत्यादौ सनादयस्ताहशा अपि न तिङः तत्रापि प्रकृत्यर्थे वर्त्त मानत्वाद्यनाकाङ्क्षत्वेन विशेषणात् पचे पचावहे पचाव इत्याद न लड़ाद्यतिप्रसङ्गः।

काशाञ्चक्रे लोलूयामास ईक्षाम्बभूव इत्यादावाम कृञादेरप्यनुप्रयुक्तस्य पदसाधुतामात्रत्वादसम्भवापत्तेरव्य निर्वक्ति।

विरुक्तस्य यजेरर्थे चकास्तेराम्युतस्य वा ।
या स्वार्थस्यान्वये हेतुः सा वा लिट् कथ्यते बुधैः ॥

जुहोतीत्यादौ द्विरुक्तस्य धातोरर्थे स्वार्थबाधकोऽपि लड़ादिर्न यजेरर्थे । चकास्तीत्यादौ चकासधातोरर्थे तादृगपि नामन्तस्य मनश्चचाल सुरभिभाग आजगाम इत्यादावतीतः काल इव धात्वर्थनिष्ठं परोक्षत्वमपि लिटोऽर्थः तच्चातीन्द्रियत्वं तेनातीतकालवृत्त्यतीन्द्रियचलनवन्मन इत्याकारकस्तत्र बोधः । चैत्रश्चारु पपाच इत्यादौ तु लिङुपस्थाप्यस्यापि परोक्षत्वस्य न पाकादावन्वयाऽयोग्यत्वात् । एतेन व्यातेने किरणावलीमुदयन इत्यादि व्याख्यातम् शेषं पूर्ववत् ।

लुटं आशीर्लिङञ्च क्रमेण लक्षयति ।

धात्वर्थे श्वस्तनत्वस्य बोधिका तिङ् लुङुच्यते ।
आशीर्लिङाशंसनस्य भावित्वस्य च बोधिका ॥

श्वः पक्ष्यतीत्यादौ धात्वर्थे श्वस्तनत्वस्य बोधकमपि श्वःपदं न तिङ् लृडादयस्तु धात्वर्थे भावित्वमेव बोधयन्ति न श्वस्तनत्वमपि जीवतु भवानित्यादौ तु तुवादिकं आशंसनीयत्वस्य बोधकमपि न भावित्वस्य भावित्वस्य बोधकोऽपि लृड़ादि नाशंसनीयत्वस्य भूयात् भूयास्तामित्यादौ पुनरष्टादशैवाशीर्लिङः प्रकृत्यर्थस्याशंसां भावित्वञ्चानुभावयन्ति । अथ पाकगोचरैककृतिदशायामपि तद्गोचरा परकृतेरतीतत्वाद्भविष्यत्वाच्च तदानीमयं पपाच पक्ष्यतीत्यादिप्रयोगप्रसङ्गः पाककृतित्वावच्छेदेनातीतत्वादेरन्वयोपगमेन तद्वारणे तु पपाच पक्ष्यतीत्यादेरयोग्यत्वापत्तिः एतदवच्छेदेनातीतत्वभविष्यत्वयोर्बाधादिति चेत् न पाककृतित्वावच्छिन्नधर्मिकायां तत्तत्पाकगोचरकृतित्वावच्छेद्यस्वरूपसम्बन्धेनैवातीतत्वाद्यन्वयबुद्धौ पाकार्थकधातूत्तर लिटत्वादिना हेतुतयैव उक्तदोषव्युदासात् चुल्लीस्थाल्यारोपणा-

दिकं हि न प्रत्येकं पाकपदार्थः किन्तु स्थाल्यारोपणाग्निनिवेशनतुषप्रक्षेपाद्यनुप्रस्फोटनपर्य्यन्तस्तत्तत्क्रियाकलाप एव । यदाह दुर्गः क्रियते इति क्रिया सा च पूर्वापरीभूतावयवैवेति तथाच तावत्क्रियाकलापस्य प्रत्येकगोचरकृतेरतीतत्वभविष्यत्वयोर्बाधात् अवान्तरतुषप्रक्षेपादिदशायां पपाच पक्ष्यतीत्यादिको न प्रयोगः । नचैवं सूपपाकं निष्पाद्य तण्डुलं पचत्यपि पुंसि अयं पपाच इति स्यात् निष्पन्नपाकगोचरयावत्कृतेरतीतत्वात् इति वाच्यमिष्टत्वात् तण्डुलं पपाचेत्यादि प्रयोगस्यैव तत्रायोग्यत्वात् अन्यथा सूपमपाक्षीदित्यादिप्रयोगस्तत्र कथं स्यात् । अतएव सम्प्रति सूपं पचत्यपि पुरुषे सूपकर्मकनिष्पन्नपाकगोचरकृतित्वावच्छेदेनातीतत्वमुपादाय सूपमपाक्षीदित्यादिकः प्रयोगो भवत्येव परन्त्वद्य सूपमपाक्षीदित्यादिरेव न तत्र प्रयोगः सूपकर्मकाद्यतनपाकगोचरकृतित्वावच्छेदेन अतीतत्वस्य बाधादिति युक्तमुत्पश्यामः ।

लृटं लृङञ्च लक्षयति ।

क्रियातिपाते कालस्य भाविनः प्राक्तनस्य च ।
वैशिष्ट्यबोधिका या तिङ् लृट् च लृङ् च क्रमादिमे ॥

या तिङ् क्रियाया धात्वर्थस्यातिपाते विगमे भाविकालावच्छेद्यत्वस्य बोधिका तादृशी लृट् यात्वतीतकालावच्छेद्यत्वस्य तादृशी लृङ् तण्डुलश्चेत् प्राप्स्यत्योदनमपि पक्ष्यति चैत्र इत्यादौ स्यतिप्रभृतयश्चैत्रादेर्भाविकालावच्छेदेन तण्डुलप्राप्त्याद्यभाववत्त्वमनुभावयन्ति तथैवश्चेदप्राप्स्यत् ओदनमप्यपक्ष्यत् इत्यादावतीतकालावच्छेद्यमिन्धनप्राप्त्यभाववत्त्वं तथाच भाव्यतीतकालाविव क्रियाप्रतियोगिकोऽभावोऽपि तयोरर्थः वस्तुतो भाव्यादिकालावच्छेदेन तण्डुलप्राप्त्यभावप्रयुक्त ओदनपाकाद्यभाव

एव उक्तस्थले लृङादिना चैत्रादावनुभाव्यः क्रियाविरहप्रयुक्तस्य क्रियान्तरविरहस्यैव क्रियातिपातत्वात् अतएव चैत्रश्चेदपतिष्यत् ग्राममप्यगमिष्यदित्यादिको न प्रयोगः तीर्थञ्चेदगमिष्यत् सार्थमप्यलप्स्यत् इत्यादिकस्तु चिन्त्यः सार्थलाभाद्यभावस्य तीर्थगत्याद्यभावाप्रयुक्तत्वात् इति तण्डुलश्चेत् पचेदोदनमपि भुञ्जीतेत्यादौ तु क्रियातिपतनस्य वर्त्तमानत्वमेव लिङा प्रत्याय्यते न तु भावित्वमतीतत्वं वेति तद्व्युदासः।

क्रमप्राप्तं धात्वंशप्रत्ययं लक्षयति।

सुबर्थानन्वितस्वार्थतिङन्यप्रत्ययस्तु यः।
स धात्वंशोऽथवा धातोरन्तांशप्रत्ययस्तथा॥

सुबर्थानन्वितयादृशस्वार्थको यस्तिङन्यः प्रत्ययः स तादृशार्थे धात्वंशप्रत्ययः पुत्रीयतीत्यादौ क्यजाद्यर्थस्य इच्छादेर्न सुबर्थेऽन्वयः किन्तु तिङर्थे पचतीत्यादौ सुबर्थानन्वितप्रत्ययार्थकोऽपि तिवादिर्न तिङन्यः पिपक्षया कुरुतेत्यादौ तु भावप्रत्ययस्य इच्छास्वरूपस्यैव सुबर्थकरणत्वादावन्वयः न तु सनन्तार्थपाकेच्छामात्रस्य अस्तु वा सान्वयसंज्ञानुरोधेन धात्वन्तावयवरूप एव प्रत्ययो धात्वंशप्रत्ययः पिपक्षादिधात्वन्तभागत्वात् सनादिप्रत्ययस्य।

विभजते।

नामप्रकृतिकश्चायं धातुप्रकृतिकस्तथा।
तत्रादिमः क्यच्क्यङादिरपरः सन्यङादिकः॥

अयं धात्वंशप्रत्ययो नामप्रकृतिको धातुप्रकृतिकश्चेति द्विविधः। तत्रादिमो नामप्रकृतिकः क्यच्क्यङादिः अपरो धातुप्रकृतिकः सन्यङादि चैत्रः पुत्रीयति इत्यत्र क्यजर्थेच्छायां तत्प्रकृत्यर्थतावच्छेदकीभूतपुत्रत्वाद्यवच्छिन्नविषयतया प्रकृत्यर्थस्य पुत्रादेस्तस्याश्च तिङर्थ आश्रयत्वे निरूपकत्वेनान्वये

साकाङ्क्षत्वात् पुत्रत्वेन पुत्रगोचरेच्छाया आश्रयत्ववांश्चैत्र इत्येवमन्वयधीः अतएव मनुष्यत्वादिप्रकारेण पुत्रेच्छादशायां पुत्रीयतीत्यादिको न प्रयोगः किन्तु मानुषीयतीत्यादिरेव। अतएवात्मनः पुत्रीयतीत्यादेरात्मपुत्रत्वप्रकारकेच्छाबोधने एवासामर्थ्यम्। आत्मपुत्रत्वादेस्तत्र प्रकृत्यर्थतानवच्छेदकत्वात् आत्मसम्बधी यः पुत्रः पुत्रत्वेन तद्गोचरेच्छाया बोधने तु तस्य सामर्थ्यमेव चैत्रस्य गुरुकुलमित्यादाविव वृत्तिशब्दैकदेशेऽपि पुत्रादावात्मप्रभृतेः प्रतियोगिविषयान्वयस्य व्युत्पन्नत्वात्। आत्मपुत्रीयतीत्यादौ पुनरात्मपुत्रत्वादेरपि प्रकृत्यर्थतावच्छेदकत्वात् तदवच्छिन्नपुत्रविषयताकेच्छाबोधने न किमपि बाधकं पश्यामः। एतेन पुत्रकाम्यतीदं काम्यतीत्यादौ काम्यस्याप्यर्थो व्याख्यातः। पुत्रीयति माणवकमित्यादौ तु आचारसदृशाचारः क्यजर्थस्तद्विशेषणीभूते आचारे प्रकृत्यर्थस्य विशेष्यीभूते च माणवकादेः कर्मत्वेनान्वयः तेन पुत्रकर्मकाचरणसदृशं यन्माणवककर्मकाचरणं तदनुकूलकृतिमानित्याकारकस्तत्र बोधः। पुत्रकर्मकाचरणञ्चेहान्नपानादिना संवर्द्धनतोषणादि। सर्पीयति शत्रुमित्यादौ सर्पकर्मकाचरणतुल्यं यच्छत्रुकर्मकाचरणं तदनुकूलकृतिमानित्यर्थः सर्पकर्मकाचरणञ्चात्र सर्पकर्मकताड़नमारणादि ग्राह्यम्। प्रासादे कुटीयतीत्यस्य कुट्यधिकरणकाचारसदृशो यः प्रासादाधिकरणकाचारस्तदनुकूलकृतिमानित्यर्थः कुट्यधिकरणकाचारश्चेह कुट्यधिकरणकशयनादिरूपो द्रष्टव्यः। कर्माधिकरणयोरेव सदृशारे क्यचोविधानात् वञ्चिकया इवाचरति धूलिर्दण्डेनेवाचरति चक्रेणेत्याद्यर्थे धूलिर्वञ्चिकयीयति चक्रेण दण्डीयतीत्यादिकः कर्तृकरणादेः सदृशाचारे अपप्रयोगः। मान्ताव्ययाभ्यां न स्यादित्यनुशिष्टेरिदमिच्छति स्वरिच्छति इत्याद्यर्थे इदमिवाचरती-

ख्याद्यर्थे च न क्यच्। गव्यति नाव्यतीत्यादावपि गामिच्छति गामिवाचरति इत्यादिरर्थः। ओदौद्भ्यां क्यचः स्वरवद्भावादवाद्यादेशः नमस्तपोवरिवसां कर्तृत्वेऽपि क्यचो विधानात् नमस्यति देवानित्यस्य देवनतिं तपस्यति शत्रुमित्यस्य शत्रुसन्तापं वरिवस्यति गुरूनित्यस्य च गुरूणां परिचर्य्यां करोतीत्यर्थः। श्येनायते काक इत्यादौ क्यङोऽपि आचारसदृशाचारोऽर्थः तत्र च प्रकृत्यर्थस्य श्येनादेः कर्तृत्वेनैव साकाङ्क्षत्वात् श्येनकर्तृकाचारसदृशाचारवान् काक इत्येव तत्र बोधः। श्येनकर्तृकाचारश्च मांसहरणादिर्ग्राह्यः। श्येनो इवाचरतीत्यर्थे श्येनायते काकीत्यत्र भाषितपुंस्कत्वात् क्यङि पुंवद्भावः गार्ग्यमिच्छतीत्याद्यर्थे गार्गीयतीत्यत्र क्यचीव गार्ग्य इवाचरतीत्याद्यर्थे गार्गीयते इत्यत्र क्यङ्प्यपत्यप्रत्ययस्य लोपः। तथा वाजीयतीत्यादौ नस्य। ओजायते अप्सरायते पयायते पयस्यते गर्दभति अश्वतीत्यादाप्युक्तरीत्यैवान्वयः ओजसप्सरसोर्नित्यं पयसः सो विभाषया। क्यङोऽपि लोपो द्रष्टव्यो गर्दभत्यश्वतीत्यत इति वचनादेषु सादेर्लोपः अत्रौजःपदस्यौजस्विपरत्वमिति निबन्धारः। गव्यते नाव्यते इत्यादेरपि गौरिवाचरतीत्यादिरर्थः पूर्ववदवादेशः पूर्वमनुन्मना उन्मनोवदाचरति इत्यर्थेऽप्युन्मनायते दुर्मनायते अवेहत् वेहदिवाचरतीत्यर्थे वेहायतीत्यादौ तस्य लुक्। गौर्गर्भघातिनी वेहत्। अलोहितो लोहितो भवतीत्यर्थे लोहितायति लोहितायते स्वरितत्वादुभयपदं सुखमनुभवति इत्यर्थे सुखायते एवं दुःखायते अलोकायते इत्यादि। शब्दं करोतीत्यर्थे शब्दायते एवं वैरायते कलहायते। गिलितस्य पुनश्चर्वणं रोमन्थः तं करोतीत्यर्थे रोमन्थायते गौः। मुण्डादेस्तत् करोत्यर्थे गृह्णात्यर्थे क्तादितः। वक्तीत्यर्थे च सत्यादेरङ्गेभ्यस्तन्निरस्यतीति भागुरिस्मृतेः नव

मुण्डयतीत्यत्र नरनिष्ठमुण्डनं जलं मिश्रयतीत्यत्र जलनिष्ठ-मिश्रणं वासः शिथिलयतीत्यत्र वासोनिष्ठशैथिल्यम् अन्नं मधुरयति इत्यत्रान्ननिष्ठमाधुर्य्यं चैत्रं मित्रयति इत्यत्र चैत्रनिष्ठमित्रत्वं करोतीत्यादिको नामप्रकृतिकस्य णेरर्थः। तत्र मुण्डादिपदस्य धर्मपरत्वात् मुण्डादिण्यन्तधात्वर्थतावच्छेदकीभूतफलवत्त्वाच्च नरादेः कर्मत्वमिति सम्प्रदायविदः। वासः पृथु मृदु भृशं वा करोतीत्यर्थे वासः प्रथयति म्रदयति भ्रशयति इत्यादावृतो रेफादेशः। तथा चैत्रं परिव्रढयति इत्यत्रापि। कण्ड्वादिभ्यस्तत् करोतीत्यर्थे यक्षेव न तु णिः तेन गात्रं कण्डूयति कण्डूयते वा इत्यत्र गात्रस्य कण्डुं करोतीत्यर्थः ञित्त्वादुभयपदम् एवं स्वर्गलोके महीं वसतिस्थानं करोतीत्यर्थे स्वर्गलोके महीयते ङानुबन्धेषु पाठादात्मनेपदं शब्दादिभ्यः करोतीत्यर्थे क्यङेत्युक्तम्। कृतयति वर्णयतीत्यादौ गृह्णातीत्यादिरर्थः सत्यापयति अर्थापयति वेदापयति इत्यत्र च सत्यं वक्तीत्यादिरर्थः सत्यादित्रिकादावागमस्य प्रियं स्थिरं वा वक्तीत्यर्थ प्रापयति स्थापयति इत्यादौ प्रियस्थिरादेः प्रस्थाद्यादेशोऽपि अश्वतरं वदतीत्यर्थे अश्वयति इत्यत्र तरप्रत्ययलोपस्य गोमन्तमाचष्टे इत्यर्थे गवयति गुणवन्तमाचष्टे इत्यर्थे गुणयति स्रग्विणमाचष्टे इत्यर्थे स्रजयति इत्यादौ तु मन्तुवन्तुविनां लुगपि तथा कर्त्तारमाचष्टे इत्यर्थे कारयतीत्यत्र तृचः अन्तिकमाचष्टे इत्यर्थे नेदयति वाढ़माचष्टे इत्यर्थे साधयति इत्यत्र चान्तिकवाढ़योर्नेदसाधौ च युवानमल्पं वा वदतीत्यर्थे कनयति युवाल्पयोः कन्वेत्यनुशिष्टेः पक्षे यवयति अल्पयति इत्यपि। स्थूलमाचष्टे दूरमाचष्टे इत्याद्यर्थे स्थूल दूरयुवह्रस्वक्षिप्रक्षुद्राणामन्तस्थादिलोपो गुणश्चेत्यनुशिष्टेः क्रमेण स्थवयति दवयति यवयति ह्रसयति क्षेपयति क्षोदयति इत्येव प्रयोगः। बहूनाचष्टे इत्यर्थे

भूययति बहो भू याटेशः। हस्ताद्यङ्गेभ्यस्तन्निरस्यतीत्यर्थेऽपि णिः तेन हस्तं निरस्यतीत्याद्यर्थे हस्तयते पादयते इत्यादि पूर्ववदात्मनेपदम्। तूस्ताद्विघाते संछादे वस्त्रात्पुच्छादितस्तथा। उत्क्षेपादौ कर्मणो णिस्तत्तदव्ययपूर्वत इति भागुरिस्मृतेः तूस्तं विनिहन्तीत्यर्थे वितूस्तयति तूस्तं केशजटा वस्त्रं संच्छादयतीत्यर्थे संवस्त्रयति पुच्छ मुत्क्षिपतीत्यर्थे उत्पुच्छयते गौः एवं परिपुच्छयते भाण्डानि सञ्चिनोतीत्यर्थे संभाण्डयते भिक्षुः चीवरं सम्मार्जयतीत्यर्थे सञ्चीवरयते। कर्मण इत्युक्तेस्तूस्तेन विनिहन्तीत्याद्यर्थे न णिः तूस्तयति प्रतूस्तयति इत्यादितः कथितार्थानामप्रतीतेस्तत्तदव्ययपूर्वकत्व-नियमः। वीणात उपगाने स्याद्धस्तितोऽतिक्रमे तथा। सेनातस्त्वभियाने णिः श्लोकादेरप्युपस्तुताविति भागुरिस्मृते-रत्रापि तत्तदव्ययपूर्वत इत्यनुषज्यते। तथा च वीणया उपगायतीत्यर्थे उपवीणयति यशः हस्तिनातिक्रामतीत्यर्थे अतिहस्तयति गृहं सेनयाभिमुखं यातीत्यर्थे अभिसेनयति समरं श्लोकैरुपस्तौतीत्यर्थे उपश्लोकयति शिवमित्यादिकः प्रयोगः। कर्मप्रत्यये तूपवीण्यते यश इत्यादि वीणादेः करण-तास्थल एवायं विधिरतो वीणायामुपगायतीत्याद्यर्थे न णिः साधुः। अशनधनाभ्यासाय उदकाय्नः कलोपश्च तदिच्छतीत्यर्थे तेन अशनायति धनायति उदन्यतीत्यादावशनमिच्छतीत्यादिरर्थः। अशनायादिकं धात्वन्तरमित्यपि वदन्ति। चैत्रं भावयति आत्मानं गमयति इत्यादौ धातुप्रकृतिकस्य णेरप्यनु-कूलव्यापारो व्यापारमात्रं वार्थः तत्र धात्वर्थस्यानुकूलतायाः संसर्गविधयापि भानसम्भवात् तेन तत्र चैत्रोत्पत्त्यनुकूलव्यापार-वान् आत्मगत्यनुकूलव्यापारवानित्यादिरर्थः। क्वचिज्ज्ञानानु-कूलव्यापारोऽपि ण्यर्थः यथा कथकः कंसं घातयति इत्यादौ

अभिनयादिरूपः । चुरादिभ्यस्तु स्वार्थिकस्य णेः स्वरूपमर्थः तेन चोरयति चिन्तयति इत्यादौ स्तेयादिस्वरूपस्यानुकूलकृतिमानित्यादिरर्थः । गुपूधूपविच्छिपणिपनेरायः कमेस्तु णिङ् । ऋतेर्नीयङ् चतुर्लेषु नित्यं स्वार्थे परत्र वेति भागुरिः । स्वार्थे स्वरूपार्थे तेन गोपायतीत्यस्य रक्षणस्वरूपं धूपायति इत्यस्य सन्तापस्वरूपं विच्छायतीत्यस्य गतिस्वरूपं पणायते इत्यस्य व्यवहारस्वरूपं स्तुतिस्वरूपं वा करोतीत्यर्थः । आकर्णयामास न वेदनादाक्रचोपलेभे वणिजां पणाया इति व्यवहारार्थे भट्टिः । पणायते इत्यस्य तु स्तुतिस्वरूपं करोतीत्येवार्थः स्वरूपार्थकत्वात् अल्पापि विप्रगोपाया स्वर्गानन्त्यप्रदा भवेदित्यादिकः प्रयोगः अल्पादेः क्रियाविशेषणत्वे क्लीवत्वापत्तेः इत्युक्तप्रायं स्वर्गं कामयते इत्यस्य स्वर्गगोचरेच्छास्वरूपवानित्यर्थः ङानुबन्धत्वादात्मनेपदम् ऋतीयते इत्यस्य घृणास्वरूपं करोतीत्यर्थः । परत्र वेत्युक्तेश्चतुर्लकारादन्यत्र गोप्ता गोपायिता कमिता कामयिता अर्त्तिता ऋतीयिता इत्यादिको द्विविधः प्रयोगः गुपो वधेश्च निन्दायां क्षमायाञ्च तथा तिजः । प्रतीकाराद्यर्थकाच्च कितः स्वार्थे सनो विधिरिति भागुरिः । तेन जुगुप्सते वीभत्सते इत्यत्र निन्दास्वरूपस्य कर्त्ता इत्यर्थः अतएव जुगुप्सा स्वल्पापि क्षपयति महत्त्वं परिषदीत्यादिकः प्रयोग तपस्तितिक्षते इत्यस्य तपःकर्मकसहनस्वरूपस्य कर्त्तेत्यर्थः चिकित्सत्यातुरमित्यस्यातुरकर्मकप्रतीकारस्वरूपं करोतीत्यर्थः रिपु विचिकित्सतीत्यस्य रिपुकर्मकनिग्रहस्वरूपं करोतीत्यर्थः विचिकित्सति मन्मनः इत्यादौ च मन्मनः सन्देहस्वरूपवदित्यर्थः एषामर्थान्तरे तिङो नाभिधानमिति भागवृत्तिः तेन संगोपननिशाननिवासाद्यर्थेषु गोपनं तेजनं केतनमित्यादिकमेव प्रत्युदाहरणं मानदानशानृभ्योऽपि स्वार्थे सन् तेन मान् पूजाय

विचारे वा इत्यस्य मीमांसते दान खण्डने इत्यस्य दीदांसते शान तेजने इत्यस्य शीशांसते इत्यत्राप्युक्तदिशैवान्वयः। पाकं चिकीर्षति ओदनं बुभुक्षते इत्यादाविच्छैव सनोऽर्थः तस्याञ्च द्वितीयान्तेन लभ्यस्य पाकादिविशेष्यताकत्वस्य स्वरूपसम्बन्धेन धात्वर्थस्य तु कृत्यादेः स्वसाध्यत्वादिप्रकारिनिष्ठस्वसमानकर्तृकत्वसम्बन्धेनान्वयात् पाकधर्मिका निरुक्तसम्बन्धेन कृतिमती या इच्छा तद्वानित्यादिरर्थः समानकर्तृत्वस्य निवेशात् अन्यदीयकृतिपाकादाविच्छावत्ययं चिकीर्षति पिपक्षति इत्यादिको न प्रयोगः इति चिन्तामणिकृतः। सोन्दडस्तु पाकं चिकीर्षतीत्यादौ द्वितीयार्थस्य विषयत्वस्य मूलधात्वर्थ एवान्वयः तदर्थस्य तु समानकर्तृकत्वविषयत्वाभ्यां सनर्थेच्छायां तथाच पाकविषयताककृतिसमानकर्तृकतद्गोचरेच्छावान् इत्यादिरेवार्थः कारकविभक्तेः क्रियायामेव स्वार्थबोधकत्वादत एव गृहं तिष्ठासतीत्यादिको न प्रयोगः स्थितेर्गृहकर्मकत्वबाधात् अन्यथा गृहधर्मिकां स्थितिप्रकारकेच्छां बोधयत्वयमेव प्रमाणं स्यात् न तु गृहे तिष्ठासतीत्यादिरिति प्राह। चिकीर्षादेः प्रवृत्त्यादिरूपेष्टसाधनत्वेन तद्गोचरेच्छासत्त्वेऽपीच्छार्थकसनन्तात् न सन्प्रत्ययः सनन्तान्न सनिष्यते इत्यनुशिष्टेरतश्चिकीर्षिषतीत्यादिको न प्रयोगः पापच्यते इत्यादौ यङः पौनःपुन्यमर्थः तच्च प्रकृतधात्वर्थजातीय क्रियोत्तरतादृशक्रियानन्तर्यरूपं प्रकृत्यर्थे विशेषणत्वेनान्वेति तेन पाकोत्तरपाकानन्तर्यवत् पाककर्त्ता इत्येवं तत्र वाक्यार्थः द्विः पक्तरि पुनः पक्तत्वेऽपि न निरुक्तं पुनः पुनः पक्तृत्वम् अतो न तत्र पापच्यते इति प्रयोगः पाकोत्तरत्वादिकञ्च तत्समानकर्तृत्वगर्भं बोध्यम् अतः पुमन्तरीय पाकाद्युत्तरत्वमादाय नातिप्रसङ्गः। तण्डलं पापच्यते इत्यादौ यङन्तधातूपस्थाप्ये सर्वत्रैव पाकादौ

तच्छुलकर्मत्वस्यान्वयो व्युत्पत्तिवैचित्र्यात् नातः क्रमेण मुद्गमाषौ पच्यौ तच्छुलस्य पक्तारि तथाविधप्रयोगः तुषेण पापच्यते इत्यादौ कारकान्तरमप्येतेन व्याख्यातं जंगम्यते चंक्रम्यते इत्यादौ धात्वर्थगतं पौनःपुन्यमिव कौटिल्यमपि यङोऽर्थः गत्यर्थात् कौटिल्य एव तद्विधानात् तेन पुनः पुनः कुटिलगतिमान् इत्येवं तत्र बोधः शेषं पूर्ववत्। लोलुप्यते चंचूर्य्यते जंजप्यते दंदश्यते जेगिल्यते इत्यादौ निन्दितत्वमपि तेन पुनः पुनर्गर्हितं लुम्पति चरतीत्यादिकस्तत्रार्थः। अत्रोत्सर्गत एव एकाचो हलादेरेव धातोर्यङ्विधानात् पुनः पुनः कथयति जागर्त्ति दरिद्रातीत्याद्यर्थे कथ्यादेर्न यङ् नापि पुनः पुनरेति एजते इत्यादाविन प्रभृतेः सूत्रप्रभृतिभ्यश्चेति विशेषविधेस्तु पुनः पुनरियर्त्ति अश्नाति अटतीत्याद्यर्थे अराय्यते अशाश्यते आटाट्यते इत्यादिकः प्रयोगः शुभिरुचिभ्यां तु न स्यात् पुनः पुनः शोभते रोचते इत्यर्थे शोशुभ्यते इत्यादेर्निराकाङ्क्षत्वादिति वदन्ति।

तद्धितं लक्षयति।

> विभक्त्यादिविकादन्यः प्रत्ययस्तद्धितं मतम्।
>
> नामप्रकृतिको नैवमतिव्याप्त्यादिदोषतः॥

विभक्तिधात्वंशकृद्भ्योऽन्यः प्रत्ययस्तद्धितं वृत्तक इत्यादौ क्त्वाद्यर्थकः कादिरपि तद्धितमेव तदन्यत्वेनापि प्रत्ययं विशेषयन्त्यन्ये नामप्रकृतिकप्रत्ययत्वन्तु न तद्धितस्य लक्षणं विभक्तौ क्यजादौ चातिव्याप्तेः पचतितरामित्यादौ तरामाद्यव्याप्तेश्च।

विभजते।

> तस्यापत्यं तद्विशेषस्तद्दृष्टेण युतेन्दुमान्।
>
> कालस्तथा तेन रक्तं तस्य व्यूहोऽथ वेत्ति तत्।

अधीते वा देवतास्य सेवमादीन् यथायथम्
बोधयद्विधानर्थांस्तद्धितं स्यादनेकधा ॥

तस्यापत्यस्य विशेषो गुर्वायत्तत्वप्रथमत्वादिः।

अपत्यार्थं व्याकुरुते।

अण् नाम्नोऽपत्यसामान्ये षष्ठ्यन्ताद्बाधकं विना।
अदन्तादिण् निषदादेरन्याचोऽक चेण्मीचितम्॥

षष्ठ्यन्तान्नाम्नः साक्षात्परम्परासाधारणापत्यसामान्ये बोध्ये अण् इत्युत्सर्गः स च मरीचेरपत्यं मारीचः काश्यपिरित्यादौ अपत्यविशेषभाने तु तद्धितभेदो वक्ष्यते मरीचिना अपत्यमित्यर्थे तु न षष्ठ्यन्तं नाम। अणो बाधकमाह अदन्तादिति अदन्तान्नाम्नो बाधकं विना इणेव दक्षस्यापत्यं दाक्षिः अस्यापत्यमिः इत्यादौ तत्रापि निषादादेरिणा अपत्यबोधने तदन्तिमाचोऽगादेशोऽपेक्षितः यथा नैषादकिः वैयासकिः चाण्डालकिरित्यादौ।

इणोऽपवादमाह।

शिवादिभ्यस्त्वणेव स्यात् ण्योगर्गादेर्गणात्तथा।
कुञ्जादेरायनण् ण्यश्च तस्मान्नैव स्त्रियामिति॥

शिववरुणककुत्स्थपुत्रप्रभृतिभ्योऽणेव नत्वदन्तादिण् मुनिषु वशिष्ठादिवृष्णिषु वसुदेवादिः कुरुषु नकुलादिश्च शिवादौ पाठ्यः तेन वाशिष्ठो वासुदेवः साहदेवः नाकुल इत्यादिरेव तत्र प्रयोगः शतानीकस्तु नाकुलिरित्यादौ क्वचिदपवादविषयेऽप्युत्सर्गविधिः प्रथमापत्यं वा तत्रार्थः। गर्गस्यापत्यमित्यर्थे गर्गादिगणात् ण्यः यथा गार्ग्यः काव्यः वात्स्यः पाराशर्य्यः कार्त्तवीर्य्यः जामदग्न्यः इत्यादौ अत्र गणादित्युक्ते गर्गो नाम कश्चित् तस्यापत्यमित्यर्थे गार्गिरित्येव एवमग्रेऽपि।

कुञ्जादेर्गणादपत्यसामान्ये आयनण् तदुत्तरं ण्यश्चास्त्रियां यथा कौञ्जायन्यः ब्राध्नायन्यः इत्यादौ स्त्रियान्तु कौञ्जायनीत्येव न तु ततोण्यः सुमङ्गलादित्वात् ङीप् । अत्रास्त्रियामित्यबहुलस्याप्युपलक्षकं तेन कौञ्जायनाः पुमांस इत्यत्रापि न ण्यः । गार्गिः कौञ्जिरित्यादौ नापत्यत्वेन बोधः किन्तु प्रथमापत्यत्वेनेति वक्ष्यते ।

अदन्ताच्छिल्पिनो ण्योवा सेनान्ताल्लक्षणादपि ।
नडादेर्णायनो नित्यं बाह्वादेस्त्रिण् विधीयते ॥

तान्तवाय्यस्तान्तवायिः कौम्भकार्य्यः कौम्भकारिरित्यादौ शिल्पिवाचकात् महासैन्यो महासैनिरित्यादौ च सेनान्तात् लाक्षण्यो लाक्षणिरित्यादौ लक्षणशब्दादिणि प्राप्ते विभाषया ण्यः तथा नडादेर्णायनो नित्यं तेन नाडायनः चारायण इत्यादौ कुञ्जाद्यन्तर्गतो नडादिः बाह्वादेस्त्रिण् यथा बाहोरपत्यं बाहविः सुमित्राप्रभृतयस्तु बाह्वादिगणे द्रष्टव्याः ।

अणोऽपवादान्तरमाह ।

स्त्रीप्रत्ययान्तादत्र्यादेरप्येयण् पारिभाषिकात् ।
न नदीमानुषीनाम्न आदावाद्वृद्धिवर्जितात् ॥

विनतायाः सौपर्ण्याः कमण्डल्वाः युवत्या वाऽपत्यमित्यर्थे वैनतेयः सौपर्णेयः कामण्डलेयः यौवतेय इत्यादौ स्त्रीप्रत्ययान्तादेयण्येव नत्वण् अत्रेरपत्यमित्यर्थे आत्रेयः अत्रिपदमप्रत्ययेदन्तद्विस्वरनाम्नि पारिभाषिकं तेन शौचेयः हारेयः आग्नेयः इत्यादिकः प्रयोगः । विध्यादिकं द्विस्वरमपि नाप्रत्यये दन्तं मरीच्यादिकमप्रत्ययेदन्तमपि न द्विस्वरमतो वैधो मारीच इत्यादौ न प्रसङ्गः स्त्रीप्रत्ययान्तादप्यादावाद्वृद्धिवर्जितात् नदीमानुषीनाम्नोनैयण् यथा यामुनः सैप्रः सारस्वतः इत्यादौ यथा वा सौभद्रः कौशल्य इत्यादौ आदावाद्वृद्धिमतस्तु

ादृशनाम्नो यथा प्रामेयश्चेव यथा जाह्नवेयः द्रौपदेयः कौश-
ेयः इत्यादौ।

तथा।

सुभगादेरिनादेशोऽप्यन्त्यस्यैयणि नित्यशः।
कुलटाया विकल्पेन सती यदि भवत्यसौ॥

सुभगाप्रभृतेरेयण्न्तस्वरस्य नित्यमिनादेशो यथा सुभगाया अपत्यमित्यर्थे सौभागिनेयः दौर्भागिनेय पारस्त्रैणेय इत्यादौ सौहार्दवदिहोभयपदस्य वृद्धिः। सुभगा दुर्भगा चैव परस्त्री वन्धकी तथा। मध्यमा च कनिष्ठा चेत्यादिकः सुभगागणः। कुलटा तु यदि सती तदा तदन्त्यस्वरस्यैयणि विभाषया इनादेशो यथा कौलटिनेयः कौलटेय इत्यादौ यदि त्वसती तदा कौलटेय इत्येव प्रयोगः।

तथा।

शीलेनाङ्गेन वा हीनात् स्त्रियामाद्यादितस्तु वा।
एरण् स्याच्चटकायाश्च नित्यमैरण् स्त्रियान्तु लुक्॥

शीलेन हीनानां दास्यादीनाम् अङ्गेन हीनानां काणादीनाञ्च स्त्रीप्रत्ययान्तानामेरण् वा स्यात् यथा दास्या अपत्यं दासेयः दासेरः यथावा काणाया अपत्यं काणेयः काणेरः कुलटाप्यङ्गहीना चेत् कौलटेर इति चटकायास्त्वपत्यमित्यर्थे नित्यमैरण् नत्वेयणपि यथा चाटकैरः चटकास्त्र्यापत्ये तु तस्य लुक् तेन चटकेत्येव तत्र प्रयोगः।

तथा।

तिकादेरायनिण् नित्यं तदादेस्तु विभाषया।
ईयः स्वसुः स च व्यश्च भ्रातुर्य्यः श्वशुराद्भवेत्॥

तिकस्यापत्यमित्यर्थे नित्यमायनिण् यथा तैकायनिः कौशल्यायनिरित्यादौ कौशल्यायनिवत्क्षमामिति भट्टिः। स च तदादेः

सर्वनाम्नो वैकल्पिकः यथा तस्यापत्यमित्याद्यर्थे तादायनिः ता
यादायनिः याद इत्यादौ स्वसुरपत्यमित्यर्थे स्वस्रीयः भ्रातु
पत्यमित्यर्थे भ्रात्रीयः भ्रातृव्यः इष्टरि तु भ्रातृव्यशब्दो र
एव तदुक्तं भ्रातृव्यौ भ्रातृजद्विषाविति श्वशुरस्यापत्यमित्य
यः श्वशुर्य्यः।

तथा।

कुलाद्य एयकञीनः सपूर्व्वात् केवलादपि।
महाकुलादञीनञ च दुष्कुलादेयणो विधिः॥

कुलस्यापत्यमित्यर्थे यः एयकण् च स्यात् यथा कुल्यः
कौलेयकः सपूर्वात् केवलाच्च कुलादीनः स्यात् यथा आढ्य
कुलीनः कुलीन इत्यादौ महाकुलादण् ईनण् च स्यात् यथा
माहाकुलो माहाकुलीनः दुष्कुलादेयण् यथा दौष्कुलेयः।
केनापि दौष्कुलेयेन कुल्यां माहाकुलीं प्रियाम्। इतां महा
कुलीनस्य तस्य लिप्सामहे वयमिति भट्टिः। कथं महा
कुलीनो दुष्कुलीनः सपूर्वादीन् महदादेः कुलीनेनान्वय
इत्यन्ये।

देशचत्रिययो रूढ़ाद्राज्ञ्यपत्येऽप्यणो विधिः।
नादेः कुरोः कोशलाच्च ण्यस्तथेदन्ततोऽप्यसौ॥

देशे चत्रिये च शक्तान्नाम्नो राजन्यपत्यार्थे अणोविधि
यथा पञ्चालानां राजापत्यं वा इत्यर्थे पाञ्चालः एवं वैदेहः एवं
ऐक्ष्वाकः। क्वचिदणादावप्युवर्णस्य लोपः नकारादेरुक्तरूढ़ात्
कुरुतः कोशलाच्च तादृशार्थे ण्यएव यथा नैषध्यः कौरव्यः
कौशल्यः इत्यादौ। कथं हिरण्मयं हंसमबोधि नैषधः परि
रेभिरे कुकुरकौरवस्त्रिय इति यदि तस्येदमित्यण्। इदन्ता
दप्युक्तरूढ़ात् ण्यः यथा कौन्त्यः आवन्त्यः इत्यादौ कथं
कौन्तेयः कुन्तीशब्दात् स्त्रीप्रत्ययान्तात् एयण्। स्त्रियान्

त्स्ववन्तिकुरुभ्यो ण्यस्य लुगेव यथा कुन्तीनां स्त्र्यपत्यमित्यर्थे
न्ती एवमवन्ती कुरुः। कम्बोजादेरपि रूढ़ादपत्ये राजनि
विहितस्याणो लुगेव यथा कम्बोजानामपत्यं राजा वा इत्यर्थे
म्बोजश्चोलः केरल इत्यादौ।

संख्यासंभद्रपूर्वाया ङ्उरणमातुः स्त्रियाञ्च ङीप्।
गोर्यो ण्यस्तु यमादित्यादितिभ्यः स्याद्दितेरपि॥

द्वयोर्मात्रोरपत्यमित्यर्थे द्वैमातुरः त्रैमातुरः षाण्मातुरः
म्बरः कुमार इत्यमरः षाण्मातुरः भाद्रमातुरः स्त्रियान्तु
त्वात् ङीप् द्वैमातुरीत्यादि गोरपत्यमित्यर्थे य एव गव्यो
ः। एवं यमस्यापत्यं याम्यः आदित्यस्यापत्यमादित्यः
देतेरपत्यमित्यर्थे आदित्यः दितेरपत्यं दैत्य इत्यादौ ण्यएव
आदितेयः दैतेयः आदितिदितिभ्यां स्त्रीप्रत्ययान्तत्वादेयण्।

अपत्यम्।

नापत्यप्रत्ययान्तात् स्यादपत्यप्रत्ययः पुनः।
गुर्वायत्ते त्वपत्ये स्यात् पुनर्यूनीति तद्विधेः॥

उपगोरपत्यस्यापत्यमित्यर्थे औपगवादिपदेभ्यो नापत्य-
ययः अतएव एकोगोत्रे इति पाणिनिरप्याह एकः केवलोऽ-
यप्रत्ययं विना कृतएव शब्दो गोत्रेऽपत्यसामान्ये विहित-
ययस्य साकाङ्क्ष इति तदर्थः पुनर्यूनीति विध्यन्तरसत्त्वादेव
पगवस्य गुर्वायत्तापत्यमित्यर्थे औपगविः गार्ग्यायण इत्यादौ
रपत्यप्रत्ययः गुर्वायत्तं यत् प्रशस्तं तदपत्यं युवोच्यते इति
ाः।

ण्यान्तेयन्तादायनण स्यात् कौञ्जायन्यादिवर्जितात्।
गुर्वायत्ते केवलाच्च द्रोणादेष विभाषया॥

ण्यान्तादिञन्ताच्च गुर्वायत्तापत्यस्य बोधने आयनण् स्यात्
। गार्ग्यस्य गुर्वायत्तापत्यमित्यर्थे गार्ग्यायणः वात्स्यायनः

दाचायण इत्यादौ। ण्यान्तादपि कुञ्जादिगणान्नासौ तेन त
कौञ्जायन्योऽयमित्यादिरेव प्रयोगः। केवलादपत्यप्रत्ययशून्यादि
द्रोणादायनण् यथा द्रोणस्य प्रशस्तापत्यं द्रौणायनोऽश्वत्थाम
विभाषयेत्युक्तेः पक्षे द्रौणिरित्येव।

गर्गादेरपि कुञ्जादेः प्रथमापत्यबोधने।
इञेव स्यान्न तु ण्यः स्यान्नायनण् स्यादिति स्थितिः।

गर्गस्य प्रथमापत्यमित्यर्थे गार्गिर्वात्सिरित्यादौ न ण्य
किन्त्विञेव तथा कुञ्जस्य प्रथमापत्यमित्यर्थे कौञ्जिर्मौञ्जि
रित्यादावपि नायनण्।

अपत्यविशेषः।

तद्‌दक्षेणेन्दुमत्काले तन्नक्षत्रादणो विधिः।
नक्षत्रद्वन्द्वतस्त्वौ यः कथितार्थे विधीयते॥

पुष्येण सहेन्दुमदित्यर्थे पौषं दिनं पौषी रात्रिः एवमाश्वि
श्रावणं कार्त्तिकमित्यादौ। तद्‌दक्षेणेन्दुमत्काल इत्येव नात
पुष्येण सहेन्दुमत् पुरमित्यर्थे पौषं पुरमित्यादिकप्रयोगः नक्षत्र
द्वन्द्वात् कथितार्थे अणो बाधक ईय एव यथा पुष्यपुनर्वसुभ्य
सहेन्दुमद्दिनं पुष्यपुनर्वसवीयम् एवमश्विनीभरणीया रात्रि
रित्यादिप्रयोगः।

नक्षत्रेण युतेन्दुमत्

तद्रागयुक्तमित्यर्थे तस्मादण् स्यादिकण् पुनः।
लाक्षातो रोचनातश्च शकलात्कर्दमात् स वा॥

हरिद्राया रागयुक्तमित्यर्थेऽण् यथा हारिद्रं वासः ए
कौसुम्भं लाक्षया रक्तमित्यर्थे नित्यमिकण् यथा लाक्षिकं रा
निकं शकलकर्दमाभ्यां तेन रक्तमित्यर्थे विभाषयेकण् य
शाकलिकः शाकलः कार्दमिकः कार्दमः इत्यादौ।

तथा।

नीलात्: कस्तथा पीतात् विलिङ्गादपि नित्यश:।
स्वभावरक्ते गौण्या तु वृत्त्या तद्धितमुच्यते॥

नीलेन नील्या वा रक्तमित्यर्थे नित्यप्रत्ययो यथा नील: पट इत्यादौ पीतेन पीतया वा रक्तमित्यर्थे तु नित्यं कप्रत्ययो यथा पीतक: पट इत्यादौ हारिद्र: कुक्कुटपाद: लाक्षिकमधरं पीतकं स्वर्णमित्यादौ स्वभावसिद्धपीतादौ गौणवृत्त्या हरिद्राद्यै रक्तसदृशे तद्धितं प्रयुज्यते।

तेन रक्तम्।

तेषां समूह इत्यर्थेऽप्यण् पाशादिस्तु य: स्त्रियाम्।
गर्गादिगोत्रादुक्षादेश्चाकस्त्रीयस्तु वाश्वत:॥

काकानां समूह: काकम् एवं शुकानां समूह: शौकं भिक्षाणां समूह: भैक्षं युवतीनां समूह इत्यर्थे यौवतमिति जयादित्य:। तद्धितानपत्यस्वरे पुंवद्भावात् यौवनमिति तु भागवृत्ति: अतएव यमुपास्ते पुण्यभाजं कलाकुशलयौवनम्। सरसं नित्यश-स्तन्वि सफलं तस्य यौवनमिति तन्मते प्रयोग:। पाशानां समूह इत्याद्यर्थे तु तेभ्यो यएव तदन्तश्च स्त्रीलिङ्ग एव यथा पाश्या धूल्या वात्या वन्या शल्येति खलरथावपि पाशादौ पठन्ति यथा खल्या रथ्या इति। तथा गर्गादिगोत्रेभ्य: समूहेऽकण् गार्गकं दाक्षकमित्यादौ उक्ष्णां समूह इत्यर्थेऽप्यसौ यथा औक्षकम् औष्ट्रकमित्यादौ। उक्षोष्ट्रोरभ्रवत्साजा राजा राजान्यकस्तथा। राजपुत्रो मनुष्यश्च वृद्ध उक्षादिको गण:। अश्वानां समूहे त्वीयो विभाषया यथा अश्वीयमाश्वमिति।

धेनोरनञ: कण् नित्यं केदाराद्यश्विकण्वकण्।
पिष्टात् कवचिहस्तिभ्याश्चैकण् केशादिकण् यणौ।

धेनूनां समूहो धैनुकम् अधेनोस्त्वाधेनवमित्यणेव अस्मा-

देवानश्च इति निषेधात् सामूहिकप्रत्ययेषु तदन्तविधिरिष्टव्यः तेन सुन्दरगर्गाणां समूह इत्यर्थे सौन्दरगर्गकमित्यादि साध्विति शाब्दिकाः। केदाराणां समूह इत्यर्थे यणि कैदार्य्यम् इकणि कैदारिकम् अकणि कैदारकम् इति त्रिधा प्रयोगः। पिष्टार्थकात् कवचितो हस्तितश्चकण् यथा पूपानां समूहः पौपिकं शाष्कुलिकं तथा कवचिनां समूहः कावचिकं हस्तिनां हस्तिनीनां वा समूहो हास्तिकम्। केशानां समूहे त्विकण् यण् च कैशिकं कैश्यम्।

इनिः खलोलूकपद्माद्रथात् कड्यः स्त्रियामिमौ।
गणिकातो ब्राह्मणाच्च मानवाद्वाडवाच्च यण्॥

खलादिस्त्रिकादिनिः समूहे यथा खलिनी उलूकिनी पद्मिनी। तथा रथात् कड्यः यथा रथकड्येति इमौ च प्रत्ययौ स्त्रियामेव। गणिकादिभ्यस्तु समूहे यण् यथा गाणिक्यं ब्राह्मण्यं मानव्यं बाडव्यमिति।

गजबन्धुजनग्रामसहायेभ्यस्तु तः स्त्रियाम्।
पृष्टाद्यत क्लीवलिङ्गं तत् चरणेभ्यस्तु धर्मवत्।

गजता बन्धुता जनता सहायता इत्यत्र गजादीनां समूहेऽर्थे तप्रत्ययः स च स्त्रीलिङ्ग एव। पृष्ठात् समूहे यत् यथा पृष्ठ्यं तच्च क्लीवलिङ्गमेव अतएवास्य पाशादिषु अनन्तर्भावः चरणेभ्यस्तु समूहे धर्म इव प्रत्ययाः स्युः यथा कठानां धर्मः काठकं तथा समूहोऽपि एवं छान्दोग्यमाथर्वणमित्यादि।

तत्समूहः।

तद्वेत्ति तदधीते वेत्यर्थेऽप्यण् क्रतुवाचिनः।
स्वान्तादप्यकल्पादेरुक्थादेश्चेकणो विधिः॥

निमित्तं वेत्तीत्यर्थे नैमित्तः एवमौत्पातः मौहूर्त्तः छन्दो

वेत्त्यधीते वेत्यर्थे छान्दसः वैयाकरणः क्रतुवाचिनोऽग्निष्टो-
मादेस्त्विकण् यथा अग्निष्टोमं वेत्ति अधीते वा आग्निष्टोमिकः
अकल्पादेः सूत्रान्तशब्दादप्युक्तार्थे इकण् यथा वार्त्तिक-
सूत्रिकः सांख्यसूत्रिकः कल्पादेस्तु सूत्रात् काल्पसूत्र इत्यणेव।
उक्थं वेत्त्यधीते वा इत्यर्थेऽप्यौक्थिकः नैयायिकः पातञ्जलिकः
लोकायतं बौद्धशास्त्रं तद्वेत्त्यधीते वा लौकायतिक इत्यादि।

विद्यान्तादङ्गधर्मक्षत्रवानुत्तरवर्त्तिनः।
तथैकण् शतषष्टिभ्यां पथस्य तु पथष्टिकः॥

वायसविद्यां वेत्त्यधीते वा वायसविद्यिकः सर्पविद्यिकः
चारविद्यिकः। अङ्गाद्यनुत्तरवर्त्तिनः किम् आङ्गविद्यः ज्योति-
र्विद्यः गान्धर्ववैद्यः धार्मविद्यः क्षात्रविद्यः त्र्यवयवा विद्या
त्रिविद्या तां वेत्ति अधीते वा त्रैविद्य इति कर्मधारयादण्।
त्रैविद्या मां सोमपाः पूतपापा इति गीता। तिस्रो विद्या
वेत्तीत्याद्यर्थे तु द्विगुतस्तद्धितस्य लुकि त्रिविद्य इत्येवम्।
शतपथं षष्टिपथं वेत्तीत्याद्यर्थे टिकः शतपथिकः षष्टिपथिकः
स्त्रियान्तु शतपथिकीत्यादि।

क्रमादिभ्यः कएव स्यात् पदात् कः स्यादिकस्तथा।
सर्वादेरथ साद्यादेर्वेत्तीत्याद्यर्थकस्य लुक्॥

क्रमं वेत्तीत्याद्यर्थे क्रमादिभ्यः कएव यथा क्रमकः सामकः
शिक्षकः मीमांसक इत्यादौ। पदात्तु कः स्यादिकोऽपि यथा
पदकः पदिकः। सर्वादेः साद्यादेश्च शब्दाद्विहितस्य वेत्त्यधीते
वेत्यर्थकस्य तद्धितस्य लुगेव यथा सर्वं वेदं वेत्तीत्याद्यर्थे विहित-
स्याण् प्रभृतेः सर्ववेदः सर्वतन्त्र इत्यादौ सादिवार्त्तिक इत्यादौ
चेति।

अष्टाध्यायादितः कः स्यादध्यायस्य च लुक् तथा।
अध्यायसंख्यार्थककाद्वेत्त्याद्यर्थस्य लुक परे॥

अष्टावध्याया यस्य तदष्टाध्यायसूत्रं तद्वेत्ति अधीते वेत्यर्थे कः अध्याय पदस्य च लुक् यथाष्टकाः पाणिनीयाः पञ्चकाः गौतमीयाः दशकाः व्याघ्रपदीयाः जैमिनीयाः परे पुनरष्टाव-ध्यायसंख्या यस्य इत्यर्थे कप्रत्ययं कृत्वा तद्वेत्त्याद्यर्थकस्य तद्धि-तस्य लोपमाहुः ।

तद्वेत्त्यधीते वा ।

तस्येदमिति सम्बन्धिन्यपि तस्मादणो विधिः ।
स्वराजपरदेवेभ्यः कादिरीयोजनादपि ॥

तस्येदमित्येवं तत्सम्बन्धिन्यर्थे तदर्थकादण् इत्युत्सर्गः यथा वृक्षस्येदं वार्क्षं एवं दार्शदमित्यादि । स्वस्येदमित्याद्यर्थे तु स्वराजादिभ्यः कादिरीयो यथा स्वकीयं राजकीयं परकीयं देवकीयं जनकीयमिति । स्वतः कस्यानित्यत्वम् अतएव स्वीयं यदन्यभिन्नं पदमिति मणिदीधितिरिति वदन्ति ।

ईयस्त्यदादेर्भवतस्तव तीद इत्यपि ।
परावरादितोऽप्यर्द्धात् यदिकक्षपि दिक्परात् ॥

त्यस्येदमित्याद्यर्थे त्यदादिगणादीयः यथा त्यदीयं तदीयं मदीयं इदमीयमित्यादि । भवतस्तु त्यदादेरीये परतः तस्य दादेशोऽपि यथा भवदीयं नये स्वरे तद्धित इति पदान्तविधे-र्निषेधादस्य विधिः । शत्रन्तस्य तु भवतस्तस्येदमित्यर्थे भाव-तमित्यणेव । पराद्युत्तरवर्त्तिनोऽर्द्धादपि न केवलाच्च तस्मात् परार्द्धस्येदमित्यर्थे यदेव । यथा परार्द्धीयं अवरार्द्धीयं आर्द्धीयं आदिपदात् उत्तरार्द्धीयं अधमार्द्धीयं दिग्वाचिपूर्वकात् पुनरर्द्धात् यदिकक्षपि यथा पूर्वार्द्धीयं पौर्वार्द्धिकं दक्षिणार्द्धीयं दाक्षिणा-र्द्धिकमित्यादि ।

युष्माकास्माकभावान्ते वाणीनण् युष्मदस्मदोः ।
तवेत्यस्मात्ममेत्यस्मादणीनक्षपि कादिमः ॥

युवयोर्युष्माकं वा इदं आवयोरस्माकं वा इदमित्यर्थे युष्मदस्मदोर्युष्माकास्माकभावोऽत्तरमणोनण् च वा स्यात् यथा यौष्माकम् यौष्माकीणम् आस्माकम् आस्माकीनम्। आस्माकदन्तिसान्निध्यवामनोभूतभूरुहः। पक्षे त्यदादित्वादीयो यथा युष्मदीयमस्मदीयमिति। तवेदं ममेदमित्यर्थे तवममेत्यनयोरणीनस्वपि कादिकः स्यात् यथा तावकं तावकीनं स्वल्पनिर्देशाच्च त्वदादेशः। अपिना त्यदादित्वादीयोऽपि यथा त्वदीयं मदीयमिति।

कक्षारण्याङ्गस्तिवत्सं विहाराध्यायमानुषे।
नित्यं वा गोमयेऽन्यत्र णः सदा स्यादिति स्थितिः॥

अरण्यस्यायं हस्तीत्याद्यर्थे अरण्यान्नित्यं कण् यथा आरण्यकः करी पन्था विहारो मानुषश्च अध्यायस्त्वरण्यगीतत्वादारण्यकः। गोमये त्वरण्यस्येदमित्यर्थे आरण्यकमारण्यं वा गोमयमिति द्विधा प्रयोगः। कथितेभ्योऽन्यस्मिन्नर्थेऽरण्यान्नित्यं णप्रत्यय एव यथा अरण्यस्येयमित्यर्थे आरण्या लता आरण्यः पशुरित्यादि

तस्येदम्।

अण् तत्र भव इत्यर्थे पदादुत्तवर्गतो भवेत्।
ग्रीवात एयण् वा तत्र ग्रैवं ग्रैवेयमित्यपि॥

भव इत्यस्य उत्पत्तिवर्त्तमानत्वे द्यर्थौ यथायथम्।

आदेर्मध्यात्तथाग्रार्थे मोऽधसः सस्य लुक् तथा।
डिमोऽप्यपश्चादन्तेभ्यः कालार्थात्तु पदादिकण्॥

आदौ भवः आदिमः भवो वर्त्तमान इति वर्त्तमानवृत्तिः। मणिर्विराजते तन्वि तवायं हारमध्यमः। अधो भव इत्यर्थेऽधसः सलोपादधमः। यदङ्गमधमं तस्य स्पर्शनं दुरितावहमिति स्मृतेः। अग्रे भव इत्यर्थे डिमः अग्रिमः एवं पश्चिमः अन्तिमः

कालार्थकाश्वासादिशब्दात्तु तत्र भव इत्यर्थे इकण् यथा मासिकं सांवत्सरिकं मौहूर्त्तिकं पौर्वाह्णिकं आपराह्णिकमित्यादि।

शरदः श्राद्धएवायं वा तु रोगे तथातपे।
निशातश्च प्रदोषाच्च वायं तादिस्तथा श्वसः॥

अयमिकण्प्रत्ययः तथार्थे शरच्छब्दात् श्राद्ध एव साकाङ्क्षः यथा शारदिकं श्राद्धम्। अन्यत्र शारदश्चन्द्रमाः। रोगातपयोस्त्वर्थयोरयं वैकल्पिकः यथा शारदः शारदिको ज्वरः आतपश्च। निशायां प्रदोषे वा भव इत्यर्थे नैशिकं नैशं वा प्रादोषिकं प्रादोषं वा तम इत्यादि। श्वसः श्वःपदात्तु तादिरयमिकण्प्रत्ययस्तथा विकल्पेनेत्यर्थः तेन श्वोभवमित्यर्थे शौवस्तिकं धनम्। शौवस्तिकत्वं विभवा न येषां व्रजन्ति तेषां दयसे न कस्मादिति भट्टिः। पक्षे श्वस्त्यं श्वस्तनमिति त्यतनौ वक्ष्येते।

सन्ध्यादेश्चर्त्तुनक्षत्रभेदाच्चाण् कले पुनः।
संवत्सरात् पर्वणि च प्रावृषस्त्वेण्यमीरितम्॥

सन्ध्यादिगणात्तत्र भवमित्यर्थे अणेव यथा सान्ध्यं सन्धिवेलं आमावस्यं त्रयोदशं चातुर्दशं पाञ्चदशं पौर्णमासं प्रातिपदं वा तमः इति अत्र ऋतुभेदो ग्रीष्मादिः तस्मात्तत्र भवमित्यर्थे ग्रैष्मं शैशिरं तदन्तविधिना पूर्वग्रैष्मम् अवयवादृतूनामित्युत्तरस्य वृद्धिः। नक्षत्रभेदात्तु पुष्ये भवं पौषं औषधं तैषं रौहिणमित्यादि। संवत्सरात्तु फले पर्वणि च भवार्थेऽस्येव यथा सांवत्सरं फलं पर्व वा अन्यत्र तु कालार्थत्वादिकण् यथा सांवत्सरिकं कर्म प्रावृषि भव इत्यर्थे एण्यः यथा प्रावृषेण्यं तृणम्। प्रावृषेण्यं पयोवाहमिति रघुकाव्यम्।

वर्षातः स्यादिकण् हेमन्तादश्चाप्यत्र वा तलुक।
सायं चिरं प्रगे प्राह्णे कालार्थाव्ययतस्तनट॥

वर्षासु भवं वार्षिकं तृणम्। हेमन्ताद्भवार्थे यथेकण् तथा अस्यपि परत्वणि तकारस्य वा लुक् तेन हैमन्तिकं हैमनं हैमन्तमिति त्रिविधप्रयोगः। तदन्तविधिना पूर्वहैमनमित्यादिरपि प्रयोगः। सायमादिभ्यस्तु सायन्तनं चिरन्तनं प्रगेतनं प्राह्णेतनं दिवातनं दोषातनमित्यादौ भवार्थे तनट् टानुबन्धत्वात् सायन्तनी तिथिः।

परुतश्च परारेश्च चिराच्च त्नो विभाषया।
पुराशब्दात्तथा नोवा मध्याह्नादेश्च वा तनट्॥

परुत्नं परारित्नं चिरत्नं पक्षे परुत्तनं परारितनं चिरतनं पुरा शब्दादपि भवार्थे वा नः तेन पुराणं पुरातनमिति।

तदापन्नात्तु कालात् स्यादिकण् ङीप् वा स्त्रियां ततः।
मनुष्ये पर्वतादीयश्चैयोऽन्यत्र विभाषया॥

तत्काले भवमित्यर्थे तत्कालशब्दादिकण् तात्कालिको बोधः एव मापत्कालिकः तदन्तस्य स्त्रियां वा ङीप् यथा तात्कालिकी तात्कालिका मतिरित्यादौ। पर्वते भवो मनुष्य इत्यर्थे पर्वतादीयण् पार्वतीयो नरः ततोऽन्यत्र तु पर्वतीयं पार्वतं वा फलमित्यादावस्यपि।

दिगादिभ्यो यदेव स्याच्छरीरावयवादपि।
हृतिवस्त्यस्थिकुक्षिभ्य एयण् स्यात् कलसादेः॥

दिशि भवमित्यर्थे दिश्यम् एवमाद्यम् अन्त्यं रहस्यं दिव्यं उदर्यं यूथ्यं वर्ग्यं दण्ड्यमित्यादौ यत्। शरीरावयवादपि यथा दन्ते भवमित्यर्थे दन्त्यम् एवं कण्ठ्यम् ओष्ठ्यं मूर्द्धन्यं मुख्यं जरव्यम् इत्यादौ। हृतौ भवमित्यर्थे तु हृत्यादेरेयणेव यथा दार्त्तेयं वास्तेयं अस्थेयं कौक्षेयम्। असिं कौक्षेयमुद्यम्य स्वकारापनसं मुखमिति भट्टिः। कालसेयम् आहेयति।

चतुर्मासादयज्ञे यज्ञव्ययीभावतस्तथा।
अन्तःपूर्वादिकश्चैवं समानात्तत्पुरादपि।

चतुर्मासेषु भवमित्यर्थे चातुर्मास्यं व्रतं चतुःपदस्याषाढादिचतुष्कत्वेन लक्षकत्वाभावात् द्विगुरतः पञ्चकपालस्वरूरित्यत्रैव द्विगोस्तद्धितस्य न लुक्। यज्ञे तु चातुर्मासो यागः इत्यस्यैव अन्तःपूर्वादव्ययीभावाद्भवार्थे इकण् यथा आन्तर्दैहिकम् आन्तर्गणिकम्। अव्ययीभावादित्येव तेनान्तःकरणे भवमान्तःकरणं दुःखमित्यस्यैव समानात्तत्पुराच्च यथा समाने भवं सामानिकम्। सामानिकोऽयं युवयोः प्रयासः। समानदैशिकम्।

काद्यन्तवर्गादीयः स्याज्जिह्वामूलाङ्गुलादपि।
मित्राद्युत्तरतो वर्गात् यदीनावीय एव च॥

कवर्गे भवः कवर्गीयो वर्णः इतीयः। एवञ्चवर्गीयः टवर्गीयः इत्यादि। जिह्वामूलादङ्गुलाच्च जिह्वामूलीयः अङ्गुलीयः। मित्राद्युत्तरवर्गात् तु प्रत्ययत्रिकं यथा मित्रवर्गे भव इत्यर्थे मित्रवर्ग्यः मित्रवर्गीणः मित्रवर्गीयः इत्यादि।

स्त्रीपुंभ्यां नञ्स्नञौ तत्र भवे भावे तु वा तयोः।
स्वरादौ तद्धिते प्राप्ते गोर्यदेव विधीयते॥

स्त्रियां भवः स्त्रैणः। स्त्रैणेन नीता विकृतिं लघिम्ना इति भट्टिः। पुंसि भवः पौंस्नः। स्त्रियाः पुंसश्च भावेऽर्थे तु नञ्स्नञौ विकल्पेन स्याताम्। तेन स्त्रिया भावः स्त्रैणं स्त्रीत्वञ्च पुंसो भावः पौंस्नं पुंस्त्वञ्च। गोपदात्तु यद्यदर्थे स्वरादितद्धितं प्रसक्तं तत्तदर्थे तदेव साकाङ्क्षं तेन गोरपत्यं गौर्देवता यस्य गवा चरति गोः समूह इत्याद्यर्थे गव्यमित्येव प्रयोगः। गोत्वं गोवदित्यादौ तु त्वादिको न स्वरादिः।

तत्र भवः।

ये भवार्थे यतः प्रोक्तास्तद्धितप्रत्ययाः पुरा ।
जातेऽर्थेऽपि ततस्ते स्युर्विशेषविधिना विना ॥

मथुरायां भवः इत्यर्थे इव मथुरायां जात इत्यर्थेऽप्यणोऽतिदेशः। एवं स्त्रैणः पौंस्नः ग्राम्यः ग्रामीणः इत्यादौ गणादेरपि प्रावृष एण्य प्रामाविकः प्रदोषादेरिकणादिप्राप्तौ च कादिर्विशेषविधेर्वक्ष्यते ।

प्रावृषस्तत्र जातेऽर्थे स्यादिकः शरदस्त्विकण् ।
संज्ञायां विहितः पूर्वाह्णापराह्णादितस्तु कः ॥

प्रावृषि जातमित्यर्थे प्रावृषिकं पत्रं प्रावृषिका वृष्टिः। शरदि जातमित्यर्थे तु संज्ञायामिकण् यथा शारदिकाः मुद्गप्रभेदाः शारदमन्नम् पूर्वाह्णे जातमित्यर्थे तु पूर्वाह्णादिभ्यः को यथा पूर्वाह्णकं अपराह्णकं मध्याह्नकमित्यादि एवमार्द्रायां मूलायां जातमित्यर्थे आर्द्रकं मूलकं मे समसस्येति ह्रस्वः ।

अणकः स्यादमावास्याशब्दात्तद्धितात्तादपि ।
स्थानान्तादथ गोशालखरशालाच्च नित्यशः ॥
जातार्थकस्य लुग्वा तु वत्सशालादितो भवेत् ।

अमावास्यायां जात इत्यर्थेऽण् अकश्च स्यात् यथा आमावास्यः अमावास्यको बालकः। तद्धितान्तादमावास्याशब्दादपि यथा च आमावास्यः अमावास्याकः। स्थानान्ताद्विहितस्य जातार्थकतद्धितस्य नित्यं लुक् स्यात् यथा गोस्थाने जातमित्यर्थे गोस्थानं पत्रम् एवमश्वस्थानं शशस्थानमित्यादौ गोशालायां जातमित्यर्थे गोशालं खरशालम् इत्यत्राप्येवम्। नित्यममीषां क्लीवत्वं एभ्यो जातार्थस्य नित्यं लुग्विधानात् अश्विन्यादितो जातार्थकस्य वा लुगिति प्रतीयते। अतएव मघातोऽणो न लुग्भवेत् इत्यग्रे निषेधः सङ्गच्छते इति निबन्धकारः। वत्सशालादितस्तु जातार्थस्य वा लुक् यथा वत्सशालायां जात

इत्यर्थे वत्सशालो वात्शालश्च वृत्त:। एवमभिजित् आभिजितो वा बालकः। वत्सशालाभिजिच्चित्रा रेवती रोहिणी तथा। अश्वयुङ् मृगशीर्षश्च वत्सशालादिको गणः। मृगशिरसि भवं जातं वा इत्यर्थे तु न तद्धितमनभिधानात्।

अनुराधा तिष्यपुष्यौ हस्तस्वाती पुनर्वसु।
विशाखा बहुलेतेभ्यो नित्यं जातार्थकस्य लुक्॥

अनुराधायां जातोऽनुराधः स्त्रीप्रत्ययस्य लुक् तद्धितलुकीति लुक् एवं तिष्यः पुष्यः हस्तः स्वातिः पुनर्वसुः विशाखो बहुलः कथं बाहुलेयस्तारकजिदिति बहुला कृत्तिका तत्र जात इति संज्ञायामियण्।

अविष्ठाषाढयोरीयण् छण् वा शतभिषक् पदात्।

इति महामहोपाध्याय श्रीजगदीश-तर्कालङ्कार-भट्टाचार्य-विरचिता शब्दशक्तिप्रकाशिका समाप्ता।